# दीपकम्

## अष्टमकक्षायाः संस्कृत-पाठ्यपुस्तकम्

0872

विद्ययाऽमृतमश्नुते
एन सी ई आर टी
NCERT
राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING

© NCERT
not to be republished

**0872 – दीपकम् – कक्षा 8**
अष्टमकक्षायाः संस्कृत-पाठ्यपुस्तकम्

ISBN 978-93-5729-294-8

**प्रथम संस्करण**
*जुलाई 2025 आषाढ़ 1947*

**PD 700T BS**

***© राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्, 2025***

**₹ 65.00**

*एन.सी.ई.आर.टी. वॉटरमार्क 80 जी.एस.एम. पेपर पर मुद्रित।*

सचिव, राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्, श्री अरविंद मार्ग , नई दिल्ली 110 016 द्वारा प्रकाशन प्रभाग में प्रकाशित तथा पुष्पक प्रेस प्राइवेट लिमिटेड, 203&204, डी.एस.आई.डी.सी. कॉम्प्लेक्स, ओखला, इंडस्ट्रियल एरिया, फेज-1, नई दिल्ली–110020 द्वारा मुद्रित।

**सर्वाधिकार सुरक्षित**

- प्रकाशक की पूर्व अनुमति के बिना इस प्रकाशन के किसी भी भाग को छापना तथा इलैक्ट्रॉनिकी, मशीनी, फ़ोटो प्रतिलिपि, रिकॉर्डिंग अथवा किसी अन्य विधि से पुनः प्रयोग पद्धति द्वारा उसका संग्रहण अथवा प्रचारण वर्जित है।
- इस पुस्तक की बिक्री इस शर्त के साथ की गई है कि प्रकाशन की पूर्व अनुमति के बिना यह पुस्तक अपने मूल आवरण अथवा जिल्द के अलावा किसी अन्य प्रकार से व्यापार द्वारा उधारी पर, पुनर्विक्रय या किराए पर न दी जाएगी, न बेची जाएगी।
- इस प्रकाशन का सही मूल्य इस पृष्ठ पर मुद्रित है। रबड़ की मुहर अथवा चिपकाई गई पर्ची (स्टिकर) या किसी अन्य विधि द्वारा अंकित कोई भी संशोधित मूल्य गलत है तथा मान्य नहीं होगा।

**रा.शै.अ.प्र.प. के प्रकाशन प्रभाग के कार्यालय**

एन.सी.ई.आर.टी. कैंपस
श्री अरविंद मार्ग
**नई दिल्ली 110 016** फोन : 011-26562708

108, 100 फीट रोड
हेली एक्सटेंशन, होस्डेकेरे
बनाशंकरी III इस्टेज
**बेंगलुरू 560 085** फोन : 080-26725740

नवजीवन ट्रस्ट भवन
डाकघर नवजीवन
**अहमदाबाद 380 014** फोन : 079-27541446

सी.डब्ल्यू.सी. कैंपस
निकट : धनकल बस स्टॉप पनिहटी
**कोलकाता 700 114** फोन : 033-25530454

सी.डब्ल्यू.सी. कॉम्प्लेक्स
मालीगाँव
**गुवाहाटी 781 021** फोन : 0361-2676869

## प्रकाशन सहयोग

| | | |
|---|---|---|
| अध्यक्ष, प्रकाशन प्रभाग | : | *एम.वी. श्रीनिवासन* |
| मुख्य संपादक | : | *बिज्ञान सुतार* |
| मुख्य उत्पादन अधिकारी (प्रभारी) | : | *जहान लाल* |
| मुख्य व्यापार प्रबंधक | : | *अमिताभ कुमार* |
| उत्पादन सहायक | : | *अश्विनी माचरा* |

**आवरण एवं चित्रांकन**

*अचिन जैन*
*ग्रीन ट्री डिजाइनिंग स्टूडियो प्रा. लि.*

© NCERT not to be republished



# पुरोवाक्

*राष्ट्रिय-शिक्षा-नीतिः २०२०* भारतीयसांस्कृतिकपरम्परायाः मानविकमूल्यबोधस्य ज्ञानचर्यायाः तथा च सभ्यतायाः उपलब्धीनाम् आधारेण परिकल्पिता एका आदर्शशिक्षाप्रणाली अस्ति। एषा छात्रान् एकविंश-शताब्द्याः सम्भावनानां तथा प्रत्याह्वानानां कृते दक्षतासम्पन्नान् कर्तुं सुसज्जिता वर्तते। एतादृश्याः महत्त्वाकाङ्क्षिदृष्टेः आधारशिला एषा *राष्ट्रिय-पाठ्यचर्या-रूपरेखा २०२३ (एन्.सी.एफ्. २०२३)*। रूपरेखा प्रत्येकं शैक्षिकस्तरेषु विभिन्नपाठ्यक्रममाध्यमेन दिग्दर्शनं करोति। आधारस्तरे प्राथमिकस्तरे च छात्राणाम् अन्तर्निहितक्षमतानां विकासेन सह मानवजीवनस्य पञ्चस्तरीय-पञ्चकोशानामपि परिपुष्टये सङ्कल्पः गृहीतः। एतदनन्तरं मध्यस्तरे शिक्षणक्रियायां मार्गः प्रशस्तः जायते। एवमेव षष्ठीकक्षातः अष्टम-कक्षां यावत् वर्षत्रयं प्राथमिकमाध्यमिकस्तरयोः सेतुबन्धसदृशं कार्यं करोति। अस्मिन् स्तरे छात्राः आवश्यककौशलैः सुसम्पन्नाः भवेयुः। तेषां जीवने प्रगतये च कौशलानि सहायकानि स्युः। एषा रूपरेखा छात्राणां विश्लेषणात्मक-वर्णनात्मक-आख्यानात्मक-सामर्थ्यानामुन्नयनार्थं प्रयासं करोति। फलतः छात्राः आगामि-प्रत्याह्वानानाम् अवसराणां च कृते प्रस्तुताः भविष्यन्ति।

अस्मिन् स्तरे विविधाः पाठ्यक्रमाः प्रदत्ताः यत्र नव विषयाः सम्मिलिताः सन्ति। एषु विषयेषु तिस्रः भाषाः सन्ति, यत्र अन्यूनं भारतीयमूलभाषाद्वयं स्यात्। एतदतिरिच्य विज्ञानं गणितं सामाजिकविज्ञानं कलाशिक्षा शारीरिकशिक्षा व्यावसायिकशिक्षा तथा च अन्ये विषयाः अन्तर्भूताः स्युः। एतादृशः पाठ्यक्रमः छात्राणां सर्वाङ्गीणविकासाय सहायकः भवेत्। एतादृश्याः परिवर्तनकारि-शिक्षणसंस्कृतेः कृते केचन अनिवार्यनिबन्धाः सन्ति। तत्र विविधशैक्षिकस्तरेषु उपयुक्तानि पाठ्यपुस्तकानि महत्त्वम् आवहन्ति, यतः एतानि पाठ्यपुस्तकानि पाठ्यविषयशिक्षणशास्त्रयोः मध्ये सेतुरूपेण केन्द्रीयभूमिकायाः निर्वाहं करिष्यन्ति। एषा भूमिका प्रत्यक्षशिक्षणस्य अनुसन्धानस्य जिज्ञासायाः च अवसराणां मध्ये समुचितं सन्तुलनं स्थापयेत्। अन्येषु आवश्यकेषु निर्बन्धेषु कक्षायाः समुचिता व्यवस्था शिक्षकाणां च सुष्ठु प्रस्तुतिः महत्त्वपूर्णे। एताभ्यां सह शैक्षिकविषयाणां तदन्तर्गतावधारणात्मकतथ्यानां च सम्बन्धस्थापनस्य अत्यावश्यकता वर्तते।

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् छात्रेभ्यः उच्चगुणयुक्तानि पाठ्यपुस्तकानि प्रदातुं प्रतिबद्धा अस्ति। इदमुद्देश्यं सफलीकर्तुं विभिन्नाः पाठ्यचर्याक्षेत्रसमूहाः निर्मिताः। तत्र प्रमुखाः विषयविशेषज्ञाः शिक्षाशास्त्रविशारदाः शिक्षाविदः अनुभव-शालिनः कार्यरताः शिक्षकाः च सम्मिलिताः भवन्ति, ये पाठ्यपुस्तकानां समुचितं विकासार्थं विविधान् प्रयासान् कुर्वन्ति। अष्टमश्रेणीकृते संस्कृत-पाठ्यपुस्तकम् एकः अत्युत्तमः प्रयासः। दीपकम् इति नामधेये पुस्तके समाहिताः कथाः कविताः श्लोकाः निबन्धाः च सामाजिक-सांस्कृतिक-भौगोलिक-परिवेशादि-प्रतिबिम्बैः परिपूर्णाः सन्ति ये

© NCERT not to be republished

छात्राणाम् आदर्शजीवनयापनार्थं प्रेरणादायकाः भवन्ति। दीपकम् इति पुस्तके भारतीयज्ञानपरम्परायाः विशालं वैभवं, भारतीयकला-संस्कृतिपरम्परायाः स्मृतिचित्राणि च सम्मिलितानि सन्ति। अस्मिन् पुस्तके नैतिकमूल्यबोधः पारिस्थितिकी-संवेदनशीलता लैङ्गिकसमानता वैषयिककौशलादिविषयाः संयोजिताः येन व्यावहारिकदृष्ट्या एतत् पाठ्यपुस्तकं पाठ्यक्रमस्य उद्देश्यं सफलीकरोति। प्रथमतः उपयुक्तसामग्रीचयनमाध्यमेन छात्राणां स्वाभाविकजिज्ञासायाः प्रोत्साहनं द्वितीयतः श्रवण-भाषण-पठन-लेखनादीनां भाषाशिक्षणकौशलानां मूलक्षमतानां च विकासः इति एतयोः पूरणार्थं कार्यकलापाः योग्यताविस्तरादयः सन्निवेशिताः। शब्दावलीज्ञानेन सह व्याकरणस्य सप्रसङ्गशिक्षणम् अर्थपूर्णसन्दर्भस्य बोधे सहायकं भवेत्।

पुस्तकेऽस्मिन् अतिरिक्तसामग्रीणाम् अन्वेषणार्थं प्रोत्साहनं प्रदत्तम्। एतदर्थं विद्यालयीय-पुस्तकालयस्य महत्त्वपूर्णा भूमिका विद्यते। वस्तुतः छात्राणां मार्गदर्शन - प्रेरणार्थं शिक्षकाणां मातापित्रोः च भूमिका अतीव मूल्यपूर्णा गुरुत्वपूर्णा च। एतत् -पुस्तकनिर्माणे प्रकाशने च सम्मिलिताः सर्वे सज्जनाः विद्वांसः धन्यवादार्हाः। तेभ्यः मदीयाम् आन्तरिकीं कृतज्ञतां च प्रकटयामि। एतत् पुस्तकं सर्वेषां ज्ञानपिपासूनाम् आवश्यकतायाः पूरणे सहायकं भविष्यतीति मम दृढः विश्वासः। सर्वेषाम् उपभोगकर्तॄणां परामर्शाः प्रतिक्रियाः च आगामि-संवत्सरेषु पुस्तकस्य विकासाय प्रमोदास्पदं भविष्यन्ति।

अन्ते मे मङ्गलकामना—

**बालानां सुखबोधाय देदीप्यते हि दीपकम्॥**
**संस्कृतस्य प्रभावेण राष्ट्रं भातु सुसंस्कृतम्॥**

दिनेशप्रसादः सकलानी
*निदेशकः*
राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्

नवदेहली
जून, २०२५

© NCERT not to be republished

# भूमिका

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥**

(*वाक्यपदीयम्*)

इह जगति यत्किमपि ज्ञानविषयकं तत्सर्वमेव भाषाबद्धम्। भाषया विना ज्ञानम् अकल्पनीयमेव। वयं भाषया न केवलं भावसम्प्रेषणं कुर्मः अपि तु अस्माकं मननं चिन्तनं ध्यानं किञ्च अखिलजागतिक व्यवहारो हि भाषया सम्पद्यते। अथ शिक्षणस्यापि आधारः भाषा एव। अत एव *राष्ट्रिय-शिक्षा-नीतिः* २०२० इत्यस्यां भाषा छात्राणां सामर्थ्यप्रदानस्य प्रक्रिया इति अभिव्यक्तम्। नूतना एषा *राष्ट्रिय-शिक्षा-नीतिः* एकविंशशताब्द्याः आवश्यकतानुगुणं रचितापि अस्याः आधारः प्राचीनभारतीयज्ञानपरम्परा अथ च संस्कृतज्ञानपरम्परा एव अस्ति इति एतस्याः परिशीलनेनानुभूयते।

संस्कृतभाषासाहित्यशिक्षणसन्दर्भे शिक्षानीतौ इत्थं वर्णितम्—

भारतीयशास्त्रीयभाषाणां साहित्यस्य च महत्त्वं, सौन्दर्यं प्रासङ्गिकतां च उपेक्षितुं नैव शक्यते। भारतीयसंविधानस्य अष्टमानुसूच्यां या संस्कृतभाषा आधुनिकभाषासु अन्तर्भूता, तस्याः काव्यसाहित्यं ग्रीकलैटिनसाहित्ययोः समुदायादपि विशालतरम् अस्ति। एतस्य विशालज्ञानराशिः यथा- गणितं, दर्शनं, व्याकरणं, सङ्गीतं, राजनीतिविज्ञानं, चिकित्साशास्त्रं, वास्तुशास्त्रं, धातुविज्ञानं, नाटकं, काव्यं कथासाहित्यम् इत्यादीनि संस्कृतज्ञानप्रणाली इति विविदिता। (*रा.शि.नी.*– ४.१८)

अस्यां नीतौ पाठ्यपुस्तकानां निर्माणसन्दर्भे निम्नलिखितानां तत्त्वानां समावेशनस्य कृते विशिष्टा चर्चा कृतास्ति —

- तार्किकं रचनात्मकं च चिन्तनम्
- विश्लेषणक्षमता
- समस्यासमाधान-क्षमता
- करुणा, सेवाभावना, सहानुभूतिः, परस्परसम्मानम्, स्वच्छता, शिष्टाचारः, लोकतान्त्रिकभावना, सार्वजनिकसम्पत्तेः संरक्षणम्, वैज्ञानिकचिन्तनम्, स्वतन्त्रता, विविधतावादः, समानता, न्यायः, नैतिकता, मानवीयानां संवैधानिकानां च मूल्यानां विकासः

© NCERT not to be republished

- परस्परं संवादः सहयोगश्च
- सामूहिकः कार्याभ्यासः
- नवाचाराः
- रचनात्मकम् आकलनम्

R-3 इत्यन्तर्गतम् अष्टमवर्गार्थम् इदं पुस्तकम् अस्मिन् आलोके एव सज्जीकृतम्। अस्मिन् पाठ्य-पुस्तके सामान्यतः पाठ्यवस्तु शिक्षण-प्रक्रियां च अधिकृत्य निम्नलिखितान् बिन्दून् प्रति विशिष्टम् अवधानं प्रदत्तम् –

- इदं पाठ्यपुस्तकम् 'अभ्यासपुस्तक-स्वरूपम्' भवेत्
- *राष्ट्रिय-शिक्षा-नीतिः २०२०* इत्यनुसारम्—
  - सरल-मानक-संस्कृतस्य उपयोगः (अनुच्छेदः ४.१७)
  - चतुर्णां भाषिककौशलानाम् एकीकृताः अभ्यासाः (अनुच्छेदः ४.१७)
  - पठनसंस्कृतेः निर्माणम् (अनुच्छेदः २.८)
  - मानवीय-मूल्याधारिता पाठ्य-सामग्री (सूक्तिरूपाणि पाठानां शीर्षकाणि)
  - भारतीय-ज्ञान-परम्परायाः समायोजनम् (पाठान्ते योग्यताविस्तरः परियोजना-कार्यकलापाः)
  - अनुभवात्मक-शिक्षणाधिगम-प्रक्रिया
- पद्यात्मकाः गद्यात्मकाः संवादात्मकाः सुभाषितानि गीतानि च इति आहत्य १२ पाठाः, भाषाविज्ञानस्य अतिरिक्तम् अध्ययनम्, परिशिष्टे व्याकरणं च
- बहुभाषावादस्य कृते शब्दार्थेषु 'मातृभाषया अर्थं लिखत' इत्यस्य संयोजनम् (*रा.शि.नी. २०२०*, अनुच्छेदः ४.१६)
- राष्ट्रिय-गौरवं, पर्यावरणं, विज्ञानं, करुणा, सेवा, कर्तव्यनिष्ठा च
- उद्देश्यानुगुणम् अभ्यासेषु यथावसरं योजिताः क्रीडाः
- परिवेशस्य निर्माणार्थं छात्राणां च सहभागितार्थम् अधिकाधिकं चित्राणां योजनम्
- अभ्यासैः सामूहिक-कार्यस्य निमित्तम् अवसराः
- अन्तःक्रियात्मिकी गतिविध्यात्मिकी च शिक्षणाधिगम-प्रक्रिया
- पठनस्य लेखनस्य चाभ्यासार्थम् अधिकाधिकम् अभ्यासकार्याणि
- अभ्यास-निर्माणस्य पाठ्यसामग्र्याः च चयनस्य सन्दर्भे *रा.शि.नी. २०२०* (अनुच्छेदाः ४.६ – ४.८) इत्यनुसारम् आलोचनात्मकं चिन्तनम्, अन्वेषणं, प्रश्ननिर्माणम्, कलां, क्रीडां च प्रति विशिष्टम् अवधानम्
- रचनात्मकम् आकलनम्

© NCERT not to be republished

संस्कृतभाषायाः व्यावहारिकं पक्षमादाय अस्मिन् पुस्तके सरलमानकसंस्कृतेन विषयावतारः, जिज्ञासोत्पादक-अवतरणिकाधारिताः सचित्रपाठाः, अनुप्रयोगात्मकव्याकरणस्य कृते अवधेयांशाः भाषाकौशलाधारितानि अभ्यासकार्याणि च प्रदत्तानि, यानि छात्राणां भाषाधिगमे नितरां सहायकानि भवेयुः, स्वाध्यायं प्रति च प्रेरयेयुः। प्रतिपाठं बहुभाषीयनवीनशब्दकोशोऽपि नियोजितोऽस्ति यस्मिन् संस्कृतात् संस्कृतेन हिन्द्या आङ्ग्लभाषया च सन्दर्भानुगुणम् अर्थाः प्रदत्ताः सन्ति। ततः अनन्तरं विद्यार्थी स्वभाषया अर्थं लिखतु इति रिक्तस्थानम् अपि प्रदत्तम् अस्ति। एतेन आभारतच्छात्राणां बहुभाषीयशब्दज्ञानेन सह भाषासु इतरेतरसम्बन्धज्ञानम् अपि भवेत्। एवं पाठ्यपुस्तकरचनासिद्धान्तान् अवलम्ब्य विनिर्मितं पाठ्यपुस्तकमिदं छात्राणां भाषाज्ञाने प्रयोगे समाजीकरणप्रक्रियायां च महत्तरं स्थानमुपकल्पयिष्यतीति भृशं तर्कयामः।

तथापि,

**पुराणमित्येव न साधु सर्वं, न चापि काव्यं नवमित्यवद्यम्।**
**सन्तः परीक्ष्यान्यतरद्भजन्ते, मूढः परप्रत्ययनेन बुद्धिः॥**

इत्येवं मालविकाग्निमित्रनाटकस्थं महाकवेः कालिदासस्य वचः स्मारं स्मारम् अस्य पुस्तकस्य पाठकानां नव-नव-विकासशीलप्रस्तावाः स्वागतार्हाः॥

समन्वयकः
जतीन्द्र·मोहनः मिश्रः
*आचार्यः*, भाषा-शिक्षा-विभागः,
रा.शै.अ.प्र.प., नवदेहली

© NCERT not to be republished

# राष्ट्र–गानम्

*जन–गण–मन–अधिनायक जय हे*
*भारत–भाग्य–विधाता*
*पञ्जाब–सिन्धु–गुजरात–मराठा*
*द्राविड– उत्कल–बङ्ग*
*विन्ध्य–हिमाचल–यमुना–गङ्गा*
*उच्छल–जलधि–तरङ्ग।*
*तव शुभ नामे जागे,*
*तव शुभ आशिष माँगे,*
*गाहे तव जय–गाथा।*
*जन–गण–मङ्गल–दायक जय हे*
*भारत–भाग्य–विधाता।*
*जय हे, जय हे, जय हे,*
*जय जय जय जय हे॥*

अस्माकं 'जन-गण-मन' इति राष्ट्रगानं मूलत: बाङ्ग्ला-भाषायां महाकविना रवीन्द्रनाथ·ठाकुर·महोदयेन रचितम्। भारतस्य राष्ट्रगान-रूपेण अस्य हिन्दी-रूपान्तरणं संविधान-सभायां २४.०१.१९५० – दिनाङ्के स्वीकृतम्। इदं राष्ट्रगानम् अत्र संस्कृत-वर्तनी-अनुगुणं प्रस्तुतम् अस्ति।

© NCERT not to be republished

# राष्ट्रिय-पाठ्यक्रम-शिक्षणाधिगम-सामग्री-समितिः (एन्.एस्.टी.सी.)

महेशचन्द्रः पन्तः, *कुलाधिपतिः*, राष्ट्रिय-शैक्षिक-योजना-प्रशासन-संस्थानम् — **अध्यक्षः**

मञ्जुलः भार्गवः, *आचार्यः*, प्रिन्स्टन्-यूनिवर्सिटि, यू.एस्.ए. — **सह-अध्यक्षः**

सुधा मूर्तिः, *प्रतिष्ठिता लेखिका शिक्षाविद् च*

बिबेकः देबरॉयः, *अध्यक्षः*, प्रधानमन्त्रिणः आर्थिक-परामर्श-परिषद् (ई.ए.सी.– पी.एम्.)

शेखरः माण्डे, *पूर्व-महानिदेशकः*, सी.एस्.आय्.आर्. तथा *आचार्यः*, सावित्रीबाई-फुले-पुणे-विश्वविद्यालयः, पुणे

सुजाता रामदोरई, *आचार्या*, ब्रिटिश्-कोलम्बिया-विश्वविद्यालयः, कॅनडा

शङ्करः महादेवन्, *संगीत-विशेषज्ञः*, मुम्बई

यू. विमलकुमारः, *निदेशकः*, प्रकाश-पादुकोण-बॅड्मिण्टन्-ॲकॅडमि, बेङ्गळूरुः

मिशेल् दनिनो, *अतिथि-आचार्यः*, आय्.आय्.टी., गान्धीनगरम्

सुरीना राजन्, *आय्.ए.एस्. (सेवानिवृत्ता)*, हरियाणा तथा *पूर्व-महानिदेशिका*, एच्.आय्.पी.ए.

चमूकृष्णः शास्त्री, *अध्यक्षः*, भारतीय-भाषा-समितिः, शिक्षा-मन्त्रालयः, भारत-सर्वकारः

संजीवः सान्यालः, *सदस्यः*, प्रधानमन्त्रिणः आर्थिक-परामर्श-परिषद् (ई.ए.सी.– पी.एम्.)

एम्.डी. श्रीनिवासः, *अध्यक्षः*, सेण्टर्-फ़ॉर्-पॉलिसी-स्टडीज़्, चेन्नई

गजाननः लोण्ढे, *प्रमुखः*, कार्यक्रम-कार्यालयः (प्रोग्राम्-ऑफ़िस्), एन्.एस्.टी.सी.

रबीन् छेत्री, *निदेशकः*, एस्.सी.ई.आर्.टी., सिक्किमः

प्रत्यूषकुमारः मण्डलः, *आचार्यः*, सामाजिकविज्ञान-शिक्षा-विभागः, रा.शै.अ.प्र.प., नवदेहली

दिनेशकुमारः, *आचार्यः*, योजना-अनुवीक्षण-प्रभागः, रा.शै.अ.प्र.प., नवदेहली

कीर्तिः कपूरः, *आचार्या*, भाषा-शिक्षा-विभागः, रा.शै.अ.प्र.प., नवदेहली

रञ्जना अरोड़ा, *आचार्या अध्यक्षा च*, पाठ्यचर्या-अध्ययन-विकास-विभागः, रा.शै.अ.प्र.प., नवदेहली — **सदस्य-सचिवा**

© NCERT not to be republished

# भारतस्य संविधानम्

## प्रस्तावना

**वयं, भारतस्य जनाः,**

**भारतं**

[**सम्पूर्णप्रभुत्वसम्पन्नं, समाजवादि, सम्प्रदायनिरपेक्षं,**
**लोकतन्त्रात्मकं गणराज्यं विधातुं**][१]

तस्य समस्तान् नागरिकांश्च

सामाजिकम्, आर्थिकं, राजनीतिकं च – **न्यायं,**
विचारस्य, अभिव्यक्तेः,
आस्थायाः, धर्मस्य, उपासनायाश्च – **स्वतन्त्रतां,**
प्रतिष्ठायाः, अवसरस्य च – **समतां**
प्रापयितुं,
तेषु सर्वेषु च व्यक्तिगौरवस्य
[राष्ट्रस्य एकतायाः, अखण्डतायाश्च][२] सुनिश्चायिकां – **बन्धुतां**
वर्धयितुं;

कृतदृढसङ्कल्पाः
**अस्याम् अस्मदीयायां संविधानसभायाम्**
अद्य, ख्रिस्तीये १९४९-तमे वर्षे नवम्बर-मासस्य २६-तमे दिने
(२००६-तमे विक्रमसंवत्सरे मार्गशीर्षे शुक्लपक्षे सप्तम्यां तिथौ)
**एतेन इदं संविधानम् अङ्गीकृतम्, अधिनियमितम्,**
**आत्मार्पितं च कुर्महे।**

© NCERT not to be republished

१ संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २-अनुभागेन "सम्पूर्णप्रभुत्वसम्पन्नं लोकतन्त्रात्मकं गणराज्यम्" इति एतेभ्यः शब्देभ्यः प्रति एते शब्दाः संनिवेशिताः।

२ उपर्युक्तस्य अधिनियमस्य उक्तेन अनुभागेन "राष्ट्रस्य एकतायाः" इति एताभ्यां शब्दाभ्यां प्रति एते शब्दाः संनिवेशिताः।

# पाठ्यपुस्तक-निर्माण-गणः

**गण-नायकः**

चान्दकिरणः सलूजा, *न्यासी निदेशकः च*, संस्कृत-संवर्धन-प्रतिष्ठानम्, नवदेहली

**सदस्याः**

कालीप्रसन्नः शतपथी, *उपाध्यक्षः*, दिव्यजीवनसङ्घः, केन्द्रापडा, ओडिशा

कुमारः बागेवाडिमठः, *सहायक-आचार्यः*, शिक्षा-विभागः, राष्ट्रिय-संस्कृत-विश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः

दिवाकरः शर्मा, *टी.जी.टी. संस्कृतम्*, पी.एम्.श्री केन्द्रीय-विद्यालयः क्र.– 2, ए.एफ़्.एस्., ग्वालियरम्, मध्यप्रदेशः

देवकीनन्दनः, *सहायक-आचार्यः*, भाषा-शिक्षा-विभागः, रा.शै.अ.प्र.प., नवदेहली

निधिः वेदरत्नः, *टी.जी.टी. संस्कृतम्*, कोर्-अॅकेडमिक्-इकाई, परीक्षा-शाखा, शिक्षा-निदेशालयः, देहली-सर्वकारः, नवदेहली

मनोरमा, *सहायक-आचार्या*, संस्कृत-विभागः, ज़ाकिर-हुसैन-दिल्ली-कॉलेज्, नवदेहली

मुकेशकुमारः, *सहायक-आचार्यः*, सनातन-धर्म-आदर्श-संस्कृत-महाविद्यालयः, डोहगी, ऊना, हिमाचलप्रदेशः

यासमीन् अशरफ़ः, *सहायक-आचार्या* (भाषा-शिक्षा), शिक्षा-विभागः, क्षेत्रीय-शिक्षा-संस्थानम्, अजमेरः, राजस्थानम्

वन्दना जे., *शैक्षणिक-निदेशिका*, शारदा-गुरुकुलम्, चेम्मण्टा, त्रिशूरः, केरला

वाचस्पतिनाथः झा ‘मणिः’, *सहायक-आचार्यः*, भाषा-शिक्षा-विभागः, रा.शै.अ.प्र.प., नवदेहली

विपिनविहारी शतपथी, *सेवानिवृत्तः अध्यापकः*, रेभेन्सा-कलीजिअॅट्-विद्यालयः, कटकम्, ओडिशा

वीरेन्द्रकुमारः पाठकः, *विशेष-कार्याधिकारी*, उपशिक्षा-निदेशकः, क्षेत्रम्– २३, शिक्षा-निदेशालयः, देहली-सर्वकारः, नवदेहली

वेङ्कटसुब्रह्मण्यः पी., *निदेशकः*, व्योम-लिङ्गविस्टिक्स्-लॅब्स्-फ़ौन्डेशन्, बेङ्गळूरुः, कर्नाटकः

संभाजि: विठ्ठलः पाटीलः, *सहाचार्यः*, केन्द्रीय-संस्कृत-विश्वविद्यालय-द्वारा संस्थापितम्
आय्.के.एस्. – ई.डी.एस्. केन्द्रं, डेक्कन् कॉलेज्, पुणे, महाराष्ट्रम्

© NCERT not to be republished

सिद्धार्थः ए. भार्गवः, *मुख्य-परामर्शकः*, एन्.एस्.टी.सी.– कार्यक्रम-कार्यालयः (प्रोग्राम् ऑफ़िस्) – संस्कृतं, भारतीय-ज्ञान-परम्परा च (आय्.के.एस्.) – पाठ्यचर्या-क्षेत्र-समूहः; तथा च *निदेशकः*, ओं शान्तिधाम – वेद-गुरुकुलम्, बेङ्गळूरुः, कर्नाटकः

सुशान्तकुमारः रायः, *सहायक-आचार्यः*, शिक्षाशास्त्र-विभागः, केन्द्रीय-संस्कृत-विश्वविद्यालयः, श्रीसदाशिव-परिसरः, पुरी, ओडिशा

सूर्यमणिः भण्डारी, *सहायक-आचार्यः*, व्याकरण-विभागः, केन्द्रीय-संस्कृत-विश्वविद्यालयः, श्रीरघुनाथ-कीर्ति-परिसरः, देवप्रयागः, उत्तराखण्डः

**सदस्य-समन्वयकः**

जतीन्द्र·मोहनः मिश्रः, *आचार्यः*, भाषा-शिक्षा-विभागः तथा च सदस्य-संयोजकः, संस्कृत-पाठ्यचर्या-क्षेत्र-उपसमूहः, रा.शै.अ.प्र.प., नवदेहली

© NCERT not to be republished

# कार्तज्ञ्यम्

पाठ्यपुस्तकस्यास्य निर्माणप्रक्रियायां मार्गदर्शने समीक्षायां च बहुमूल्ययोगदानार्थं राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् – *राष्ट्रिय-पाठ्यचर्या-रूपरेखा*–पर्यवेक्षणसमितेः अध्यक्षाय सदस्यैश्च सह, संस्कृतभाषायाः पाठ्यपुस्तक-निर्माण-गणस्य अध्यक्षाय सर्वेभ्यः सदस्येभ्यश्च, अन्येभ्यः अन्तःसम्बन्धिविषयाणां पाठ्यपुस्तक-निर्माण-गणानां गणनायकेभ्यः सदस्येभ्यश्च कार्तज्ञ्यं प्रकटयति। अस्मिन्नेव सन्दर्भे परिषद् – संयुक्तनिदेशकः, केन्द्रीयशैक्षिकप्रौद्योगिकीसंस्थानम्; अध्यक्षः, सामाजिकविज्ञानशिक्षाविभागः; अध्यक्षः, विज्ञानगणितशिक्षा विभागः; अध्यक्षः, शैक्षिकसर्वेक्षणप्रभागः; अध्यक्षः, विशेषावश्यकतासमूहशिक्षाविभागः; अध्यक्षः, जेण्डर्-अध्ययनविभागः; अध्यक्षः, कलासौन्दर्यबोधशिक्षाविभागः इत्येतेभ्यः, एतेषां विभागानाम् अन्यसदस्येभ्यश्च पाठ्यपुस्तके आन्तरानुशासनिकविषयाणाम् अन्तःसम्बन्धस्थापने साहाय्यार्थं विशेषेण साधुवादान् अर्पयति।

प्रो. मीरा भार्गवः पुस्तकस्य कात्स्न्र्येन पुनरीक्षणं कृत्वा प्रतिपुष्टिप्रदानेन अस्मान् अनुगृहीतवती। तदर्थं तस्यै भूरिशः धन्यवादान् ज्ञापयामः। पुस्तकस्य निर्माणे येषां कवीनां रचनाकाराणां च कृतयः सङ्कलिताः सन्ति तेभ्यः विद्वद्भ्यः परिषद् इयं हार्दं कार्तज्ञ्यं निवेदयति। अस्मिन् पुस्तके संस्कृतसंवर्धनप्रतिष्ठानं, नवदेहली (www.samskritpromotion.in), तथा च Patrick J. Lynch, medical illustrator; C. Carl Jaffe, MD, cardiologist (www.patricklynch.net) इत्यनयोः कासाञ्चन सामग्रीणां संग्रहः कृतः। तदर्थम् उभयोः कृते कार्तज्ञ्यं निवेद्यते। डॉ. विजयपालशास्त्रिणः (*आचार्यः*, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः, उत्तराखण्डः) अमूल्यमार्गदर्शनाय, तथा च स्वर्णप्रस्थे (हरयाणास्थे) प्रतिष्ठितस्य रेवलीग्रामस्थस्य पाणिनिमहाविद्यालयस्य विरजानन्दाश्रमस्य आचार्याणां स्नातकानां च विद्वद्विमर्शाय, तेभ्यः सादरं कार्तज्ञ्यं निवेदयामः।

एन.एस.टी.सी.– कार्यक्रम-कार्यालयस्य (प्रोग्राम्-ऑफ़िस्) *वरिष्ठपरामर्शिका* डॉ. स्वस्तिः शर्मा, *वरिष्ठशोधसहायकः* श्रीबालमुकुन्दः एवञ्च *कनिष्ठपरियोजनाध्येतारः* डॉ. देवेशः शर्मा, निमेशकुमारः सिंहः, विशालः त्यागी, प्रज्ञा शर्मा, चाँदनी शर्मा, सूर्यप्रकाशः नौटियालः, शाश्वती भारद्वाजः, मनीषः च प्रक्रियायां यथायोग्यं सहयोगं दत्तवन्तः, अतः ते साधुवादार्हाः सन्ति।

अस्य पुस्तकस्य अन्तिमं रूपं प्रदातुं प्रकाशनप्रभागं प्रति कृतज्ञतां ज्ञापयामः। पाठ्यपुस्तकस्य संपादने *सहायक-संपादकं (संविदा)* शिवमोहन-यादवं प्रति तथा च प्रकाशनविभागे *डी.टी.पी. प्रकोष्ठस्य प्रभारिणं* पवनकुमारबरियारं प्रति धन्यवादं प्रकटयामः। रा.शै.अ.प्र.प. इत्यस्य प्रकाशनप्रभागे *संविदारूपेण कार्यरतां डी.टी.पी.-संचालकान्* विपनकुमारशर्माणं, विवेकराजपूतं, उपासनां, बिट्टूकुमारमहतों च प्रति धन्यवादान् समर्पयामः।

© NCERT not to be republished

# राष्ट्र–गीतम्

***वन्दे मातरं, वन्दे मातरम्।***
***सुजलां सुफलां मलयज–शीतलाम्***
***शस्य–श्यामलां मातरम्,***
***वन्दे मातरम्॥***

***शुभ्र–ज्योत्स्ना–पुलकित–यामिनीम्***
***फुल्ल–कुसुमित–द्रुमदल–शोभिनीम्***
***सुहासिनीं सुमधुर–भाषिणीम्***
***सुखदां वरदां मातरम्,***
***वन्दे मातरं, वन्दे मातरम्॥***

सत्यमेव जयते

© NCERT not to be republished

'वन्दे मातरम्' इति गीतं बङ्किमचन्द्र·चट्टोपाध्याय·महोदयेन रचितस्य काव्यस्य आदिमः अंशः अस्ति, यत् संस्कृत-भाषायां गुम्फितम् अस्ति। इदं गीतं स्वातन्त्र्य-संग्रामे भारतवासिनां नितरां प्रेरणाप्रदम् आसीत्। २४.०१.१९५० – दिनाङ्के भारतस्य राष्ट्रपतिः डॉ. राजेन्द्र·प्रसादः संविधान-सभायाम् एवम् उद्घोषितवान् – " 'वन्दे मातरम्' यत् भारतस्य स्वातन्त्र्यान्दोलनस्य उद्दीपने एकाम् ऐतिहासिकीं भूमिकां निरूढवत्, तत् राष्ट्र-गानेन 'जन-गण-मन' इत्यनेन सह समानरूपेण सम्मानितं भविष्यति, समानं च महत्त्वं धारयिष्यति।"





# पाठानुक्रमणिका


| | | | |
|---|---|---|---|
| *पुरोवाक्* | | | *iii* |
| *भूमिका* | | | *v* |
| *सरस्वतीप्रार्थना* | | | *xvi* |
| १. | **प्रथमः पाठः** | **संगच्छध्वं संवदध्वम्** | **1** |
| २. | **द्वितीयः पाठः** | **अल्पानामपि वस्तूनां संहतिः कार्यसाधिका** | **10** |
| ३. | **तृतीयः पाठः** | **सुभाषितरसं पीत्वा जीवनं सफलं कुरु** | **24** |
| ४. | **चतुर्थः पाठः** | **प्रणम्यो देशभक्तोऽयं गोपबन्धुर्महामनाः** | **36** |
| ५. | **पञ्चमः पाठः** | **गीता सुगीता कर्तव्या** | **49** |
| ६. | **षष्ठः पाठः** | **डिजिभारतम् – युगपरिवर्तनम्** | **61** |
| ७. | **सप्तमः पाठः** | **मञ्जुलमञ्जूषा सुन्दरसुरभाषा** | **75** |
| ८. | **अष्टमः पाठः** | **पश्यत कोणमैशान्यं भारतस्य मनोहरम्** | **85** |
| ९. | **नवमः पाठः** | **कोऽरुक् ? कोऽरुक् ? कोऽरुक् ?** | **97** |
| १०. | **दशमः पाठः** | **सन्निमित्ते वरं त्यागः (क-भागः)** | **111** |
| ११. | **एकादशः पाठः** | **सन्निमित्ते वरं त्यागः (ख-भागः)** | **124** |
| १२. | **द्वादशः पाठः** | **सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते** | **137** |
| १३. | **त्रयोदशः पाठः** | **वर्णोच्चारण-शिक्षा १** | **146** |
| (क) | परिशिष्टम् १ | व्याकरणम् | 159 |
| (ख) | परिशिष्टम् २ | शब्दरूपाणि | 166 |
| (ग) | परिशिष्टम् ३ | धातुरूपाणि | 173 |


© NCERT not to be republished

# सरस्वतीप्रार्थना

जय जय हे भगवति सुरभारति...

जय जय हे भगवति सुरभारति तव चरणौ प्रणमामः।
नादब्रह्ममयि जय वागीश्वरि शरणं ते गच्छामः॥ १॥

त्वमसि शरण्या त्रिभुवनधन्या सुरमुनिवन्दितचरणा।
नवरसमधुरा कवितामुखरा स्मितरुचिरुचिराभरणा॥ २॥

आसीना भव मानसहंसे कुन्दतुहिनशशिधवले।
हर जडतां कुरु बुद्धिविकासं सितपङ्कजतनुविमले॥ ३॥

ललितकलामयि ज्ञानविभामयि वीणापुस्तकधारिणि।
मतिरास्तां नो तव पदकमले अयि कुण्ठाविषहारिणि॥ ४॥



© NCERT not to be republished

# प्रथमः पाठः

# संगच्छध्वं संवदध्वम्

0872CH01



प्राचीन-भारतीयज्ञान-परम्परायां ‘**वेदः** साक्षात् ब्रह्ममुखनिःसृता पवित्रतमा दैवी वाक्’ इति मन्यते। **वेदस्य** चत्वारः संहिताः सन्ति – **ऋग्वेदः**, **यजुर्वेदः**, **सामवेदः**, **अथर्ववेदः** चेति। इमे **वेदाः** अद्य विश्वस्य प्राचीनतम-साहित्य-रूपेण विद्वद्भिः मन्यन्ते। भवन्तः सर्वे स्नात्वा, शुद्धवस्त्राणि परिधाय, पादत्राणं बहिः स्थापयित्वा, अस्यां प्रार्थनासभायां समुपस्थिताः सन्ति। अतः आगच्छन्तु, प्रणामाञ्जलिं कृत्वा, नेत्रे मीलयित्वा, एकाग्रचित्तेन, समवेतस्वरेण च वेदमन्त्राणाम् उच्चारणं कुर्मः —



**ओ३म्**

**संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।**
**देवा भागं यथा पूर्वे संजानाना उपासते॥ १॥**

**समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।**
**समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि॥ २॥**

**समानी व आकूतिः समाना हृदयानि वः।**
**समानमस्तु वो मनो यथा वः सुसहासति॥ ३॥**



## मन्त्राणां भावार्थं जानीमः —

**संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।**
**देवा भागं यथा पूर्वे संजानाना उपासते॥ १॥**

**पदच्छेदः** – संगच्छध्वम् संवदध्वम् सम् वः मनांसि जानताम् देवाः भागम् यथा पूर्वे संजानानाः उपासते।

**अन्वयः** – (यूयम्) संगच्छध्वं संवदध्वं वः मनांसि संजानताम्। यथा पूर्वे देवाः भागं संजानानाः उपासते।

**भावार्थः** – *(वेदस्य ऋषिः 'आङ्गिरसः' परमेश्वरस्य संदेशेन मनुष्यान् उपदिशति)* हे मानवाः! यूयं सर्वे (*संगच्छध्वं*) स्वस्य परिवारे, गणे, समाजे, राष्ट्रे, विश्वे च मिलित्वा अग्रे गच्छत, संभूय अभ्युदयं साधयत। (*संवदध्वं*) परस्परं सम्यक् विचारविनिमयं कुर्वन्तः एकस्वरेण वदत। (*वः*) युष्माकं (*मनांसि*) परस्परं मनोभावान् (*संजानताम्*) सम्यक् जानीत। परस्परं मनोभेदः मास्तु।

(*यथा पूर्वे*) यथा सृष्टेः प्रारम्भकाले, (*देवाः*) ब्रह्मणा सृष्टाः अग्नि-वायु-आदित्यादयः ब्रह्माण्डीय-शक्तयः (*भागं*) सृष्टि-निर्माण-यज्ञस्य साफल्यार्थं स्वं स्वं कर्तव्यं स्वीकृत्य, (*संजानानाः*) परस्परम् उत्कृष्ट-समन्वय-पूर्वकं (*उपासते*) स्वं स्वं कर्म निरवहन्।

तथैव यूयं मनुष्याः अपि स्वस्य कुटुम्बस्य, दलस्य, लोकस्य च प्रगतये नित्यं संभूय स्व-स्व-कर्तव्यस्य सुचारु निर्वाहं कुरुत। इत्थं यूयं सर्वे वैमनस्यं परित्यज्य ऐक्यभावेन जीवत, तथा सर्वे अभीष्टफलानि च प्राप्नुत।

**समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।**
**समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि॥ २॥**

**पदच्छेदः** – समानः मन्त्रः समितिः समानी समानम् मनः सह चित्तम् एषाम् समानम् मन्त्रम् अभिमन्त्रये वः समानेन वः हविषा जुहोमि।

**अन्वयः** – एषां मन्त्रः समानः, समितिः समानी, मनः समानं, चित्तं सह (अस्तु)। वः समानं मन्त्रम् अभिमन्त्रये वः समानेन हविषा जुहोमि।

**भावार्थः** – (*एषां*) एकस्मिन् कर्मणि सह-प्रवृत्तानाम् एषां (*मन्त्रः*) चिन्तनं (*समानः*) परस्परं सौहार्दपूर्णं भवतु, एषां च (*समितिः*) लक्ष्यसिद्धिः (*समानी*) समाना भवतु, (*मनः*) मनः च (*समानं*) सौमनस्यपूर्णम् अस्तु, तथा च (*चित्तं*) बुद्धिजन्यं ज्ञानम् अपि (*सह*) एकीभूतम् अस्तु।

गृहे, वर्गे, लोके च परस्परं द्वेषं विना सर्वे सुखेन सौहार्दपूर्णं जीवनं यापयेयुः।



© NCERT not to be republished



हे मनुजाः! (*वः*) युष्माकम् (*समानं मन्त्रम्*) अन्योन्य-मन्त्रणं, संघटित-संकल्पं च (*अभिमन्त्रये*) अहम् संस्करोमि – दिव्यभावेन योजयित्वा प्रकटयामि। तथा च (*वः*) संघटितानां युष्माकं (*समानेन*) सामूहिक्या (*हविषा*) प्रार्थनया (*जुहोमि*) अहं ज्ञानयज्ञं सम्पादयामि।

इत्थम्, ऋषयः महात्मनः च सर्वदा साम्मनस्यपूर्णं सङ्कल्पं मन्त्रणं च दिव्यभावेन योजयित्वा समाजे प्रचारयन्ति, तस्य साफल्यार्थं च परमेश्वरं प्रार्थयन्ते।

**समानी व आकूतिः समाना हृदयानि वः।**
**समानमस्तु वो मनो यथा वः सुसहासति॥ ३॥**

**पदच्छेदः** – समानी वः आकूतिः समाना हृदयानि वः समानम् अस्तु वः मनः यथा वः सु सह असति।

**अन्वयः** – (हे मानवाः!) वः आकूतिः समानी (अस्तु)। वः हृदयानि समाना (सन्तु)। यथा वः सह सु असति, (तथा) वः मनः समानम् अस्तु।

**भावार्थः** – हे मानवाः! (*वः*) युष्माकं (*आकूतिः*) सङ्कल्पः (*समानी*) समानः अस्तु। (*वः हृदयानि*) युष्माकं हृदयानि (*समाना*) सामरस्यपूर्णानि सन्तु।

(*यथा*) येन (*वः*) युष्माकं (*सह*) संघटनं (*सु*) शोभनम् उत्कृष्टं च (*असति*) भवति, तथा (*वः मनः*) युष्माकं मनः (*समानम्*) सामञ्जस्ययुतम् एकरूपं च (*अस्तु*) अस्तु।

अनेन एव परिवारे, गणे, समाजे, राष्ट्रे, विश्वे च सुखं, शान्तिः, मैत्रीभावः च विराजते। एतैः मन्त्रैः संघटितरूपेण सहजीवनस्य कृते प्रेरणा लभ्यते। एतेन स्वजीवने लोके च प्रसन्नता, सौमनस्यम्, उत्साहः, आयुः, आरोग्यं, विजयः, समृद्धिः, धर्मः, ज्ञानप्राप्तिः, आत्मतृप्तिः च भवति।



© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| संगच्छध्वम् | मिलित्वा गच्छत | मिलकर चलो | May you walk together | |
| संवदध्वम् | एकस्वरेण वदत | सहमतिपूर्वक बोलें | May you speak in one voice | |
| समवेतस्वरेण | सम्मिलित-स्वरेण | सम्मिलित ध्वनि से | By chanting in unison | |
| मनांसि | चित्तानि | मनों को | Minds | |
| जानताम् | जानन्तु | जानें | May you know | |
| देवाः | ब्रह्माण्डीय-शक्तयः / वैश्विक-शक्तयः | सृष्टि की मूलभूत शक्तियाँ | Cosmic forces & celestial phenomena | |
| संजानानाः | एकमनसः भूत्वा | एक विचार वाले होकर | Being amicable | |
| उपासते | सेवन्ते | श्रद्धापूर्वक कर्तव्य निर्वहण | Devotedly performing | |
| अभ्युदयम् | अभिवृद्धिः | लौकिक उन्नति | Elevation and prosperity | |
| मन्त्रः | विचारः | चिन्तन | Contemplation | |
| समितिः | समाना प्राप्तिः | समान सिद्धि | Common resolutions | |
| वः | युष्मभ्यम् | तुम्हारे | For you | |
| अभिमन्त्रये | संस्कृत्य प्रचारयामि | अभिमन्त्रित करके प्रचारित करता हूँ | (I) Consecrate and propagate | |
| हविषा | प्रार्थनापूर्वकेण समर्पणेन | प्रार्थना पूर्वक यज्ञाहुति द्वारा | By oblatory prayers | |
| जुहोमि | ज्ञानकर्ममयं यज्ञं साधयामि | दिव्य यज्ञ कर्म को साधता/ती हूँ | Performing Yajña & divine offerings | |
| आकूतिः | सङ्कल्पः | संकल्प | Resolution | |
| सु सह असति | सुसंघटितः भवेत् | सुसंघटित हो | May you be united | |
| संहिता | मूलमन्त्रपाठः | मूल वैदिक मन्त्र पाठ | Original Vedic text | |
| ब्रह्मणा | सृष्टिकर्त्रा / परमेश्वरेण | सृष्टि के निर्माता परमात्मा के द्वारा | By the creator of the universe | |
| निरवहन् | निर्वाहम् अकुर्वन् | निर्वाह किया | Took responsibility | |

© NCERT not to be republished



## अत्र इदम् अवधेयम्

१. सामान्यतया गम्-धातुः परस्मैपदी अस्ति। यदा 'सम्' इति उपसर्गयुक्तः गम्-धातुः भवति तदा तस्य आत्मनेपदरूपाणि भवन्ति।

यथा– गम् + ति = गच्छति।

सम् + गच्छति = सङ्गच्छते।

२. गम्-धातोः लोट्-लकारस्य रूपाणि पश्यामः —

परस्मैपदम्

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गच्छतु | गच्छताम् | गच्छन्तु |
| मध्यमपुरुषः | गच्छ | गच्छतम् | गच्छत |
| उत्तमपुरुषः | गच्छानि | गच्छाव | गच्छाम |

आत्मनेपदम्

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | संगच्छताम् | संगच्छेताम् | संगच्छन्ताम् |
| मध्यमपुरुषः | संगच्छस्व | संगच्छेथाम् | संगच्छध्वम् |
| उत्तमपुरुषः | संगच्छै | संगच्छावहै | संगच्छामहै |

लोट्-लकारः

आज्ञार्थे भवति। यथा – छात्राः ! यूयम् उत्तिष्ठत। यूयम् उपविशत।

आमन्त्रणार्थे भवति। यथा – भवन्तः आगच्छन्तु। सार्धं क्रीडामः।

आशीर्वादार्थे भवति। यथा – आयुष्मान् भव। विजयी भव। शिवास्ते पन्थानः सन्तु।

३. अस्मद्-युष्मद्-शब्दयोः द्वितीया-चतुर्थी-षष्ठी-विभक्तिषु वैकल्पिकरूपाणि भवन्ति।

यथा –

**अस्मद् —**

**द्वितीया विभक्तिः** – शाधि माम् त्वां प्रपन्नम्। शाधि मा त्वा प्रपन्नम्।

**चतुर्थी विभक्तिः** – देहि मह्यं वरदे वरम्। देहि मे वरदे वरम्।

**षष्ठी विभक्तिः** – त्वमेव सर्वं मम देवदेव। त्वमेव सर्वं मे देवदेव।

© NCERT not to be republished



**युष्मद् —**

| | | | |
|---|---|---|---|
| **द्वितीया विभक्तिः** | – | अहं त्वा मोक्षयिष्यामि। | अहं त्वां मोक्षयिष्यामि। |
| **चतुर्थी विभक्तिः** | – | नमः तुभ्यम् (नमस्तुभ्यम्)। | नमः ते (नमस्ते)। |
| **षष्ठी विभक्तिः** | – | शिष्यः तव अहम्। | शिष्यः ते अहम्। |



## अभ्यासात् जायते सिद्धिः

**१. संज्ञानसूक्तं सस्वरं पठत स्मरत लिखत च।**

**२. अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत —**

(क) सर्वेषां मनः कीदृशं भवेत्? ..............................

(ख) सङ्गच्छध्वं संवदध्वम् इत्यस्य कः अभिप्रायः? ..............................

(ग) सर्वे किं परित्यज्य ऐक्यभावेन जीवेयुः? ..............................

(घ) अस्मिन् पाठे का प्रेरणा अस्ति? ..............................

**३. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत —**

(क) परमेश्वरः सर्वत्र व्याप्तः अस्ति। ..............................

(ख) वयम् ईश्वरं नमामः। ..............................

(ग) वयम् ऐक्यभावेन जीवामः। ..............................

(घ) ईश्वरस्य प्रार्थनया शान्तिः प्राप्यते। ..............................

(ङ) अहं समाजाय श्रमं करोमि। ..............................

(च) अयं पाठः ऋग्वेदात् सङ्कलितः। ..............................

(छ) वेदस्य अपरं नाम श्रुतिः। ..............................

(ज) मन्त्राः वेदेषु भवन्ति। ..............................

© NCERT not to be republished



४. **पट्टिकातः शब्दान् चित्वा अधोलिखितेषु मन्त्रेषु रिक्तस्थानानि पूरयत—**

संवदध्वं, समितिः, आकूतिः, भागं, मनः, हृदयानि, जानाना,
समानं, मनो, हविषा, सुसहासति, मनांसि

(क) सङ्गच्छध्वं .................................. सं वो .................................. जानताम्।
देवा .................................. यथा पूर्वे सं .................................. उपासते।

(ख) समानो मन्त्रः .................................. समानी समानं .................................. सह चित्तमेषाम्।
.................................. मन्त्रमभिमन्त्रये वः समानेन वो .................................. जुहोमि।

(ग) समानी व .................................. समाना .................................. वः।
समानमस्तु वो .................................. यथा वः ..................................।

५. **पाठे प्रयुक्तान् शब्दान् भावानुसारं परस्परं योजयत—**

| | |
|---|---|
| (क) संगछध्वम् | सेवन्ते |
| (ख) संवदध्वम् | चित्तम् |
| (ग) मनः | मिलित्वा चलत |
| (घ) उपासते | सङ्कल्पः |
| (ङ) वसूनि | समस्तानि |
| (च) विश्वानि | एकस्वरेण वदत |
| (छ) आकूतिः | धनानि |



६. **उदाहरणानुसारेण लट्-लकारस्य वाक्यानि लोट्-लकारेण परिवर्तयत—**

यथा– बालिकाः नृत्यन्ति ...... बालिकाः नृत्यन्तु ......।

(क) बालकाः हसन्ति ..................................

(ख) युवां तत्र गच्छथः ..................................

(ग) यूयं धावथ ..................................

(घ) आवां लिखावः ..................................

(ङ) वयं पठामः ..................................

© NCERT not to be republished

## योग्यताविस्तरः

| | | |
|---|---|---|
| १. | वेदाः | – ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः। |
| २. | ब्राह्मणानि | – ऐतरेयः, शतपथः, सामविधानं, गोपथः, इत्यादयः। |
| ३. | उपनिषदः (प्रसिद्धाः) | – ईशः, केन, कठः, प्रश्नः, मुण्डकः, माण्डूक्यः, ऐतरेयः, तैत्तिरीयः, छान्दोग्यः, बृहदारण्यकः, इत्यादयः। |
| ४. | उपवेदाः | – आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थवेदः / स्थापत्यवेदः। |
| ५. | वेदोपाङ्गानि / षड्-दर्शनानि | – न्यायः, वैशेषिकं, साङ्ख्यं, योगः, पूर्व-मीमांसा, उत्तर-मीमांसा (वेदान्तः)। |
| ६. | वेदाङ्गानि | – शिक्षा, व्याकरणं, छन्दः, निरुक्तं, ज्योतिषं, कल्पः। |

### ऋग्वेदः —

ऋग्वेदे मन्त्राणां सङ्ख्या – दश सहस्राणि, पञ्च शतानि, द्विपञ्चाशत् च (१०,५५२) मन्त्राः सन्ति। अस्य ग्रन्थस्य विभजनं द्विधा भवति —

१. मण्डलक्रमः – (१० मण्डलानि, ८५ अनुवाकाः, १,०२८ सूक्तानि)

२. अष्टकक्रमः – (८ अष्टकाः, प्रत्यष्टकम् ८ अध्यायाः, आहत्य ६४ अध्यायाः)

**अस्य पाठस्य आधारः – ऋग्वेदस्य अन्तिमस्य दशम-मण्डलस्य, अन्तिमम् एकशताधिक-एकनवतितमं (१०. १९१) सूक्तम् अस्ति, यत् 'संज्ञान-सूक्तम्', 'संघटन-सूक्तम्' वेति नामभ्यां प्रसिद्धम् अस्ति।**

## परियोजनाकार्यम्

**१. अस्य सूक्तस्य भावार्थं मित्रैः सह मातृभाषया चर्चयत।**

**२. संज्ञानसूक्तम् इव ऋग्वेदस्य पञ्चानां सूक्तानां नामानि लिखत।**

**३. संज्ञानसूक्तस्य आधारेण भवत्सु एकतां स्थापयितुं विविधान् उपायान् अध्यापकैः सह आलोचयत।**

© NCERT not to be republished

0872CH02

## द्वितीयः पाठः

# अल्पानामपि वस्तूनां संहतिः कार्यसाधिका

कानिचन मित्राणि विद्यालयस्य ग्रीष्मावकाशे पुण्यक्षेत्रदर्शनाय देवभूमिम् उत्तराखण्डम् अगच्छन्। तदानीं वर्षारम्भकालः आसीत्। सर्वेऽपि गौरीकुण्डनामकं स्थानं प्राप्तवन्तः। यदा ते श्रीकेदारक्षेत्रम् आरोहन्तः आसन् तदा लक्ष्यप्राप्तेः पूर्वं वेगेन वृष्टिः आरब्धा। सहसा सर्वत्र अन्धकारः प्रसृतः। नद्याः तीव्रजलवेगेन सेतुः भग्नः। पर्वतस्खलनं सञ्जातम्। सर्वेऽपि उच्चस्वरेण अक्रन्दन् ईश्वरं प्रार्थयन्त च 'हे भगवन्! रक्ष अस्मान् रक्ष' इति। सर्वेषाम् अधैर्यं दृष्ट्वा नायकः सुधीरः सर्वान् सांत्वयन् प्रेरयन् च अवदत् –

**नायकः** – अयि भोः मित्राणि! अस्मिन् विपत्काले वयं धैर्यम् अवलम्ब्य कमपि उपायं चिन्तयामः।

**दिनेशः** – (सविषादम्) अरे भ्रातः! किं वदसि? अस्माकं मृत्युः एव सन्निकटे अस्ति। एवं चेत् कथम् उपायः चिन्तनीयः?

**नायकः** – मित्र! विषादं मा कुरु। यदा वृष्टिः शान्ता, वातावरणं च स्वच्छं भविष्यति तदा वयं सम्भूय सेतुं, मार्गं च निर्माय पुनः स्वलक्ष्यं प्रति गमिष्यामः।



© NCERT not to be republished



**सुरेशः** – एतस्यां स्थितौ वयं किमेतत् अत्यन्तं दुःसाध्यम्, असम्भवं च कार्यं कर्तुं शक्नुमः ?

**नायकः** – प्रियमित्राणि ! वयम् आत्मविश्वासबलेन इदम् असम्भवम् अपि कार्यं सम्भूय अवश्यं साधयितुं शक्नुमः। तेन अस्माकं लक्ष्यप्राप्तिः प्राणरक्षा चापि भविष्यति।

**कपिलः** – किम् इदं सम्भवति ?

**नायकः** – नूनं सम्भवति मित्र ! अस्मिन् प्रसङ्गे अहं हितोपदेशस्य एकां कथां श्रावयामि।

**सर्वेऽपि** – (उत्कण्ठया) का कथा ? वद मित्र ! वद।

**नायकः** – सावधानं शृण्वन्तु।

© NCERT not to be republished





अस्ति गोदावरीतीरे एको विशालः शाल्मलीतरुः। तत्र प्रतिदिनं दूरदेशात् पक्षिणः आगत्य निवसन्ति स्म। अथ कदाचित् तत्र कश्चिद् व्याधस्तण्डुलकणान् विकीर्य जालं विस्तीर्य च प्रच्छन्नो भूत्वा स्थितः। तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारः आकाशमार्गे गच्छति स्म। केचन कपोताः वनमध्ये तण्डुलकणान् अवलोक्य लोभाकृष्टाः अभवन्। ततो चित्रग्रीवः तण्डुलकणलुब्धान् कपोतान् अवदत् – "कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः तद् निरूप्यताम्। कश्चिद् व्याधोऽत्र भवेत्। सर्वथा अविचारितं कर्म न कर्तव्यम्।" एतद्वचनं श्रुत्वा कश्चित् कपोतः सदर्पम् अवदत् – "आः किमर्थम् एवमुच्यते?

**वृद्धानां वचनं ग्राह्यमापत्काले ह्युपस्थिते।**
**सर्वत्रैवं विचारे तु भोजनेऽप्यप्रवर्तनम्॥ १॥"**

तस्य वचनं श्रुत्वा चित्रग्रीवस्य च अवज्ञां कृत्वा सर्वे कपोताः भूमौ अवतीर्य तण्डुलकणान् भोक्तुं प्रवृत्ताः।

अनन्तरं ते सर्वे तेन जालेन बद्धाः अभवन्। ततो यस्य वचनात् कपोतास्तत्र बद्धास्तं सर्वे तिरस्कुर्वन्ति स्म।

इदं दृष्ट्वा चित्रग्रीवः अवदत् – "अयम् अस्य दोषो न। अनागतविपत्तिं को वा ज्ञातुं समर्थः। अतोऽस्मिन् विपत्काले अस्माभिः अस्य तिरस्कारम् अकृत्वा कश्चन उपायश्चिन्तनीयः। यतोहि विपत्काले विस्मयः एव कापुरुषलक्षणम्। सत्पुरुषाणां लक्षणं तु —

**विपदि धैर्यमथाभ्युदये क्षमा,**
**सदसि वाक्पटुता युधि विक्रमः।**
**यशसि चाभिरुचिर्व्यसनं श्रुतौ**
**प्रकृतिसिद्धमिदं हि महात्मनाम्॥ २॥"**



not to be republished © NCERT





अतोऽधुना अस्माभिः धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम्। प्रियमित्राणि ! लघूनाम् अपि वस्तूनां संहतिः कार्यसाधिका भवति इति नीतिवचनं लोकसिद्धम्। अतः अस्माभिः सर्वैः एकचित्तीभूय जालमादाय उड्डीयताम्।”
एवं विचार्य सर्वे पक्षिणः जालमादाय उत्पतिताः।



अनन्तरं स व्याधः सुदूरात् जालापहारकान् तान् अवलोक्य पश्चात् अधावत् परं तस्य दृष्टिपथात् दूरं गतेषु पक्षिषु स व्याधो निवृत्तः। अथ व्याधं निवृत्तं दृष्ट्वा कपोताः उक्तवन्तः – “स्वामिन् ! किमिदानीं कर्तुम् उचितम् ?” चित्रग्रीव उवाच – “प्रियकपोताः ! अस्माकं मित्रं हिरण्यको नाम मूषकराजः गण्डकीतीरे चित्रवने निवसति। सोऽस्माकं पाशान् दन्तबलेन छेत्स्यति।” एतत् आलोच्य सर्वे हिरण्यकस्य विवरसमीपं गताः। हिरण्यकश्च सर्वदा अनिष्टशङ्कया शतद्वारं विवरं कृत्वा निवसति। ततो हिरण्यकः कपोतानाम् अवपातभयात् चकितस्तूष्णीं स्थितः। चित्रग्रीव उवाच – “सखे हिरण्यक ! किम् अस्माभिः सह न सम्भाषसे ?” ततो हिरण्यकस्तद्वचनं प्रत्यभिज्ञाय आनन्देन त्वरया बहिः निःसृत्य अब्रवीत् – “आः ! पुण्यवान् अस्मि, मम प्रियसुहृत् चित्रग्रीवः समायातः।”



© NCERT not to be republished

पाशबद्धान् कपोतान् दृष्ट्वा सविस्मयं क्षणं स्थित्वा अवदत् – "सखे ! किमेतत् ?" चित्रग्रीवोऽवदत् – "सखे ! एतद् अस्माकं विचारहीनतायाः फलम् ।" तत् श्रुत्वा हिरण्यकः चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरम् उपसर्पति । तदा चित्रग्रीवोऽवदत् – "मित्र ! मा मा एवम् । पूर्वं मदाश्रितानाम् एतेषां पाशान् छिनत्तु, पश्चात् मम ।" एतदाकर्ण्य हिरण्यकः प्रहृष्टमनाः पुलकितः सन् अब्रवीत् – "साधु मित्र ! साधु । अनेन आश्रितवात्सल्येन त्वं त्रैलोक्यस्यापि स्वामित्वं प्राप्तुं योग्योऽसि ।" ततो हिरण्यकः स्वमित्रैः सह सर्वेषां कपोतानां बन्धनानि छिनत्ति स्म । सर्वे कपोताः पाशविमुक्ताः अभवन् । सहर्षं पुनः उड्डीय आकाशमार्गेण गच्छन्तः सर्वे कपोताः राजानं चित्रग्रीवं प्रशंसन्ति – "भवतः नीतिशिक्षया नायकधर्मेण च वयं सर्वे सुरक्षिताः । धन्याः वयम्" ।

कथां श्रावयित्वा नायकः सर्वान् सम्बोधयति – "मित्राणि ! आपद्ग्रस्ताः कपोताः बुद्धिबलेन संघटनसामर्थ्येन च आत्मसंरक्षणं कृतवन्तः । तर्हि किमर्थं वयं संघटिताः भूत्वा आत्मसंरक्षणं कर्तुं न शक्नुमः ?" नायकस्य प्रेरकवचनैः उत्साहिताः सर्वेऽपि भयं शोकं सन्देहं च विहाय सेतुनिर्माणकार्ये संलग्नाः जाताः । भगीरथप्रयत्नैः सेतुनिर्माणं कृत्वा तैः स्वीयप्राणाः अन्येषां च प्राणाः संरक्षिताः ।



© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| भग्नः | नष्टः | टूट गया | Broke Down | |
| अक्रन्दन् | रुदन्ति स्म | रोये | They cried | |
| सविषादम् | चिन्तापूर्वकम् | विषाद पूर्वक | with sadness | |
| सम्भूय | मिलित्वा | मिलकर | Together | |
| तरुः | वृक्षः | पेड़ | Tree | |
| व्याधः | लुब्धकः | व्याध | Hunter | |
| तण्डुलकणान् | तण्डुललवान् | चावल के दानों को | Rice grains | |
| विकीर्य | विकिरणं कृत्वा | बिखेर कर | Having scattered | |
| विस्तीर्य | विस्तृतं, विस्तरणं कृत्वा | फैलाकर | Having spread | |
| प्रच्छन्नः | गुप्तः | छिपा हुआ | Stood Secretly | |
| चित्रग्रीवनामा | चित्रग्रीवः नाम यस्य | चित्रग्रीव नाम का | Named Chitragriva | |
| प्रतीकारः | प्रतिविधानम् | उपाय | Remedy | |
| अविचारितम् | अचिन्तितम् | चिन्तन किये बिना | Not thought of | |
| अवतीर्य | अवतरणं कृत्वा (नीचैः आगत्य ) | उतर कर | Having descended | |
| अवलोक्य | दृष्ट्वा | देख कर | Having seen | |
| अप्रवर्तनम् | अप्रवृत्तिः | न लगना, प्रवृत्त न होना | No inclination | |
| प्रवृत्ताः | निरताः | लगे हुए | Engaged/ engrossed | |
| अवलम्ब्य | आश्रित्य | अश्रित होकर | Having depended on | |
| एकचित्तीभूय | एकमनसा | एक चित्त होकर | With united mind | |
| कापुरुषलक्षणम् | कुत्सितपुरुषाणां चिह्नम् | कायर पुरुषों का लक्षण | Signs of a coward | |

© NCERT not to be republished

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| तिरस्कुर्वन्ति | अनादरं कुर्वन्ति | तिरस्कार करते हैं | Reject | |
| विस्मयः | आश्चर्यम् | आश्चर्य | Amazement | |
| विक्रमः | अतिपराक्रमः | अत्यधिक शक्ति युक्त | Valour | |
| उत्पतिताः | उड्डयनं कृतवन्तः | उड़ गए | Flew away | |
| चिन्त्यताम् | चिन्तनीयः | चिन्तन करना चाहिए / सोचिए | Should be thought | |
| आलोच्य | विचार्य | अच्छी तरह विचार कर | Having analysed | |
| पाशान् | बन्धनानि | बन्धनों को | Captivity | |
| प्रत्यभिज्ञाय | ज्ञात्वा | जानकार, समझकर | Having recognized | |
| त्वरया | शीघ्रम् | शीघ्र | Hurriedly, Quickly | |
| निःसृत्य | निर्गत्य | निकल कर | Coming out | |
| मे | मम | मेरा | Mine | |
| छिनत्तु | छेदनं कुरु | काट दे | (you) Cut | |
| आकर्ण्य | श्रुत्वा | सुनकर | Having heard | |
| प्रहृष्टमनाः | आनन्दितमनाः | प्रसन्न मन वाला | Gleeful (person) | |
| पुलकितः | रोमाञ्चितः | प्रफुल्लित होकर | Excited | |
| सत्वरम् | त्वरया सह | अति शीघ्र | Quickly | |
| उपसर्पति | समीपम् आगच्छति | निकट आता है | Approaches near | |
| आश्रितवात्सल्येन | शरणम् आगतानां कृते स्नेहभावेन | शरण में आए हुए के प्रति प्रेम से | Affection towards people who have taken shelter | |
| आशङ्क्य | शङ्कां कृत्वा | शङ्का करके | Having doubted | |
| अवज्ञा | तिरस्कारः | निन्दा | Disrespect | |

© NCERT not to be republished

## अत्र इदम् अवधेयम्

### ल्यप्-प्रत्ययः

यत्र एकस्याः क्रियायाः समाप्तेः अनन्तरम् उत्तरक्रिया भवति तत्र पूर्वकालिके क्रियाव्यवहारे धातोः क्त्वाप्रत्ययः भवति। तत्रैव यदि धातोः पूर्वं किमपि उपसर्गादिपदं भवति तर्हि क्त्वा-प्रत्ययस्थाने ल्यप् भवति। ल्यप्-प्रत्यये य-मात्रम् अवशिष्यते। क्त्वा-ल्यप्-प्रत्ययान्तानि पदानि अव्ययानि भवन्ति। अस्य वाक्येषु प्रयोगः क्त्वा-प्रत्ययवत् भवति।

यथा – तण्डुलकणान् अवलोक्य (अव + लोक् + ल्यप् ) कपोतान् प्रति आह।
धैर्यम् अवलम्ब्य (अव + लम्ब् + ल्यप्) प्रतीकारः चिन्त्यताम्।

### विसर्गसन्धिः

- यत्र विसर्गात् परं चकारः अथवा छकारः भवति तत्र विसर्गस्य स्थाने शकारः भवति।

  यथा – कः + चित् = कश्चित्। प्रतीकारः + चिन्त्यताम् = प्रतीकारश्चिन्त्यताम्।
  देवदत्तः + छलेन = देवदत्तश्छलेन।

- यत्र विसर्गात् परं तकारः अथवा थकारः भवति तत्र विसर्गस्य स्थाने सकारः भवति।

  यथा – चकितः + तूष्णीम् = चकितस्तूष्णीम्। नीतिः + तावत् = नीतिस्तावत्।

- यदि विसर्गात् पूर्वम् अकारः परं च वर्गस्य तृतीयवर्णः, चतुर्थवर्णः, पञ्चमवर्णः तथा ह य व र ल इत्येतेषु कोऽपि वर्णः भवति तर्हि अकारस्य विसर्गस्य च (अः) स्थाने ओकारो भवति।

  यथा – हिरण्यकः + नाम = हिरण्यको नाम। ततः + हिरण्यकः = ततो हिरण्यकः।
  व्याधः + निवृत्तः = व्याधो निवृत्तः।

- यदि विसर्गात् पूर्वं पश्चात् च अकारः भवति तत्र पूर्वतनस्य अकारस्य स्थाने विसर्गस्य च (अः) स्थाने ओकारः भवति।

  यथा – कुतः + अत्र = कुतोऽत्र।
  हितः + अपि = हितोऽपि।
  सः + अस्माकं = सोऽस्माकम्।

© NCERT not to be republished

**अधः प्रदत्तानि ल्यप्-प्रत्ययान्तानि पदानि ध्यानेन पठत अवगच्छत च—**

| लट्-लकारक्रिया | प्रकृति-प्रत्ययविभागः | ल्यबन्तरूपम् | विवरणार्थः | ल्यप्प्रत्यय-पदघटितानि वाक्यानि |
|---|---|---|---|---|
| आगच्छति | आ + गम् + ल्यप् | आगत्य/आगम्य | आगमनं कृत्वा | छात्रः विद्यालयम् आगत्य संस्कृतं पठति। |
| आनयति | आ + नी + ल्यप् | आनीय | आनयनं कृत्वा | सः ग्रन्थालयात् ग्रन्थम् आनीय पठति। |
| उत्तिष्ठति | उत् + स्था + ल्यप् | उत्थाय | उत्थानं कृत्वा | सुरेशः प्रातः उत्थाय मातापितरौ नमति। |
| प्रणमति | प्र + नम् + ल्यप् | प्रणम्य/ प्रणत्य | प्रणामं कृत्वा | शिष्यः गुरुं प्रणम्य ग्रन्थं पठति। |
| उपकरोति | उप + कृ + ल्यप् | उपकृत्य | उपकारं कृत्वा | सज्जनः दुःखितजनान् उपकृत्य मोदते। |
| निर्दिशति | निर् + दिश् + ल्यप् | निर्दिश्य | निर्देशं कृत्वा | अध्यापकः चित्रं निर्दिश्य पाठयति। |
| निश्चिनोति | निस् + चि + ल्यप् | निश्चित्य | निश्चयं कृत्वा | छात्रः ध्येयं निश्चित्य अध्ययनं करोति। |
| विस्मरति | वि + स्मृ + ल्यप् | विस्मृत्य | विस्मरणं कृत्वा | अहं पुस्तकं विस्मृत्य आगतवान्। |
| परिष्करोति | परि + कृ + ल्यप् | परिष्कृत्य | परिष्कारं कृत्वा | छात्रः व्याकरणेन भाषां परिष्कृत्य वदति। |
| आरभते | आ + रभ् + ल्यप् | आरभ्य | आरम्भं कृत्वा | श्वः आरभ्य अहं योगासनानि करिष्यामि। |
| स्वीकरोति | स्वी + कृ + ल्यप् | स्वीकृत्य | स्वीकारं कृत्वा | माता वस्तूनि स्वीकृत्य आगच्छति। |
| विलिखति | वि + लिख् + ल्यप् | विलिख्य | लेखनं कृत्वा | शिक्षकः सुधाखण्डेन श्लोकं विलिख्य पाठयति। |
| प्रक्षालयति | प्र + क्षल (क्षालि) ल्यप् | प्रक्षाल्य | प्रक्षालनं कृत्वा | माता वस्त्रं प्रक्षाल्य आपणं गच्छति। |
| अपकरोति | अप + कृ + ल्यप् | अपकृत्य | अपकारं कृत्वा | दुर्जनः सज्जनम् अपकृत्य गच्छति। |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| अवलोकते | अव + लोक् + ल्यप् | अवलोक्य | अवलोकनं कृत्वा | कपोताः तण्डुलान् अवलोक्य आनन्दन्ति। |
| आशङ्कते | आ + शकि + ल्यप् | आशङ्क्य | आशङ्कां कृत्वा | मनुष्यः निन्दितकर्मणि पापम् आशङ्क्य सत्कर्म कुरुते। |
| विकिरति | वि + कृ + ल्यप् | विकीर्य | विकरणं कृत्वा | व्याधः तण्डुलकणान् विकीर्य जालं विस्तारयति। |
| अवतरति | अव + तृ + ल्यप् | अवतीर्य | अवतरणं कृत्वा | कपोताः भूमौ अवतीर्य तण्डुलान् भक्षयन्ति। |
| विस्तृणाति | वि + स्तृ + ल्यप् | विस्तीर्य | विस्तृतं कृत्वा | व्याधः जालं विस्तीर्य प्रच्छन्नो भूत्वा स्थितः। |
| अवलम्बते | अव + लम्ब् + ल्यप् | अवलम्ब्य | अवलम्बनं कृत्वा | मर्कटः वृक्षशाखाम् अवलम्ब्य शयनं करोति। |
| निर्माति | निर् + मा + ल्यप् | निर्माय | निर्माणं कृत्वा | भक्तः मन्दिरं निर्माय देवम् अर्चति। |

## अभ्यासात् जायते सिद्धिः

**१. अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत —**

(क) मित्राणि ग्रीष्मावकाशे कुत्र गच्छन्ति?
(ख) सर्वत्र कः प्रसृतः?
(ग) कः सर्वान् प्रेरयन् अवदत्?
(घ) कः हितोपदेशस्य कथां श्रावयति?
(ङ) कपोतराजस्य नाम किम्?
(च) व्याधः कान् विकीर्य जालं प्रसारितवान्?
(छ) विपत्काले विस्मयः कस्य लक्षणम्?
(ज) चित्रग्रीवस्य मित्रं हिरण्यकः कुत्र निवसति?
(झ) चित्रग्रीवः हिरण्यकं कथं सम्बोधयति?
(ञ) पूर्वं केषां पाशान् छिनत्तु इति चित्रग्रीवः वदति?

**२. पूर्णवाक्येन उत्तरं लिखत —**

(क) यदा केदारक्षेत्रम् आरोहन्तः आसन् किम् अभवत्? ..........................................
(ख) सर्वे उच्चस्वरेण किं प्रार्थयन्त? ..........................................
(ग) असम्भवं कार्यं कथं कर्तुं शक्यते इति नायकः उक्तवान्? ..........................................



© NCERT not to be republished

(घ) निर्जने वने तण्डुलकणान् दृष्ट्वा चित्रग्रीवः किं निरूपयति? ..........................

(ङ) किं नीतिवचनं प्रसिद्धम्? ..........................

(च) व्याधात् रक्षां प्राप्तुं चित्रग्रीवः कम् आदेशं दत्तवान्? ..........................

(छ) हिरण्यकः किमर्थं तूष्णीं स्थितः? ..........................

(ज) पुलकितः हिरण्यकः चित्रग्रीवं कथं प्रशंसति? ..........................

(झ) कपोताः कथं आत्मरक्षणं कृतवन्तः? ..........................

(ञ) नायकस्य प्रेरकवचनैः सर्वेऽपि किम् अकुर्वन्? ..........................

**३. अधोलिखितानि वाक्यानि पठित्वा ल्यप्-प्रत्ययान्तेषु परिवर्तयत—**

(क) छात्रः कक्षां प्रविशति। संस्कृतं पठति। ....छात्रः कक्षां प्रविश्य संस्कृतं पठति....।

(ख) भक्तः मन्दिरम् आगच्छति। पूजां करोति। ..........................

(ग) माता भोजनं निर्माति। पुत्राय ददाति। ..........................

(घ) सुरेशः प्रातः उत्तिष्ठति। देवं नमति। ..........................

(ङ) रमा पुस्तकं स्वीकरोति। विद्यालयं गच्छति। ..........................

(च) अहं गृहम् आगच्छामि। भोजनं करोमि। ..........................

(छ) तण्डुलकणान् विकिरति। जालं विस्तारयति। ..........................

(ज) व्याधः तण्डुलकणान् अवलोकते। भूमौ अवतरति। ..........................

**४. उदाहरणानुसारम् उपसर्गयोजनेन क्त्वा-स्थाने ल्यप्-प्रत्ययस्य प्रयोगं कृत्वा पदानि परिवर्तयत—**

सम्, आ, उप, उत्, वि, प्र

(क) छात्रः गृहं गत्वा भोजनं करोति। ....छात्रः गृहम् आगत्य (आ+गम्+ल्यप्) भोजनं करोति....।

(ख) माता वस्त्राणि क्षालयित्वा पचति। ..........................

(ग) शिक्षकः श्लोकं लिखित्वा पाठयति। ..........................

(घ) रमा स्थित्वा गीतं गायति। ..........................

(ङ) शिष्यः सर्वदा गुरुं नत्वा पठति। ..........................

(च) लेखकः आलोचनं कृत्वा लिखति। ..........................

© NCERT not to be republished

५. **पाठे प्रयुक्तेन उपयुक्तपदेन रिक्तस्थानं पूरयत —**

(क) सर्वैः एकचित्तीभूय .................................... उड्डीयताम्।

(ख) जालापहारकान् तान् .................................... पश्चाद् अधावत्।

(ग) अस्माकं मित्रं .................................... नाम मूषकराजः गण्डकीतीरे चित्रवने निवसति।

(घ) हिरण्यकः कपोतानाम् .................................... चकितस्तूष्णीं स्थितः।

(ङ) यतोहि विपत्काले .................................... एव कापुरुषलक्षणम्।

६. **पाठे प्रयुक्तेन ल्यप्प्रत्ययान्तपदेन सह उपयुक्तं पदं योजयत —**



| | |
|---|---|
| (क) विकीर्य | जालम् |
| (ख) विस्तीर्य | जालापहारकान् |
| (ग) अवतीर्य | उड्डीयताम् |
| (घ) अवलोक्य | तद्वचनम् |
| (ङ) एकचित्तीभूय | भूमौ |
| (च) प्रत्यभिज्ञाय | तण्डुलकणान् |

७. **समासयुक्तपदेन रिक्तस्थानं पूरयत —**

| | | | | | |
|---|---|---|---|---|---|
| (क) गण्डक्याः तीरम् | = | गण्डकीतीरम् | तस्मिन् | = | गण्डकीतीरे |
| (ख) तण्डुलानां कणाः | = | .................... | तान् | = | .................... |
| (ग) जालस्य अपहारकाः | = | .................... | तान् | = | .................... |
| (घ) अवपाताद् भयम् | = | .................... | तस्मात् | = | .................... |
| (ङ) कापुरुषाणां लक्षणम् | = | .................... | तस्मिन् | = | .................... |

८. **सार्थकपदं ज्ञात्वा सन्धिविच्छेदं कुरुत —**

(क) इत्याकर्ण्य = इति + आकर्ण्य।

(ख) चित्रग्रीवोऽवदत् = चित्रग्रीवः + अवदत्।

(ग) बालकोऽत्र = .................... + ....................

(घ) धैर्यमथाभ्युदये = .................... + .................... + ....................

(ङ) भोजनेऽप्यप्रवर्तनम् = .................... + .................... + ....................

© NCERT not to be republished

(च) नमस्ते = ............................ + ............................

(छ) उपायश्चिन्तनीयः = ............................ + ............................

(ज) व्याधस्तत्र = ............................ + ............................

(झ) हिरण्यकोऽप्याह = ............................ + ............................ + ............................

(ञ) मूषकराजो गण्डकीतीरे = ............................ + ............................ + ............................

(ट) अतस्त्वाम् = ............................ + ............................

(ठ) कश्चित् = ............................ + ............................

## योग्यताविस्तरः

### ग्रन्थपरिचयः

प्रस्तुतः पाठः हितोपदेशग्रन्थस्य मित्रलाभप्रकरणात् स्वीकृतः। अस्य ग्रन्थस्य लेखकः पण्डितः नारायणशर्मा अस्ति। अस्मिन् ग्रन्थे मूल्ययुक्तानां, नीतियुक्तानां च वचनानां, सुभाषितानां, कथानां च सङ्ग्रहः अस्ति। अतः अयं ग्रन्थः संस्कृतसाहित्ये अत्यन्तं समाद्रियते। अस्मिन् ग्रन्थे चत्वारि प्रकरणानि सन्ति – (१) मित्रलाभः (२) सुहृद्भेदः (३) विग्रहः (४) सन्धिः इति। अस्य अध्ययनेन छात्रः नीतिविद्यायां संस्कृतभाषायां च निपुणो भवति।

**अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।**
**तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः॥** *(हितोपदेशः १.३६)*

**पदच्छेदः** – अल्पानाम् अपि वस्तूनाम् संहतिः कार्य-साधिका। तृणैः गुणत्वम् आपन्नैः बध्यन्ते मत्त-दन्तिनः।

**अन्वयः** – अल्पानाम् अपि वस्तूनां संहतिः कार्य-साधिका। गुणत्वम् आपन्नैः तृणैः मत्त-दन्तिनः बध्यन्ते।

**भावार्थः** – स्वल्पानां, निर्बलानामपि वस्तूनां संहतिः अर्थात् सङ्घः, समुदायः लक्ष्यसिद्धौ सहायिका भवति। यथा – घाससमूहेन निर्मितरज्जुद्वारा गजेन्द्रा अपि बद्धाः भवन्ति।

**विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः।**
**यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम्॥** *(हितोपदेशः १.३२)*

**पदच्छेदः –** विपदि धैर्यम् अथ अभ्युदये क्षमा सदसि वाक्-पटुता युधि विक्रमः। यशसि च अभिरुचिः व्यसनम् श्रुतौ प्रकृति-सिद्धम् इदम् हि महात्मनाम्।

**अन्वयः –** अथ विपदि धैर्यम्, अभ्युदये क्षमा, सदसि वाक्-पटुता, युधि विक्रमः, यशसि अभिरुचिः, श्रुतौ व्यसनं च इदं हि महात्मनां प्रकृति-सिद्धं भवति।

**भावार्थः –** महापुरुषाणाम् एतत् आचरणं स्वभावसिद्धमेव भवति। यत्किमपि भवेत् ते विपत्काले धैर्यमवलम्ब्य समस्यापरिहारविषये प्रयत्नं कुर्वन्ति। सम्पत्तौ उन्नतौ च ते सर्वान् उपकुर्वन्ति। सभायां ते कौशलेन भाषणं कुर्वन्ति। युद्धे ते पराक्रमं शौर्यं च दर्शयन्ति। यशोविषये ते अभिरुचिं प्रदर्शयन्ति। शास्त्रविषये च ते अनुरागं प्रकटयन्ति।

## परियोजनाकार्यम्

**१. पाठात् अधोलिखितानां क्रियापदानां प्रयोगकौशलं ज्ञात्वा तत्समानानि अन्यानि वाक्यानि रचयत—**

तिरस्कुर्वन्ति, क्रियताम्, निवसति, आह, छेत्स्यति, सम्भाषसे, अब्रवीत्, उपसर्पति, युज्यते

यथा – तिरस्कुर्वन्ति – दुर्जनाः सज्जनं तिरस्कुर्वन्ति ।

(क) ................................................................

(ख) ................................................................

(ग) ................................................................

(घ) ................................................................

(ङ) ................................................................

(च) ................................................................

(छ) ................................................................

(ज) ................................................................

**२. अनया कथया वयं स्वजीवने कां शिक्षां स्वीकर्तुं शक्नुमः इति अधिकृत्य कक्षायां परिचर्चां कुर्वन्तु।**

© NCERT not to be republished

## तृतीयः पाठः

# सुभाषितरसं पीत्वा जीवनं सफलं कुरु

0872CH03




© NCERT not to be republished

**गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे।**
**स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात्॥ १॥**

**पदच्छेदः** – गायन्ति देवाः किल गीतकानि धन्याः तु ते भारतभूमिभागे स्वर्गापवर्गास्पद-मार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात्।

**अन्वयः** – भारतभूमिभागे (ये) भवन्ति ते धन्याः इति देवाः गीतकानि गायन्ति किल। स्वर्गापवर्गास्पद-मार्गभूते (भारतभूमिभागे) तु (देवाः) सुरत्वात् भूयः पुरुषाः (भवन्ति)।

**भावार्थः** – ये मानवाः अस्यां भारतभूमौ जन्म प्राप्नुवन्ति ते धन्याः इति भारतभूमेः गुणगानं देवाः कुर्वन्ति। अतः वयं सर्वे भारतीयाः भाग्यशालिनः स्मः। धर्म-अर्थ-काम-मोक्षादिप्राप्तये मार्गभूते अस्मिन् भूखण्डे देवाः अपि देवत्वं विहाय मनुष्यरूपेण जन्मग्रहणार्थम् अभिलषन्ति।

**गुणी गुणं वेत्ति न वेत्ति निर्गुणः बली बलं वेत्ति न वेत्ति निर्बलः।**
**पिको वसन्तस्य गुणं न वायसः करी च सिंहस्य बलं न मूषकः॥ २॥**



**पदच्छेदः** – गुणी गुणम् वेत्ति न वेत्ति निर्गुणः बली बलम् वेत्ति न वेत्ति निर्बलः पिकः वसन्तस्य गुणम् न वायसः करी च सिंहस्य बलम् न मूषकः।

**अन्वयः** – गुणी गुणं वेत्ति। निर्गुणः (गुणं) न वेत्ति। बली बलं वेत्ति, निर्बलः (बलं) न वेत्ति। पिकः वसन्तस्य गुणं (वेत्ति) वायसः (वसन्तस्य गुणं) न (वेत्ति )। करी च सिंहस्य बलं (वेत्ति)। मूषकः (सिंहस्य बलं) न वेत्ति।

**भावार्थः** – गुणवान् जनः अन्येषां सद्गुणान् ज्ञातुं शक्नोति। परन्तु गुणहीनः जनः अपरेषां सुगुणान् अवगन्तुं समर्थः न भवति। बलवान् जनः यथा अन्येषां





© NCERT not to be republished

बलं ज्ञातुं शक्नोति तथा बलरहितः जनः अन्येषां बलं ज्ञातुं न शक्नोति। वसन्तकाले आगते पिकः वसन्तस्य गुणानुरूपं कुहुतानं करोति। परन्तु काकः मधुरं गातुं न शक्नोति। गजः पशुराजसिंहस्य बलं जानाति किन्तु मूषकः तस्य बलं ज्ञातुं न पारयति। अतः योग्यः एव महत्त्वं ज्ञातुं समर्थो भवति, न अयोग्यः।

**भवन्ति नम्रास्तरवः फलोद्गमैः नवाम्बुभिर्दूरविलम्बिनो घनाः।**
**अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्॥ ३॥**

**पदच्छेदः** – भवन्ति नम्राः तरवः फलोद्गमैः नवाम्बुभिः दूरविलम्बिनः घनाः अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एव एषः परोपकारिणाम्।

**अन्वयः** – तरवः फलोद्गमैः नम्राः भवन्ति। घनाः नवाम्बुभिः दूरविलम्बिनः (भवन्ति)। सत्पुरुषाः समृद्धिभिः अनुद्धताः (भवन्ति)। परोपकारिणाम् एष एव स्वभावः(भवति)।

**भावार्थः** – समयानुसारं वृक्षेषु फलानि जायन्ते। फलभारेण ते वृक्षाः नम्राः भवन्ति। तथैव नवजलैः परिपूर्णाः मेघाः अवनताः भवन्ति, भूमिं प्रति आयान्ति वृष्टिं च कुर्वन्ति। अस्मिन्



© NCERT not to be republished

संसारे बहवः परोपकारिणः जनाः सन्ति। स्वसमृद्धिकाले ते औद्धत्यं न प्रकटयन्ति। ते सहृदयाः विनम्राः च सन्तः सदैव परोपकाराय यत्नशीलाः भवन्ति। ते परोपकारं व्रतरूपेण धारयन्ति। उक्तं च व्यासमहर्षिणा – परोपकारः पुण्याय पापाय परपीडनम्।

**यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः।**
**तथा चतुर्भिः पुरुषः परीक्ष्यते कुलेन शीलेन गुणेन कर्मणा॥ ४॥**

**पदच्छेदः** – यथा चतुर्भिः कनकम् परीक्ष्यते निघर्षण-च्छेदन-ताप-ताडनैः तथा चतुर्भिः पुरुषः परीक्ष्यते कुलेन शीलेन गुणेन कर्मणा।

**अन्वयः** – यथा निघर्षण-छेदन-ताप-ताडनैः चतुर्भिः (उपायैः) कनकं परीक्ष्यते। तथा कुलेन शीलेन गुणेन कर्मणा (च) चतुर्भिः पुरुषः परीक्ष्यते।

**भावार्थः** – स्वर्णकारः सुवर्णस्य शुद्धताम् आकलयितुम् आदौ निकषप्रस्तरे निघर्षणं करोति, तदनन्तरं तस्य सुवर्णस्य कर्तनं करोति, ततः अग्निना दाहयति, अन्ते सुवर्णखण्डे प्रहारं करोति। एभिः चतुर्भिः प्रकारैः परीक्ष्य सुवर्णस्य पूर्णशुद्धतां ज्ञातुं शक्नोति। तथैव पुरुषः अपि चतुर्भिः उपायैः परीक्षणीयः। यथा – कस्मिन् परिवारे अयं जनः जन्म अलभत? तस्य स्वभावः कीदृशः अस्ति? सः कीदृशैः गुणैः युक्तः अस्ति? पुनः सः केन कर्मणा सर्वत्र समादृतः भवति? इति। एषु निकषेषु परीक्ष्य एव तस्य व्यक्तित्वं ज्ञातुं शक्यते।



© NCERT not to be republished

**अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दमः श्रुतं च।**
**पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च॥ ५॥**

**पदच्छेदः** – अष्टौ गुणाः पुरुषम् दीपयन्ति प्रज्ञा च कौल्यम् च दमः श्रुतम् च। पराक्रमः च अबहुभाषिता च दानम् यथाशक्ति कृतज्ञता च।

**अन्वयः** – प्रज्ञा कौल्यं दमः श्रुतं पराक्रमः अबहुभाषिता च यथाशक्ति दानं कृतज्ञता च (इत्येते) अष्टौ गुणाः पुरुषं दीपयन्ति।

**भावार्थः** – अष्टभिः गुणैः युक्तः मानवः सर्वदा समाजे सम्मानं प्राप्नोति। विशेषज्ञानं, कुलीनता, संयमः, वेदादीनां शास्त्राणां ज्ञानं, पराक्रमः, अल्पभाषिता, सामर्थ्यानुसारं दानशीलता, कृतज्ञता च इति एते अष्टौ गुणाः सन्ति। मानवः उत्तमगुणान् आश्रित्य सम्मानितः भवति। अतः उक्तम् – **गुणवान् पूज्यते नरः**।

**न सा सभा यत्र न सन्ति वृद्धाः वृद्धा न ते ये न वदन्ति धर्मम्।**
**धर्मः स नो यत्र न सत्यमस्ति सत्यं न तद्यच्छलमभ्युपैति॥ ६॥**



**पदच्छेदः** – न सा सभा यत्र न सन्ति वृद्धाः वृद्धाः न ते ये न वदन्ति धर्मम् धर्मः सः नो यत्र न सत्यम् अस्ति सत्यम् न तद् यद् छलम् अभ्युपैति।

**अन्वयः** – सा सभा न (अस्ति), यत्र वृद्धाः न सन्ति। ते वृद्धाः न (सन्ति), ये धर्मं न वदन्ति। सः धर्मः न उ (अस्ति), यत्र सत्यं न अस्ति। तत् सत्यं न (अस्ति), यत् छलम् अभ्युपैति।

**भावार्थः** – अस्मिन् संसारे विविधाः सभाः भवन्ति। सभासु जनसमागमः भवति। बहुभाषणं प्रचलति। तेन साफल्यं न भवति। वस्तुतः सा एव सभा सफला भवति यत्र वयोवृद्धाः ज्ञानवृद्धाः च जनाः भवेयुः। पुनरपि ते ज्ञानवृद्धाः धर्मविषये वदेयुः। धर्मसम्बद्धायां चर्चायां सत्यम् एव वक्तव्यं यत् सत्यं तथ्ययुक्तं भवेत् न तु छलनायुक्तम् इति।

**दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत्।**
**उष्णो दहति चाङ्गारः शीतः कृष्णायते करम्॥ ७॥**





**पदच्छेदः** – दुर्जनेन समम् सख्यम् प्रीतिम् च अपि न कारयेत् उष्णः दहति च अङ्गारः शीतः कृष्णायते करम्।

**अन्वयः** – दुर्जनेन समं सख्यं प्रीतिं च अपि न कारयेत्। उष्णः अङ्गारः दहति शीतः च करं कृष्णायते।

**भावार्थः** – दुर्जनेन सह मैत्री न करणीया। यतो हि दुर्जनः विश्वासयोग्यः न भवति। दुर्जनेन सह बन्धुता प्रीतिः न करणीया। यतः तस्य दुर्जनस्य मुखे माधुर्यं परं हृदये कपटता भवति। अङ्गारः उष्णः भवति चेत् तापेन करं ज्वालयति। पुनः यदि सः अङ्गारः शीतलः अस्ति तदापि हस्तं मलिनं करोति। तथैव दुर्जनः सर्वदा एव अनिष्टं करोति कारयति च। अतः विद्यया अलङ्कृतोऽपि दुर्जनः परिहर्तव्यः।

**यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत्।**
**एवं पुरुषकारेण विना दैवं न सिध्यति॥ ८॥**





**पदच्छेदः** – यथा हि एकेन चक्रेण न रथस्य गतिः भवेत् एवम् पुरुषकारेण विना दैवम् न सिध्यति।

**अन्वयः** – यथा हि एकेन चक्रेण रथस्य गतिः न भवेत् एवं पुरुषकारेण विना दैवं न सिध्यति।

**भावार्थः** – रथस्य गतिः चक्रद्वयेन एव सम्यक् भवति। एकेन चक्रेण रथस्य गमनं न सम्भवेत्। रथस्य गतिः स्थगिता स्यात्। पुरुषार्थेन विना फलं न सिध्यति। भाग्ये स्थितेऽपि उद्योगेन एव फलं लभ्यते। अत्र अनुभूयते यत् प्रयत्नः भाग्यं च मानवरथस्य द्वे चक्रे स्तः। उक्तम् अपि – उद्यमेन हि
सिध्यन्ति कार्याणि न मनोरथैः।

© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| शृङ्खलितम् | अनुशासितम् | अनुशासित | Disciplined | |
| गायन्ति | गानं कुर्वन्ति | गाते हैं | Sing | |
| किल | निश्चयेन | निश्चय से | With determination | |
| धन्याः | प्रशंसिताः | प्रशंसनीय | Praiseworthy | |
| अपवर्गः | निर्वाणम् | मोक्ष | Liberation | |
| भूयः | पुनः पुनः | बार-बार | Over and over again | |
| सुरत्वात् | देवत्वात् | देवत्व से | From divinity | |
| वेत्ति | जानाति | जानता है | Knows | |
| निर्गुणः | गुणहीनः | गुण रहित | Without virtue | |
| बली | बलवान् | बलशाली | Powerful | |
| निर्बलः | बलरहितः | बलहीन | Weak | |
| पिकः | कोकिलः | कोयल | Cuckoo | |
| वायसः | काकः | कौआ | Crow | |
| करी | गजः | हाथी | Elephant | |
| नम्राः | अवनताः | झुके हुए | Bent | |
| तरवः | पादपाः | वृक्ष | Trees | |
| फलोद्गमैः | फलभारैः | फलों के भार से | With weight of fruits | |
| अम्बुभिः | जलैः | जल से भरे हुए | Filled with water | |
| दूरविलम्बिनः | दूरात् अधः अवनताः | दूर से नीचे झुके हुए | Come down from above | |
| घनाः | मेघाः | बादल | Clouds | |
| अनुद्धताः | गर्वशून्याः | अभिमान से रहित | Polite | |
| सत्पुरुषाः | सज्जनाः | अच्छे लोग | Good people | |
| समृद्धिभिः | प्रचुरैः धनैः | बहुत धन से | With abundance of wealth | |
| कनकम् | सुवर्णम् | सोना | Gold | |
| परीक्ष्यते | परीक्षितं भवति | उसकी परीक्षा की जाती है | Is tested | |

© NCERT not to be republished



## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| निघर्षणम् | घर्षणम् | घिसना | Rubbing | |
| छेदनम् | कर्तनम् | काटना | Cutting | |
| ताडनैः | प्रहारैः | प्रहार के द्वारा | By hitting | |
| कुलेन | वंशेन | कुल से | By the family | |
| शीलेन | स्वभावेन | स्वभाव से | By nature | |
| कर्मणा | कार्येण | कार्य से | By work | |
| दीपयन्ति | प्रकाशयन्ति | प्रकाशित करते हैं | Illuminate | |
| प्रज्ञा | विशेषज्ञानम् | विशिष्ट बुद्धि | Extra-ordinary intelligence | |
| कौल्यम् | कुलीनता | अच्छे कुल में जन्म | Birth in a good family | |
| दमः | इन्द्रियसंयमः | इन्द्रियों का संयम | Control over senses | |
| श्रुतम् | शास्त्रज्ञानम् | शास्त्रों का ज्ञान | Knowledge of scriptures | |
| पराक्रमः | साहसः | वीरता | Bravery | |
| अबहुभाषिता | मितभाषिता | कम और सार्थक बोलना | Speaking less but meaningfully | |
| छलम् | कपटता | छलना | Cheating | |
| अभ्युपैति | प्राप्नोति | प्राप्त करता है | Associates | |
| दुर्जनेन | दुष्टजनेन | दुष्ट व्यक्ति से | With wicked people | |
| समम् | सह | साथ | With | |
| सख्यम् | मैत्री | मित्रता | Friendship | |
| दहति | ज्वलयति | जलाता है | Burns | |
| अङ्गारः | दग्धकाष्ठः | अङ्गारा | Charcoal | |
| कृष्णायते | मलिनं करोति | काला करता है | Blackens | |
| दैवम् | भाग्यम् | भाग्य | Luck | |
| सिध्यति | सिद्धं भवति | फलता है | Fruitifies | |

© NCERT not to be republished



### अत्र इदम् अवधेयम्

संस्कृतश्लोकेषु प्रतिपद्यं पादचतुष्टयम् अस्ति। छन्दोबद्ध-सस्वरगानशैली अपि अस्ति। श्लोकेषु सन्धिसमासयुक्तपदानि भवन्ति। यथा —

नम्रास्तरवः = नम्राः + तरवः।

अभ्युपैति = अभि + उप + एति।

अनुद्धताः = न उद्धताः (नञ् तत्पुरुषसमासः)।

यथाशक्ति = शक्तिम् अनतिक्रम्य (अव्ययीभावः)।

## अभ्यासात् जायते सिद्धिः

**१. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत—**

(क) गीतानि के गायन्ति? ........................................

(ख) कः बलं न वेत्ति? ........................................

(ग) कः वसन्तस्य गुणं वेत्ति? ........................................

(घ) मूषकः कस्य बलं न वेत्ति? ........................................

(ङ) फलोद्गमैः के नम्राः भवन्ति? ........................................

(च) केन समं सख्यं न करणीयम्? ........................................

(छ) केन विना दैवं न सिध्यति? ........................................

**२. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत—**

(क) तरवः कदा नम्राः भवन्ति? ........................................

(ख) समृद्धिभिः के अनुद्धताः भवन्ति? ........................................

(ग) सत्पुरुषाणां स्वभावः कीदृशः भवति? ........................................

© NCERT not to be republished

(घ) सत्यम् कदा सत्यम् न भवति? ..................................................

(ङ) दैवं कदा न सिध्यति? ..................................................

### ३. स्तम्भयोः मेलनं कुरुत—

| (अ) उक्तिः | (आ) भावार्थः |
|---|---|
| गायन्ति देवाः किल गीतकानि | सत्पुरुषाणां स्वाभाविकी नम्रता |
| गुणी गुणं वेत्ति | सुवर्णं चतुर्भिः प्रकारैः परीक्ष्यते |
| भवन्ति नम्राः तरवः फलोद्गमैः | भारतभूमेः माहात्म्यवर्णनम् |
| यथा चतुर्भिः कनकं परीक्ष्यते | सज्जनः एव गुणानां मर्मज्ञः |
| अष्टौ गुणाः पुरुषं दीपयन्ति | प्रज्ञा, दमः, दानं, कृतज्ञता इत्यादयः |
| दुर्जनेन समं सख्यं न कारयेत् | केवलं दैवं प्रयत्नं विना असिद्धम् |
| एकेन चक्रेण न रथस्य गतिः | दुष्टसङ्गः उष्णाङ्गारसदृशः |

### ४. अधः प्रदत्तमञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत—

फलोद्गमैः, गुणं, कृतज्ञता, सिध्यति, श्रुतम्, शीलेन

(क) गुणी .................................................. वेत्ति न वेत्ति निर्गुणः।

(ख) भवन्ति नम्राः तरवः ..................................................।

(ग) पुरुषः परीक्ष्यते कुलेन, .................................................., गुणेन, कर्मणा।

(घ) गुणाः पुरुषं दीपयन्ति – प्रज्ञा, कौल्यं, दमः, ..................................................।

(ङ) दानं यथाशक्ति .................................................. च।

(च) एवं पुरुषकारेण विना दैवं न .................................................. ।

© NCERT not to be republished

## ५. समुचितं विकल्पं चिनुत—

(क) "गायन्ति देवाः किल गीतकानि" – इत्यस्य श्लोकस्य मुख्यविषयः कः?

(i) वसन्तस्य सौन्दर्यम् (ii) भारतभूमेः गौरवम्

(iii) कर्मणां फलम् (iv) दानस्य प्रभावः

उत्तरम् ..............................................................................................................

(ख) "गुणी गुणं वेत्ति" – इत्यत्र कः गुणं न जानाति?

(i) गुणी (ii) निर्गुणः

(iii) पिकः (iv) बली

उत्तरम् ..............................................................................................................

(ग) "पिको वसन्तस्य गुणं न वायसः" – इत्यस्य तात्पर्यं किम्?

(i) पिकः मधुरं गायति न वायसः (ii) सुजन एव गुणं जानाति

(iii) वायसः अपि सरसं गानं करोति (iv) वसन्तः निर्गुणः अस्ति

उत्तरम् ..............................................................................................................

(घ) "भवन्ति नम्राः तरवः फलोद्गमैः" – इत्यस्य अर्थः कः?

(i) वृक्षाणां कठोरता (ii) सत्पुरुषाणाम् उन्नतिः

(iii) फलयुक्ताः वृक्षाः नम्राः भवन्ति (iv) परोपकारिणां दुर्बलता

उत्तरम् ..............................................................................................................

(ङ) "न सा सभा यत्र न सन्ति वृद्धाः" – इत्यत्र सभायाः महत्त्वं किम्?

(i) सभा मनोरञ्जनाय भवति

(ii) सभा धनसम्पत्तिं प्रदातुं शक्नोति

(iii) धर्मोपदेशाय ज्ञानवृद्धाः जनाः आवश्यकाः

(iv) सभा केवलं राजकार्यार्थं भवति

उत्तरम् ..............................................................................................................

© NCERT not to be republished

(च) दुर्जनेन सह सख्यं किमर्थं न कार्यम्?

(i) सः मित्रं भवति (ii) सः धनं ददाति

(iii) सः शिक्षां ददाति (iv) सः उष्णाङ्गारवद् हानिकरः भवति

उत्तरम् ..............................................................................................

## योग्यताविस्तरः

- विष्णुपुराणम् – प्रसिद्धेषु अष्टादशसु पुराणेषु विष्णुपुराणम् अन्यतमम्। अस्मिन् पुराणे प्रायेण सप्तसहस्राधिकश्लोकाः सन्ति। अत्र भगवतः विष्णोः तस्य च अवताराणां विषये वर्णितम्। भारतवर्षस्य गौरवविषये विष्णुपुराणम् अतीव प्रामाणिकं तथ्यं प्रकाशयति।
- महाभारतम् – संस्कृतसाहित्ये महाभारतम् इति इतिहासग्रन्थः पञ्चमवेदरूपेण स्वीकृतः। अस्मिन् ग्रन्थे लक्षाधिकाः श्लोकाः सन्ति। अतः शतसाहस्रीसंहिता इति अस्य अपरं नाम। महाभारते अष्टादश पर्वाणि सन्ति।
- भर्तृहरिः – भर्तृहरिः संस्कृतकाव्यवाङ्मये महान् कविः अस्ति। नीतिशास्त्रविशारदस्य तस्य कृतयः नीतिशतकं शृङ्गारशतकं वैराग्यशतकं चेति भारतीयज्ञानपरम्परां पोषयन्ति।
- हितोपदेशः – पण्डितनारायणेन हितोपदेशः कथाग्रन्थः सङ्कलितः। ग्रन्थेऽस्मिन् विविधाः कथाः नीतिश्लोकाः च सन्ति। हितोपदेशः चतुर्धा विभक्तः – मित्रलाभः, सुहृद्भेदः, विग्रहः, सन्धिः।
- चाणक्यनीतिः – चाणक्यस्य नीतिश्लोकाः माणिक्यसदृशाः सन्ति। बालानां चरित्रनिर्माणाय आदर्शमानवजीवनप्रतिष्ठार्थं च आचार्यस्य चाणक्यस्य नीत्युपदेशाः अत्यन्तम् उपयोगिनः सन्ति।

## परियोजनाकार्यम्

**१. अन्तर्जालात् पुस्तकेभ्यश्च विंशतिसुभाषितानां सङ्ग्रहं कुरुत।**

**२. किमपि नीतिवाक्यम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत।**

**३. पाठे आगतानि सुभाषितानि कण्ठस्थीकृत्य कक्षायां श्रावयत।**

© NCERT not to be republished

चतुर्थः पाठः

# प्रणम्यो देशभक्तोऽयं गोपबन्धुर्महामनाः

0872CH04

(एकदा जलप्लावपीडितानां साहाय्यार्थं शिक्षकाः छात्राश्च सभागारे चर्चां कुर्वन्ति।)







© NCERT not to be republished


सत्यम्, अशोक ! ते सर्वे अतिदुःखेन जीवन्ति। अस्माभिः एतादृशानां दुःखितानां सहायता करणीया। यथा उत्कलमणिः गोपबन्धुः जलप्लावपीडितानाम् अकुण्ठं सेवां कृत्वा अद्यापि जनमानसेषु समादृतोऽस्ति।
महोदय ! एषः गोपबन्धुः कः ?


भवन्तः सर्वे एतत् चित्रं पश्यन्तु। एषः अस्ति दीनबन्धुः गोपबन्धुः। सम्प्रति वयं तस्य विषये जानीमः।



एकदा आचार्यहरिहरदासः सत्यवादि-वनविद्यालयस्य सर्वान् अध्यापकान् भोजनाय आमन्त्रितवान्। आमन्त्रिताः सर्वे अतिथयः हस्तपादं क्षालयित्वा आसनेषु उपविष्टवन्तः। बहूनि सुस्वादूनि व्यञ्जनानि कदलीपत्रेषु परिवेषितानि। हसन् गोपबन्धुरवदत् – अरे !

**भोजनस्यातिदौर्लभ्यं जीवनाय सुखप्रदम्।**
**तदर्थं भोजनं कुर्याः मा शरीरे दयां कुरु ॥**

एतच्छ्रुत्वा सर्वे उच्चैः हसितवन्तः। तदानीमेव बहिः कश्चन करुणध्वनिः गोपबन्धोः कर्णयोः अगुञ्जत् –

"मातः, मातः ! बुभुक्षितोऽस्मि, कृपया किञ्चित् भोजनं देहि। दिनत्रयात् किमपि न भुक्तम्। भोजनं देहि मातः ! भोजनं देहि। आँ आँ . . ." इति क्रन्दनध्वनिं श्रुत्वैव दयाविगलितहृदयः गोपबन्धुः अश्रुपूर्णनयनोऽभवत्। किमपि अविचिन्त्य झटिति स्वस्मै परिवेषितं भोजनं हस्ते गृहीत्वा बहिरागतवान्। भिक्षुकञ्च तद्भोजितवान्।



© NCERT not to be republished

असौ महान् समाजसेवकः आसीत् गोपबन्धुदासः। असौ सत्यवादि-वनविद्यालयस्य अध्यापकः, प्रसिद्धेषु पञ्चमित्रेषु अन्यतमः स्वतन्त्रतासङ्ग्रामी चासीत्। ओडिशाराज्यस्य पुरीजनपदस्य साक्षीगोपालसमीपे सुआण्डो-ग्रामे जन्म लब्धवान्। अध्ययनकालादेव स दरिद्राणां रोगिणां च सेवामकरोत्। सत्यवादि-वनविद्यालये स छात्रान् निःशुल्कम् अपाठयत्। निरक्षरतादूरीकरणाय सः सततं यतते स्म। कार्पासवस्त्रनिर्माणाय सः स्वयमेव सूत्रप्रस्तुतिमकरोत्। जन्मभूमेः दुर्दशामवलोक्य स सर्वदा चिन्ताकुलो भवति स्म। महात्मगान्धेः प्रेरणया भारतीयस्वतन्त्रतान्दोलने गोपबन्धुः भागं गृहीतवान्। सः वर्षद्वयं यावत् कारावासं प्राप्तवान्।

कारागारे निवसन् सः 'बन्दीर आत्मकथा', 'कारा-कविता', 'धर्मपद', 'गो-माहात्म्य', 'नचिकेता-उपाख्यान' इत्यादीनि बहुप्रेरणादायीनि पुस्तकानि ओडिआभाषया विरचितवान्। सर्वदा स्वदेशस्यैव वस्त्राणां वस्तूनां च उपयोगं कृतवान्। मरणासन्नं स्वपुत्रमपि विहाय जलप्लावपीडितान् भारतमातुः सहस्रशः पुत्रान् उद्धर्तुं गृहात् बहिः निर्गतः समाजमसेवत च। देशसेवातत्परस्य गोपबन्धुवर्यस्य प्रसिद्धं प्रेरणादायकं वचनमधुनापि जनमानसेषु राष्ट्रभक्तिं जागरयति।



© NCERT not to be republished



स्वदेशभूमौ मम लीयतां तनुः,
स्वदेशलोकास्तदनु प्रयान्तु नु।
स्वराज्यमार्गे यदि गर्तमालिका,
ममास्थिमांसैः परिपूरितास्तु सा॥




मिशु मोर देह ए देश माटिरे,
देशवासी चालि जाआन्तु पिठिरे,
देशर स्वराज्य पथे जेते गाड,
पुरु तहिँ पडि मोर मांस हाड॥

**भावार्थः —**

स्वदेशस्य भूमिभागे मम शरीरं विलीनं भवतु।
देशवासिनः मम अनुसरणं कुर्वन्तु।
देशस्य स्वतन्त्रतानिमित्तं यत्र यत्र प्रतिबन्धकाः गर्ताः सन्ति,
ते सर्वे गर्ताः मम अस्थिभिः मांसैश्च परिपूर्णाः भवन्तु।

असौ सत्यवादि-वनविद्यालयस्य, दरिद्रनारायणसेवा-सङ्घस्य, सत्यवादि-मुद्रणालयस्य, समाजः इति दैनिक-वार्तापत्रस्य च प्रतिष्ठाता आसीत्। समाजः इति दिनपत्रिका शताधिकवर्षेभ्यः अधुनापि प्रतिदिनं प्रकाश्यते। समाजसेवायै देशसेवायै च तस्य असीमं त्यागमनुभवन् वैज्ञानिकः आचार्यः प्रफुल्लचन्द्ररायः गोपबन्धुम् उत्कलमणिः इति उपाधिना सम्मानितवान्।

उत्कलमणिरित्याख्यः प्रसिद्धो लोकसेवकः।
प्रणम्यो देशभक्तोऽयं गोपबन्धुर्महामनाः॥



© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| जलप्लाव-पीडितानाम् | नद्यां बहुजलप्रवाहेण धनजीवनक्षति-ग्रस्तानाम् | बाढ़ पीड़ितों का | Of flood victims | |
| नष्टानि | क्षतिग्रस्तानि | नष्ट हुए | Destroyed | |
| अनाहारेण | आहारेण विना | भोजन न करने से | By abstaining from food | |
| नदीस्रोतसा | नदीजलप्रवाहेण | नदी के प्रवाह से | By River currents | |
| अकुण्ठम् | कुण्ठं विना / साग्रहम् | आग्रहपूर्वक | Generously | |
| समादृतः | आदरप्राप्तः | सम्मानित | Honored | |
| सुस्वादूनि व्यञ्जनानि | रुचिकराणि सूपशाकादीनि | स्वादिष्ट भोजन | Delicious food | |
| दौर्लभ्यम् | कष्टेन लभ्यम् | कष्ट से प्राप्त किया गया | Difficulty in being obtained | |
| निःशुल्कम् | धनं विना | निःशुल्क | Without any fees | |
| करुणध्वनिः | विकलस्वरः | करुणा युक्त ध्वनि | Weeping words | |
| अगुञ्जत् | गुञ्जनम् अकरोत् | गूँजा | Echoes | |
| बुभुक्षितः | क्षुधातुरः | भूखा | Hungry | |
| दयाविगलित-हृदयः | करुणार्द्रहृदयः | दया पूर्ण हृदय वाला / दयालु | Compassionate heart | |
| अश्रुपूर्णनयनः | अश्रुयुक्तं नेत्रं यस्य सः | आँसू से भरी हुई आँखों वाला | Eyes filled with tears | |
| परिवेषितम् | भोजनार्थं प्रदत्तम् (अन्नम्) | परोसा गया | Served | |
| पञ्चमित्रेषु | पञ्चसंख्याकेषु मित्रेषु | पाँच मित्रों में | Among five friends | |

© NCERT not to be republished

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| स्वतन्त्रता-सङ्ग्रामी | स्वतन्त्रता-सेनानीः | स्वतन्त्रता सेनानी | Freedom fighter | |
| जन्म लब्धवान् | जन्म प्राप्तवान् | जन्म लिया | Was born | |
| कारावासम् | कारागृहे बन्धनम् | कारागार में रहना | Living in jail | |
| चिन्ताकुलः | चिन्तया व्याकुलः | चिन्ता से व्याकुल | Worried | |
| देशसेवा-तत्परस्य | देशसेवां कर्तुं तत्परस्य | देश सेवा हेतु तत्पर का | Of the one who is ready to serve the country | |
| सहस्रशः | सहस्राधिकाः | हजारों | In thousands | |
| लीयताम् | विलीनतां यान्तु | विलीन हो जाएँ | (May it) merge | |
| प्रयान्तु | गच्छन्तु | चलें | (May they) walk over | |
| गर्तमालिका | गर्तानां शृङ्खला | गड्ढों की शृङ्खला | Series of potholes | |
| अस्थिमांसैः | अस्थिभिः मांसैः च | हड्डी और मांस से | With the bones and flesh of the body | |
| दैनिक-वार्तापत्रस्य | प्रतिदिनं प्रकाशित-पत्रस्य | दैनिक समाचारपत्र का | Of the daily newspaper | |
| असीमम् | अतुलनीयम् | अपार | Immense / Unparallel | |
| उत्कलमणिः | उत्कलस्य मणिसदृशः उपाधिविशेषः | उत्कल की मणि (एक उपाधि) | Gem of Odisha (A title) | |
| सम्मानितवान् | मानेन प्रशंसितवान् | सम्मानित किया | Honored | |
| लोकसेवकः | जनसेवकः | समाज सेवक | Social worker | |
| महामनाः | उच्चविचारसम्पन्नः | उच्च विचार वाला | Broad-minded | |

© NCERT not to be republished

### अत्र इदम् अवधेयम्

**पूर्वरूपसन्धिः** – पदस्य अन्ते यदा "ए"कारः अथवा "ओ"कारः भवति, तदनन्तरम् अग्रिमपदस्य प्रथमवर्णः "अ"कारः भवति तदा पूर्वरूपसन्धिः भवति। तत्र "अ"कारस्य स्थाने "ऽ" इति अवग्रहचिह्नस्य प्रयोगः भवति।

उदा – देशभक्तो + अयम् = देशभक्तोऽयम्
सर्वे + अपि = सर्वेऽपि
पशवो + अपि = पशवोऽपि
बुभुक्षितो + अस्मि = बुभुक्षितोऽस्मि
अश्रुपूर्णनयनो + अभवत् = अश्रुपूर्णनयनोऽभवत्

## अभ्यासात् जायते सिद्धिः

**१. अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत —**

(क) समाज-दिनपत्रिकायाः प्रतिष्ठाता कः? ..........................................

(ख) गोपबन्धुः कस्मै स्वभोजनं दत्तवान्? ..........................................

(ग) मरणासन्नः कः आसीत्? ..........................................

(घ) गोपबन्धुः केन उपाधिना सम्मानितः अभवत्? ..........................................

(ङ) गोपबन्धुः कति वर्षाणि कारावासं प्राप्तवान्? ..........................................

**२. एकवाक्येन उत्तरं लिखत —**

(क) गोपबन्धुः किमर्थम् अश्रुपूर्णनयनः अभवत्? ..........................................

(ख) कीदृशं पुत्रं विहाय गोपबन्धुः समाजसेवाम् अकरोत्? ..........................................

(ग) गोपबन्धोः कृते उत्कलमणिः इति उपाधिः किमर्थं प्रदत्तः? ..........................................

© NCERT not to be republished

(घ) गोपबन्धुः कुत्र जन्म लब्धवान्? ................................................

(ङ) गोपबन्धुः सर्वदा केषाम् उपयोगं कृतवान्? ................................................

**३. कोष्ठके दत्तानि पदानि उपयुज्य वाक्यानि रचयत—**

सेवाम्, सुस्वादूनि, सहायताम्, स्वदेशवस्त्राणि, अन्यतमः

(क) ..........................................................................................

(ख) ..........................................................................................

(ग) ..........................................................................................

(घ) ..........................................................................................

(ङ) ..........................................................................................

**४. चित्रं दृष्ट्वा पञ्च वाक्यानि रचयत—**

(क) ................................................

(ख) ................................................

(ग) ................................................

(घ) ................................................

(ङ) ................................................




**५. समुचितेन पदेन श्लोकं पूरयत—**

(क) .............................. मम लीयतां तनुः

(ख) उत्कलमणिरित्याख्यः प्रसिद्धो ..............................

(ग) स्वदेशलोकास्तदनु .............................. नु

(घ) स्वराज्यमार्गे यदि .............................. ,

(ङ) .............................. परिपूरितास्तु सा

© NCERT not to be republished

६. **उदाहरणानुसारं क्रियापदं स्त्रीलिङ्गे परिवर्तयत—**

यथा – गतवान् – गतवती

(क) प्राप्तवान् – ....................

(ख) उपविष्टवान् – ....................

(ग) भुक्तवान् – ....................

(घ) कृतवान् – ....................

(ङ) गृहीतवान् – ....................



७. **समुचितेन पदेन सह स्तम्भौ मेलयत—**

| | अ | इ |
|---|---|---|
| 1. | समाजः | गोपबन्धुः |
| 2. | ममास्थिमांसैः | व्यञ्जनानि |
| 3. | उत्कलमणिः | क्रन्दनध्वनिः |
| 4. | आँ आँ . . इति | दिनपत्रिका |
| 5. | सुस्वादूनि | परिपूरितास्तु |

८. **घटनाक्रमेण वाक्यानि पुनः लिखत—**

(क) भिक्षुकञ्च तद्भोजितवान्।

(ख) प्रफुल्लचन्द्रायः गोपबन्धुम् उत्कलमणिः इति उपाधिना सम्मानितवान्।

(ग) गोपबन्धुः अश्रुपूर्णनयनोऽभवत् ।

(घ) अतिथयो हस्तपादं क्षालयित्वा आसनेषु उपविष्टवन्तः।

(ङ) दिनत्रयात् किमपि न भुक्तम्।

(क) ....................

(ख) ....................

(ग) ....................

(घ) ....................

(ङ) ....................

© NCERT not to be republished

## योग्यताविस्तरः

**भोजनस्यातिदौर्लभ्यं जीवनाय सुखप्रदम्।**
**तदर्थं भोजनं कुर्याः मा शरीरे दयां कुरु॥**

**पदच्छेदः** – भोजनस्य अतिदौर्लभ्यम् जीवनाय सुखप्रदम् तदर्थम् भोजनम् कुर्याः मा शरीरे दयाम् कुरु।

**अन्वयः** – भोजनस्य अतिदौर्लभ्यं (विद्यते)। जीवनाय सुखप्रदं भोजनं कुर्याः। तदर्थं शरीरे दयां मा कुरु।

**भावार्थः** – भोजनम् अतीव दुर्लभं भवति। जीवनम् अग्रे नेतुं सुखप्रदं भोजनं करणीयम्। अतः शरीरस्य कष्टं विचिन्त्य भोजनविषये कदापि सङ्कोचः लज्जा वा न करणीया इति।

### उत्कलमणि-गोपबन्धुदासस्य जीवनपरिचयः —

उत्कलमणिः गोपबन्धुदासः

जन्म – ०९/१०/१८७७

जन्मस्थानम् – सुआण्डो-ग्रामः, पुरी-जनपदः, ओडिशाराज्यम्

पिता – दैत्यारिदासः

माता – स्वर्णमयी देवी

पत्नी – मोती देवी

एफ़.ए. उत्तीर्णः – १९००, रेभेन्सा महाविद्यालयः, कटकम्, ओडिशा

बी.एल्. उत्तीर्णः – १९०६, कलकत्ता – विश्वविद्यालयः

सत्यवादि-वनविद्यालयस्य प्रतिष्ठा – १९०९

बिहार-ओडिशा व्यवस्थापकसभायाः सदस्यः – १९१७

समाज-साप्ताहिकपत्रिकायाः प्रकाशनम् – १९१९

भारतीय-जातीय-आन्दोलने योगदानम् – १९२०

उत्कलमणिः इति उपाधिना सम्माननम् – १९२४



© NCERT not to be republished

रचनाः – अवकाशचिन्ता, बन्दीर आत्मकथा, कारा-कविता, धर्मपद, गो-माहात्म्य, नचिकेता-उपाख्यान

स्वर्गारोहणम् (साक्षी-गोपाले) – १७.०६.१९२८

**सत्यवादि-वनविद्यालयः —**

भारतस्य प्रथमः मुक्तविद्यालयः। १९०९ ख्रिस्ताब्दे अगस्तमासस्य १२ दिनाङ्के साक्षीगोपाल-नामके स्थाने प्रतिष्ठापितः। पण्डितः गोपबन्धुदासः, पण्डितः नीलकण्ठदासः, पण्डितः डा. गोदावरीशमिश्रः, पण्डितः कृपासिन्धुमिश्रः, पण्डितः लिङ्गराजमिश्रः, आचार्यः हरिहरदासः, पण्डितः नन्दकिशोरदासः च इत्येषां देशभक्तानां मिलितप्रयासेन अयं निःशुल्कवनविद्यालयः तदानीम् आभारतं प्रतिष्ठाम् अलभत। पञ्चसखायः मिलित्वा समाजसेवां कुर्वन्तः शिक्षाविकासं च कारयन्तः स्वाधीनतान्दोलनाय जनान् प्रेरयन्ति स्म।

## परियोजनाकार्यम्

१. **स्वप्रदेशस्य स्वतन्त्रतासङ्ग्रामिणां नामानि सङ्गृह्य तेषु एकस्य सचित्रां संक्षिप्तजीवनीं लिखत।**

२. **जलप्लावपीडितानां साहाय्यार्थं स्वकीयाम् एकां कार्ययोजनां लिखत।**

© NCERT not to be republished

# पञ्चमः पाठः

# गीता सुगीता कर्तव्या

0872CH05

कुरुक्षेत्रे श्रीगीता-जयन्ती-महोत्सवः आचरितः। तत्र बहवः जनाः अगच्छन्। रमेशः अपि स्वजनकेन सह तत्र गतवान्। कथावाचकः गीतायाः विषये वर्णयति स्म –

**गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।**
**या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता॥**

इदं श्रुत्वा रमेशः पितरम् अपृच्छत् – "पितः ! गीता का ? कथं सुगीता कर्तव्या ?"

**पिता** – पुत्र ! बहुभ्यः वर्षेभ्यः पूर्वं कुरुक्षेत्रे कौरवाणां पाण्डवानां च मध्ये सङ्ग्रामः अभवत्। तस्मिन् युद्धे स्वबान्धवान् दृष्ट्वा अर्जुनः युद्धं कर्तुं न इच्छति स्म। तदा भगवान् श्रीकृष्णः युद्धपराङ्मुखम् अर्जुनं कर्तव्यपालनार्थम् उपदिष्टवान्। श्रीकृष्णस्य उपदेशः एव श्रीमद्भगवद्गीता अस्ति। गीतायाम् अमृततुल्याः उपदेशाः सन्ति।



© NCERT not to be republished

**रमेशः** – तर्हि सुगीता कर्तव्या इत्यस्य कः आशयः ?

**पिता** – अस्य आशयः अस्ति यत् गीतायाः अभ्यासः सम्यक् रूपेण करणीयः। गीता उत्तमभावेन पठितव्या। कार्यक्षेत्रे जीवनक्षेत्रे च गीतायाः उपदेशाः अनुपालनीयाः। अस्मिन् पाठे वयं श्रीमद्भगवद्गीतायाः काँश्चन श्लोकान् पठामः। वयं श्लोकान् मिलित्वा गायामः अपि।

**दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।**
**वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥ १॥**

**पदच्छेदः** – दुःखेषु अनुद्विग्नमनाः सुखेषु विगतस्पृहः वीत-राग-भय-क्रोधः स्थितधीः मुनिः उच्यते।

**अन्वयः** – दुःखेषु अनुद्विग्नमनाः सुखेषु विगतस्पृहः वीत-राग-भय-क्रोधः मुनिः स्थितधीः (इति) उच्यते।

**भावार्थः** – यः मनुष्यः आपत्कालेषु उद्वेगं न अनुभवति। यः सुखप्राप्तये अपि निस्पृहः (इच्छारहितः) भवति। यः इच्छा, आसक्तिः, भयः, क्रोधः, इत्येतेभ्यः मुक्तः भवति। सः मौनी पुरुषः स्थितप्रज्ञः भवति।

**क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।**
**स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥ २॥**

**पदच्छेदः** – क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः स्मृतिभ्रंशात् बुद्धिनाशः बुद्धिनाशात् प्रणश्यति।

**अन्वयः** – क्रोधात् सम्मोहः भवति। सम्मोहात् स्मृतिविभ्रमः (भवति)। स्मृतिभ्रंशात् बुद्धिनाशः (भवति)। बुद्धिनाशात् (जनः) प्रणश्यति।

**भावार्थः** – मानवस्य यदा क्रोधः भवति तदा क्रोधात् अविवेकः उत्पद्यते। अविवेकात् आत्मानं विस्मरति। किं योग्यं किञ्च अयोग्यम् इति अविचिन्त्य क्रोधात् व्यामोहं प्राप्नोति। यदा अधिकः व्यामोहः भवति तदा मनुष्यस्य स्मृतिः निष्क्रिया नष्टा च भवति। स्मृतेः नाशात् बुद्धिः नश्यति। बुद्धेः नाशात् सः मनुष्यः विनाशं प्राप्नोति।

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**
**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥ ३॥**





**पदच्छेदः** – तद् विद्धि प्रणिपातेन परिप्रश्नेन सेवया उपदेक्ष्यन्ति ते ज्ञानम् ज्ञानिनः तत्त्वदर्शिनः।

**अन्वयः** – तद् प्रणिपातेन सेवया परिप्रश्नेन विद्धि, ते तत्त्वदर्शिनः ज्ञानिनः ज्ञानम् उपदेक्ष्यन्ति।

**भावार्थः** – भगवान् श्रीकृष्णः अर्जुनम् उपदिशति – हे अर्जुन! भवान् गुरोः समीपं गत्वा यथार्थज्ञानं प्राप्तुं प्रयासं करोतु। भवान् विनीतः जिज्ञासुः च भूत्वा गुरोः सेवां करोतु। तत्त्वज्ञानी गुरुः भवते ज्ञानं प्रदास्यति। यतः ये सत्यस्य दर्शनं कृतवन्तः ते एव यथार्थज्ञानिनः भवन्ति।

© NCERT not to be republished





**श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।**
**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥ ४॥**

**पदच्छेदः** – श्रद्धावान् लभते ज्ञानम् तत्परः संयतेन्द्रियः ज्ञानम् लब्ध्वा पराम् शान्तिम् अचिरेण अधिगच्छति।

**अन्वयः** – संयतेन्द्रियः तत्परः श्रद्धावान् (मनुष्यः) ज्ञानं लभते। तथा ज्ञानं लब्ध्वा (सः) अचिरेण परां शान्तिम् अधिगच्छति।

**भावार्थः** – यः श्रद्धालुः मनुष्यः दिव्यज्ञानं प्राप्तुं निरन्तरं प्रयासं करोति। तथैव यः मनुष्यः इन्द्रियाणि स्ववशे कृतवान्। सः मनुष्यः दिव्यज्ञानं प्राप्स्यति। तादृशं दिव्यं ज्ञानं प्राप्य सः पुरुषः जीवने अनन्तम् आनन्दं प्राप्नोति।

**अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।**
**निर्ममो निरहङ्कारः समदुःखसुखः क्षमी॥ ५॥**

**पदच्छेदः** – अद्वेष्टा सर्वभूतानां मैत्रः करुणः एव च निर्ममः निरहङ्कारः समदुःखसुखः क्षमी।

**अन्वयः** – (यः) सर्वभूतानाम् अद्वेष्टा मैत्रः च करुणः एव निर्ममः निरहङ्कारः समदुःखसुखः क्षमी (अस्ति, सः एव मम प्रियः भवति।)

**भावार्थः** – हे अर्जुन! यः कस्यामपि परिस्थितौ विचलितः न भवति। यः ईर्ष्यारहितः समस्तप्राणिनां कृते मित्रभावयुतः दयालुः च भवति। यः ममत्वरहितः, अहङ्कारविहीनः, सुखदुःखेषु समभावयुतः क्षमाशीलः च भवति तादृशः पुरुषः भगवतः अत्यन्तं प्रियः भक्तः भवति।

© NCERT not to be republished

**सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।**
**मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥ ६॥**

**पदच्छेदः** – सन्तुष्टः सततम् योगी यतात्मा दृढनिश्चयः मयि अर्पितमनोबुद्धिः यः मद्भक्तः सः मे प्रियः।

**अन्वयः** – यः योगी सततं सन्तुष्टः यतात्मा दृढनिश्चयः मयि (च) अर्पितमनोबुद्धिः (भवति) सः मद्भक्तः मे प्रियः (भवति )।

**भावार्थः** – हे पार्थ! यः निरन्तरं सन्तुष्टः भवति। अर्थात् कस्यापि वस्तुनः अभावात् कदापि असन्तुष्टः न भवति। यः मनः इन्द्रियाणि च विजित्य संयमी भवति। यः स्वबुद्ध्या परमेश्वरस्य स्वरूपं स्थिरीकरोति। यश्च मनः बुद्धिं च ईश्वरे समर्पयति। सः मनुष्यः मम अतीव प्रियतमः भक्तः भवति।

**यस्मान्नोद्विजते लोकः लोकान्नोद्विजते च यः।**
**हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः॥ ७॥**

**पदच्छेदः** – यस्मात् न उद्विजते लोकः लोकात् न उद्विजते च यः हर्ष-अमर्ष-भय-उद्वेगैः मुक्तः यः सः च मे प्रियः।

**अन्वयः** – यस्मात् लोकः न उद्विजते, यः च लोकात् न उद्विजते, यः च हर्ष-अमर्ष-भय-उद्वेगैः मुक्तः सः मे प्रियः (भवति)।

**भावार्थः** – हे अर्जुन! यस्मात् मनुष्यात् कोऽपि मनुष्यः प्राणी वा उद्विग्नः न भवति। यश्च मनुष्यः अन्यस्मात् जनात् प्राणिनः वा उद्विग्नः न भवति। यश्च हर्षेण, ईर्ष्यया, भीत्या, चिन्तया च रहितः भवति। सः मम अतीव प्रियः भक्तः भवति।

© NCERT not to be republished

**अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।**
**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥ ८॥**

**पदच्छेदः** – अनुद्वेगकरम् वाक्यम् सत्यम् प्रियहितम् च यत् स्वाध्यायाभ्यसनम् च एव वाङ्मयम् तपः उच्यते।

**अन्वयः** – यद् वाक्यम् अनुद्वेगकरं सत्यं प्रियहितं च (तथा) स्वाध्यायाभ्यसनं च एव वाङ्मयं तपः उच्यते।

**भावार्थः** – यत् अनुद्वेगकरं (भषणम् उद्वेगं न जनयेत्), सत्यं, प्रियकरं, हितकरं, च भाषणं स्यात्, तत् वाङ्मयं तपः इति कथ्यते। शास्त्रादीनां स्वाध्यायः, तेषाम् अभ्यासः च वाचिकं तपः कथ्यते। तथा स्वाध्यायः अभ्यासश्चापि यथाविधि वाङ्मयं तपः इति उच्यते। अतः विद्यार्थिभिः स्मरणीयं यत्—

**प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः,**
**तस्मात् तदेव वक्तव्यं वचनेन का दरिद्रता।**



## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| महोत्सवः | पर्व | त्यौहार | Festival | |
| कथावाचकः | उपन्यासकः | कथा वाचक | The narrator / the proponent | |
| सुगीता | गानमयी | अच्छी तरह से गाई जाने वाली | Melodious Song | |
| युद्धपराङ्मुखम् | युद्ध-विमुखम् | युद्ध विमुख | The war-averse | |
| अमृततुल्याः | अमृतेन सदृशाः / अतिमहत्त्वपूर्णाः | अमृत के समान | like nectar | |
| अनुद्विग्नमनाः | यस्य मनः विचलितं न भवति | अविचलित मन वाला | Person of tranquil mind | |
| विगतस्पृहः | अनुरागरहितः | आसक्ति रहित | Detached | |
| वीत-राग-भय-क्रोधः | वीतः रागः भयं क्रोधः यस्य | वासना, भय और क्रोध से रहित | Free from attachment, fear and anger | |
| स्थितधीः | स्थिरमतिमान् | स्थिर मन वाला | steady minded | |
| मुनिः | यतिः | तपस्वी | The sage | |
| सम्मोहः | किंकर्तव्यविमूढता | कर्तव्य अकर्तव्य का अविवेक | Delusion | |
| स्मृतिविभ्रमः | स्मृतिनाशः | स्मरणशक्ति का नाश होना | Loss / failure of memory | |
| श्रद्धावान् | श्रद्धालुः | श्रद्धा से युक्त | Devoted | |
| संयतेन्द्रियः | इन्द्रियसंयमी | संयमित इन्द्रियों वाला | One who has controlled his senses | |
| प्रणिपातेन | नमस्कारेण | प्रणाम के द्वारा | by bowing down/ by salutation | |
| परिप्रश्नेन | पुनः पुनः प्रश्नकरणेन | प्रश्नों के द्वारा | by questioning (with humility) | |
| उपदेक्ष्यन्ति | उपदेशं प्रदास्यन्ति | उपदेश देंगे | They will preach | |
| तत्त्वदर्शिनः | दार्शनिकाः | तत्त्वज्ञानी | Those who have realized the Truth | |

© NCERT not to be republished

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| विद्धि | जानीहि | तुम जानो | (Let You) Know | |
| अद्वेष्टा | द्वेषरहितः | द्वेष न करने वाला | One who never hates | |
| सर्वभूतानां | सर्वेषां प्राणिनाम् | सभी प्राणियों का | of all beings | |
| मैत्रः | मैत्रीपूर्णः | मित्रता के भाव वाला | Friendly | |
| करुणः | दयार्द्रचित्तः | करुणावान् | Compassionate | |
| निर्ममः | ममत्व-भावनारहितः | ममत्व कर भावना से विहीन | Free from the sense of 'mine' | |
| निरहङ्कारः | गर्वहीनः | अहंकार रहित | Egoless | |
| समदुःखसुखः | दुःखेषु सुखेषु च समानभाव-शीलः | सुख और दुःख में समान भाव वाला | Same in pain and pleasure | |
| क्षमी | क्षमावान् | क्षमाशील | Endowed with forbearance | |
| उद्विजते | उद्वेगं गच्छति | उद्विग्न होता है | agitated | |
| लोकः | जगत् | संसार | The world | |
| हर्षामर्षभयोद्वेगैः | आह्लाद-क्रोध-भय-चिन्तादिभिः | हर्ष, क्रोध, भय और चिंताओं से | From joy, impatience, fear and anxiety | |
| यतात्मा | संयमी | यति, जिसने इन्द्रियों को अपने नियन्त्रण में कर लिया है | Self – Restrained | |
| दृढनिश्चयः | दृढः निश्चयः यस्य सः | दृढ़ निश्चय वाला | Firmly resolute/ determined | |
| अर्पितमनोबुद्धिः | अर्पितं मनः बुद्धिः च येन सः | मन और बुद्धि को अर्पित करने वाला | One who has offered his mind and intellect | |
| अनुद्वेगकरम् | न उद्वेगकरम् | व्याकुलता न करने वाला | Unoffending/ non-agitating | |
| अभ्यसनं | अभ्यासः | अभ्यास | Practice | |
| वाङ्मयम् | वाचिकम् | वाचिक | Verbal penance | |

© NCERT not to be republished

**अत्र इदम् अवधेयम्**

आधारे सप्तमी विभक्तेः प्रयोगः भवति। यथा – उत्पीठिकायां पुस्तकम् अस्ति। दुःखेषु अनुद्विग्नमनाः भवेत्। सुखेषु विगतस्पृहः भवेत्।

उत्पत्ति-अर्थे कारणार्थे वा पञ्चमी-विभक्तेः प्रयोगः भवति। यथा – क्रोधात् सम्मोहः भवति। सम्मोहात् स्मृतिविभ्रमः भवति। स्मृतिभ्रंशात् बुद्धिनाशः भवति।

## अभ्यासात् जायते सिद्धिः

**१. अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत—**

(क) श्रद्धावान् जनः किं लभते? ..................

(ख) कस्मात् सम्मोहः जायते? ..................

(ग) सम्मोहात् किं जायते? ..................

(घ) अर्जुनाय गीतां कः उपदिष्टवान्? ..................

(ङ) हर्षामर्षभयोद्वेगैः मुक्तः नरः कस्य प्रियः भवति? ..................

**२. पूर्णवाक्येन उत्तरं लिखत—**

(क) कीदृशं वाक्यं वाङ्मयं तपः उच्यते?

..................

(ख) कीदृशः जनः स्थितधीः उच्यते?

..................

(ग) जनः कथं प्रणश्यति?

..................

(घ) जनः कथम् उत्तमां शान्तिं प्राप्नोति?

..................

(ङ) उपदेशप्राप्तये त्रयः उपायाः के भवन्ति?

..................

© NCERT not to be republished

३. **कोष्ठके दत्तानि पदानि उपयुज्य वाक्यानि रचयत—**

सेवया, स्मृतिविभ्रमः, योगी, वाङ्मयं, स्थितधीः

(क) अनुद्वेगकरं सत्यं प्रियहितं च वाक्यं ................................... तपः उच्यते।

(ख) सततं सन्तुष्टः दृढनिश्चयः च ................................... भवति।

(ग) अनुद्विग्नमनाः मुनिः ................................... उच्यते।

(घ) तद् आत्मज्ञानं प्रणिपातेन परिप्रश्नेन ................................... च विद्धि।

(ङ) सम्मोहात् ................................... भवति।

४. **अधोलिखितानि पदानि उपयुज्य वाक्यानि रचयत—**

(क) उच्यते – ..........................................................................................

(ख) च – ..........................................................................................

(ग) न – ..........................................................................................

(ङ) लब्ध्वा – ..........................................................................................

(ङ) कुर्यात् – ..........................................................................................

५. **पाठानुसारं समुचितेन पदेन श्लोकं पूरयत—**

(क) श्रद्धावाँल्लभते ज्ञानं तत्परः ...................................।

(ख) ................................... चैव वाङ्मयं तप उच्यते।

(ग) सन्तुष्टः सततं योगी यतात्मा ...................................।

(घ) ................................... भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।

(ङ) तद्विद्धि ................................... परिप्रश्नेन सेवया।



६. **उदाहरणानुसारं पदानि स्त्रीलिङ्गे परिवर्तयत—**

उदाहरणम्—

श्रद्धावान् – ..........श्रद्धावती..........

बुद्धिमान् – ..........बुद्धिमती..........

© NCERT not to be republished



(क) गुणवान् – ..............................................

(ख) आयुष्मान् – ..............................................

(ग) क्षमावान् – ..............................................

(घ) ज्ञानवान् – ..............................................

(ङ) श्रीमान् – ..............................................

**७. समुचितेन पदेन सह स्तम्भौ मेलयत—**

| अ | इ |
|---|---|
| (क) सर्वभूतानाम् | पुनः पुनः प्रश्नकरणेन |
| (ख) अनुद्विग्नमनाः | स्थिरमतिमान् |
| (ग) स्थितधीः | इन्द्रियसंयमी |
| (घ) परिप्रश्नेन | यस्य मनः विचलितं न भवति |
| (ङ) संयतेन्द्रियः | सर्वेषां प्राणिनाम् |

**८. श्रीमद्भगवद्गीतायाः विषये पञ्च वाक्यानि लिखत—**

(क) ..............................................................................................................

(ख) ..............................................................................................................

(ग) ..............................................................................................................

(घ) ..............................................................................................................

(ङ) ..............................................................................................................

© NCERT not to be republished

## योग्यताविस्तरः

### श्रीमद्भगवद्गीता

भगवतः श्रीकृष्णस्य अर्जुनाय प्रदत्तानां जीवनमूल्यसम्बद्धानाम् उपदेशानां सङ्कलनात्मकः ग्रन्थः अस्ति श्रीमद्भगवद्गीता। महर्षिः वेदव्यासः महाभारतस्य भीष्मपर्वणि श्रीमद्भगवद्गीतां वर्णितवान्। गीतायाम् अष्टादश अध्यायाः सप्तशतं (७००) श्लोकाः च सन्ति।

१. अर्जुनविषादयोगः (सैन्य-निरीक्षणम्)

२. साङ्ख्ययोगः (गीतायाः सारः)

३. कर्मयोगः (कर्मणः महत्त्वम्)

४. ज्ञान-कर्म-संन्यासयोगः (दिव्यज्ञानम्)

५. कर्मसंन्यासयोगः (कर्म-वैराग्य-योगः)

६. आत्मसंयमयोगः (ध्यान-योगः)

७. ज्ञान-विज्ञानयोगः (भगवद्ज्ञानस्य प्राप्तिः)

८. अक्षर-ब्रह्मयोगः (भगवतः प्राप्तिः)

९. राजविद्या-राजगुह्ययोगः (परमं गुप्तं ज्ञानम्)

१०. विभूतियोगः (भगवतः ऐश्वर्यम्)

११. विश्वरूप-दर्शनयोगः (विश्वरूपस्य दर्शनम् )

१२. भक्तियोगः (भक्तिभावज्ञानम्)

१३. क्षेत्र-क्षेत्रज्ञ-विभागयोगः (प्रकृतेः पुरुषस्य चेतनायाः च ज्ञानम्)

१४. गुणत्रय-विभागयोगः (प्रकृतेः गुणत्रयस्य वर्णनम्)

१५. पुरुषोत्तमयोगः (विश्वस्य केन्द्ररूपेण ब्रह्मणः वर्णनम्)

१६. दैवासुर-समद्विभागयोगः (दैवी-आसुरी-स्वभावानां वर्णनम्)

१७. श्रद्धात्रय-विभागयोगः (श्रद्धायाः विभागानां वर्णनम्)

१८. मोक्ष-संन्यासयोगः (उपसंहारः, संन्यास-सिद्धि-वर्णनम्)

**सरसं गायामः —**

**भगवद्गीता किञ्चिदधीता, गङ्गा-जल-लव-कणिका पीता।**
**सकृदपि येन मुरारि समर्चा, तस्य यमः किं कुरुते चर्चाम्॥**
**कर्तव्यदीक्षां च समत्वशिक्षां, ज्ञानस्य भिक्षां शरणागतिञ्च।**
**ददाति गीता करुणार्द्रभूता, कृष्णेन दत्ता जगतां हिताय॥**



## परियोजनाकार्यम्

१. कक्षायां श्रीमद्भगवद्गीतानुगुणं 'स्थितधीः' इति विषयम् अधिकृत्य 'मम जीवनलक्ष्यम्' इत्यस्मिन् विषये परिचर्चां स्थापयतु।

२. विविध-धर्माणां धर्मग्रन्थानां नामानि विलिख्य कस्यचित् एकस्य धर्मग्रन्थस्य विवरणं लिखत।

© NCERT not to be republished

षष्ठः पाठः

# डिजिभारतम् – युगपरिवर्तनम्

0872CH06

अस्माकं देशः भारतं न केवलं सांस्कृतिकक्षेत्रे समृद्धम्, अपि तु नित्यम् आविष्कारैः कीर्तिं लभते। अद्य सम्पूर्णविश्वे 'डिजिटल्-भारतम्' इत्यस्य चर्चा श्रूयते। एकस्यैव पिञ्जस्य नोदनेन सर्वं नागरिक-सौविध्यं लभ्यते। अनेन भारतीयानां जीवनम् अधिकं सरलं जायमानम् अस्ति। डिजिटल्-पटले सम्पूर्णा वसुधा कुटुम्बवत् अस्ति। अधुना वयं भारतस्य डिजिटल्-प्रगतेः विषये पठामः।

डिजिटल्-भारतम्
सशक्तीकरणार्थं शक्तिः

(नवदेहलीस्थः प्रधानमन्त्रिसङ्ग्रहालयः। अत्र विविधाः डिजिटल्-प्रौद्योगिक्यः प्रदर्शिताः सन्ति। सर्वे उत्सुकतया सङ्ग्रहालये प्रदर्शितानि वस्तूनि पश्यन्ति।)



© NCERT not to be republished

**अध्यापकः** – बालाः ! प्रधानमन्त्रिसङ्ग्रहालये युष्माकं सर्वेषां स्वागतम्। अत्र विविधाः डिजिटल्-प्रौद्योगिक्यः प्रयुक्ताः सन्ति। सानन्दं सावधानं च पश्यन्तु। अनन्तरं एतस्योपरि चर्चां करिष्यामः।

*(सर्वे बालाः प्रदर्शितानि विविधानि वस्तूनि उत्साहेन पश्यन्ति, अनुभवन्ति, परस्परं चर्चाम् अपि कुर्वन्ति।)*

**सर्वे छात्राः** – अद्भुतं महोदय ! अत्र हॉलोग्राम्-द्वारा प्रधानमन्त्रिणः भाषणं श्रूयते दृश्यते च। प्रत्यक्षमेव प्रधानमन्त्री अत्र उपविष्टः इति भासते।

**यशिका** – सत्यम्, अहम् अपि हॉलोग्रामं दृष्टवती। अनेन दिवङ्गताः नेतारः अपि जीविताः इव दृश्यन्ते।

**अथर्वः** – अत्र 'वर्धिता-वास्तविकता' (AR) 'आभासीया-वास्तविकता' (VR) च इत्याभ्यां सम्बद्धानि उपकरणानि अपि सन्ति, अनेन ऐतिहासिकवृत्तानि प्रत्यक्षम् इव अनुभूयन्ते। 'भारतीय-स्वतन्त्रता-सङ्ग्रामं' दृष्ट्वा अस्माकं पूर्वजानां संघर्षः कियान् विशालः आसीत् इति ज्ञायते।

**भास्करः** – अहम् अत्र कृत्रिमबुद्धि-आधारितं संवादयन्त्रं दृष्टवान्। एतत् यन्त्रम् अस्माकं सर्वविधप्रश्नानाम् उत्तराणि ददाति।

**वेदिका** – अहो ! 'डिजिटल्-प्रक्षेपण-चलच्चित्रं' दृष्ट्वा अहं विस्मिता अभवम्। अत्र सम्पूर्णस्य भारतस्य विकास-यात्रा प्रदर्शिता अस्ति।

**श्रेया** – एषः कश्चन अपूर्वः अनुभवः अस्ति। यश्च चिरकालपर्यन्तं स्मरणीयः भविष्यति।

**सर्वे छात्राः** – मान्यवर ! वयं सर्वे एतस्मिन् सन्दर्भे चर्चां कर्तुम् इच्छामः। किं कक्षां प्रति चलामः ?

**अध्यापकः** – उत्तमः विचारः। चलामः तावत्।

*(सर्वे मिलित्वा गच्छन्ति।)*

*(सर्वे कक्षायाम् उपविष्टाः)*

**सर्वे छात्राः** – अहो ! सङ्ग्रहालयस्य अद्भुतः अनुभवः प्राप्तः।

**अध्यापकः** – बालाः ! अस्मिन् सङ्ग्रहालये उपस्थापितं ज्ञानम् अद्भुतम् एव। 'डिजिटल्' योजनायाः प्रभावः दैनन्दिने जीवनेऽपि दृश्यते।

**सर्वे छात्राः** – आम्, मान्यवर ! वयम् इमं प्रभावं ज्ञातुम् इच्छामः।



**अध्यापकः** – उत्तमम्। अस्माकं दैनिकं जीवनं 'डिजिटल्' इत्यनेन परिवर्तितं प्रभावितं च भवति। अस्य क्षेत्रं व्यापकम् अस्ति। यथा – 'डिजिटल्-शासनं, स्वास्थ्यसेवा, शिक्षणं, वित्तीयं समावेशनम्' इत्यादीनि क्षेत्राणि।

**यशिका** – अहं स्वयं 'डिजि-लॉकर्' इत्यस्य उपयोगं करोमि। मम आधारपत्रं विद्यालयीयं प्रमाणपत्रं च तत्र सुरक्षितम् अस्ति।

**अथर्वः** – मम पितरौ 'फ़ास्टॅग्' इत्यस्य उपयोगं कुरुतः। अनेन राजमार्गेषु स्वचालितविधिना मार्गशुल्कस्य सङ्ग्रहणं शीघ्रं भवति।

**भास्करः** – अहम् 'एकीकृत-धनदेयप्रत्यर्पण-अन्तरफलकस्य' (यूपीआय्) उपयोगं करोमि। अनेन मम पितरौ अपि त्वरया मह्यं धनं प्रेषयितुं शक्नुतः।

**अध्यापकः** – उत्तमम्! वित्तीयसमावेशनस्य क्षेत्रे 'यूपीआय्, रूपे-कार्ड्, जनधनयोजना' इत्यादीनि बहूनि साधनानि सन्ति। अधुना आपणेषु वस्तुक्रयणार्थं साक्षात् मुद्रायाः आवश्यकता नास्ति। मुद्रारहित-विनिमयसन्दर्भे विश्वे भारतस्य अग्रगण्यं स्थानम् अस्ति।

**राघवः** – डिजिटल्-योजना भारतस्य काचित् महत्त्वाकाङ्क्षिणी योजना अस्ति।

© NCERT not to be republished

**अध्यापकः** – आम् राघव ! एषा भारतसर्वकारस्य विशिष्टा महत्त्वाकाङ्क्षिणी योजना अस्ति। राष्ट्रं डिजिटल्-रूपेण सुशक्तं भवेत् इत्येव अस्याः योजनायाः लक्ष्यम्। डिजिटल्-शक्तिः सर्वजनान् सुशक्तान् कुर्यात् इति अस्माकं ध्येयम्।

**श्रेया** – महोदय ! अस्य स्वरूपं किञ्चित् स्पष्टीकरोतु।




**अध्यापकः** – अवश्यम् ! पश्य, डिजिटल्-शासन-सेवायाः अन्तर्गतं 'डिजी-लॉकर्' (आधार-पॅन्-कार्ड् इत्यादीनां डिजिटल्-सङ्ग्रहणम्), 'ई-शासन-पटलम्' यथा – 'उमङ्ग्' (UMANG), 'माय्-गव्' (My-Gov), 'जेम्' (GeM) इत्यादयः। ऑन्-लैन्–टीकाकरण-पञ्जीकरणार्थं 'कोविन्-पटलम्' (COWIN) अस्ति।

**यशिका** – किन्तु यदि ग्राम्य-क्षेत्रे अन्तर्जालस्य समस्या अस्ति तर्हि तत्र कथम् एतासां सेवानाम् उपयोगः भविष्यति ?

**श्रेया** – मान्यवर! मया श्रुतं यत् सर्वकारः अन्तर्जालस्य उत्तरोत्तरं विस्ताराय कार्यं करोति। अनेन ग्राम्य-क्षेत्रे अपि उच्चगतेः जालस्य उपलब्धिः भविष्यति।

**भास्करः** – बहु समीचीनम्। एतासां सेवानाम् उपयोगः शिक्षायाः माध्यमेन अधिकाधिकं प्रचारणीयः।

**अध्यापकः** – सत्यम्! शिक्षायाः क्षेत्रे 'दीक्षा' (DIKSHA), 'स्वयम्' (SWAYAM), 'स्वयं-प्रभा' (SWAYAM PRABHA), 'ई-पाठशाला' (ePathshala), 'भारतीय-राष्ट्रिय-डिजिटल्-पुस्तकालयः', 'निष्ठा' (NISHTHA), 'पीएम्-ई-विद्या' (PM e-VIDYA), निःशुल्क-डिजिटल्-शैक्षिकमञ्चः इत्यादीनाम् उपयोगः करणीयः।

**अथर्वः** – आचार्य! किं कृषिक्षेत्रे अपि डिजिटल्-भारतस्य योगदानम् अस्ति?

**अध्यापकः** – आम्! 'ई-नाम्' (e-NAM) 'पीएम्-किसान्-अनुप्रयोगः' (PM KISAN), ड्रोन्-प्रौद्योगिकी इत्यादीनि पटलानि सन्ति।

**यशिका** – बहु सम्यक्। किन्तु 'डिजिटल्' इत्यस्य वाणिज्ये कीदृशः प्रभावः अस्ति?

**अध्यापकः** – आभासीय-पटलम् अनुप्रयोगः च इत्येतयोः माध्यमेन आभासीयं (ऑन्-लैन्) विक्रयणं भवति। 'आशु-प्रतिक्रिया-कूटः' (QR Code) इत्याधारितः विनिमयश्च भवति।

**सर्वे** – वयं धन्याः मान्यवर! अस्मिन् सन्दर्भे वयं भवद्भिः पाठिताः। वयम् अपि भारतं डिजिटल्-भारतं कर्तुं प्रयत्नं करिष्यामः।

**अध्यापकः** – उत्तमम्। किन्तु अस्माभिः 'साङ्गणिक-सुरक्षा'-विषये अपि चिन्तनीयम्। अनेकविधाः साङ्गणिक-अपराधाः भवन्ति। जनाः प्रायशः लोभात् भयात् वा साङ्गणिक-अपराधेन पीडिताः भवन्ति।

**भास्करः** – एतस्मिन् विषये जनाः जागृताः भवेयुः तदर्थम् अपि उपायाः चिन्तनीयाः।

**अध्यापकः** – सत्यं कथितम्! अनेन प्रकारेण डिजिटल्-क्रान्तौ भारतम् अग्रगण्यं राष्ट्रं भविष्यति।

**सर्वे** – कृतज्ञाः वयं गुरुवर! वयं डिजिटल्-भारतं समृद्धं कर्तुं योगदानं करिष्यामः।

*(सर्वे मिलित्वा गायन्ति)*

**सर्वं विकसितं भाति डिजिटल्-भारतेऽधुना।**
**जीवनस्य च सौकर्यं सहसा लभते जनः॥**

© NCERT not to be republished



## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| सङ्ग्रहालयः | वस्तुसङ्ग्रहगृहम् | संग्रहालय | Museum | |
| हॉलोग्राम् | त्रिवैम-प्रतिमूर्तिः | होलोग्राम | Hologram | |
| वर्धिता वास्तविकता | संवर्धिता वास्तविकता | संवर्धित वास्तविकता | Augmented Reality (AR) | |
| आभासीया वास्तविकता | आभासीया वास्तविकता | आभासी वास्तविकता | Virtual Reality (VR) | |
| कृत्रिमबुद्धिः | यान्त्रिकी बुद्धिः | कृत्रिम-बुद्धिमत्ता | Artificial Intelligence (AI) | |
| डिजिटल्-प्रक्षेपणम् | सङ्गणक-चित्रप्रदर्शनम् | डिजिटल प्रक्षेपण | Digital Projection | |
| संवादः | वार्तालापः | संवाद | Conversation | |
| प्रौद्योगिकी | तन्त्रज्ञानम् | प्रौद्योगिकी | Technology | |
| उत्सुकता | जिज्ञासा | उत्सुकता | Curiosity | |
| भाषणम् | प्रवचनम् | भाषण | Speech | |
| उपकरणानि | यन्त्राणि | उपकरण | Devices | |
| अन्तर्जालम् | अन्तर्जालम् | संचार | Internet | |
| योगदानम् | सहयोगः | योगदान | Contribution | |
| आशुप्रतिक्रियाकूटः | झटिति प्रतिक्रियायाः कूटः | आशु प्रतिक्रिया कोड | Quick Response Code | |
| विस्तृतम् | विस्तारपूर्वकम् | विस्तृत | Detailed | |
| उपलब्धिः | सिद्धिः | उपलब्धि | Achievement | |
| दैनन्दिनजीवनम् | दैनिक-जीवनम् | दैनिक जीवन | Daily Life | |
| शासनम् | प्रशासनम् | शासन | Governance | |

© NCERT not to be republished

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| शिक्षणम् | विद्याप्रदानम् | शिक्षण | Teaching | |
| वित्तीयसमावेशनम् | धनविषयकः समावेशः | वित्तीय समावेशन | Financial Inclusion | |
| आधारपत्रम् | आधारः (परिचयपत्रम्) | आधार–पत्र | Aadhar Card | |
| प्रमाणपत्रम् | साक्ष्यपत्रम् | प्रमाण–पत्र | Certificate | |
| शुल्कम् | करः | शुल्क | Fee | |
| त्वरया | शीघ्रम् | जल्दी | Quickly | |
| जनधनयोजना | एका वित्तीय-समावेशनयोजना | जनधन योजना | Jandhan Financial Scheme | |
| अनुदानम् | दानम् | अनुदान | Grant | |
| शिक्षायाः माध्यमेन | शिक्षणोपायेन | शिक्षा के माध्यम से | Through Education | |
| प्रचारणीयः | प्रचारयोग्यः | प्रचार–योग्य | Worth propagating | |
| कृषिः | कृषि-कार्यम् | खेती | Agriculture | |
| वाणिज्यम् | व्यापारः | व्यापार | Trade | |
| आजीविका | व्यवसायः/ वृत्तिः | व्यवसाय | Employment / Occupation | |
| साङ्गणिक-सुरक्षा | जालसुरक्षा | साइबर सुरक्षा | Cyber security | |
| डिजिटल्-बन्धनम् | डिजिटल्-बन्धनम् | डिजिटल्-बन्धन | Digital Arrest | |
| डिजिटल्-साक्षरता | डिजिटल्-शिक्षा | डिजिटल्-साक्षरता | Digital Literacy | |

© NCERT not to be republished

## अत्र इदम् अवधेयम्

**१. क्त-प्रत्ययः**

**'क्त'-प्रत्ययस्य प्रयोगः** भूतकालार्थे कर्मवाच्ये भाववाच्ये च भवति।

धातवः द्वि-विधा भवन्ति > अकर्मकाः, सकर्मकाः।

यथा – रामः पाठम् अपठत्।

अत्र कर्त्ता कः? > रामः। अत्र कर्म किम्? > पाठम्। क्रिया का? अपठत्।

क्रियायाः सम्बन्धः केन सह अस्ति? – रामेण सह।

अत्र क्रियायाः पुरुष-वचन-सम्बन्धः कर्तृ-पदेन सह अस्ति। परन्तु यदा 'क्त' प्रत्ययः युज्यते तर्हि वाक्यं कर्मवाच्ये परिवर्तनीयम्। यथा, रामेण रावणः मारितः।

यदा 'क्त' प्रत्यस्य प्रयोगः क्रियते तदा कर्त्तरि तृतीया कर्मणि च प्रथमा भवति।

यथा – बालकः पाठं पठति (कर्तृवाच्यम्)। = बालकेन पाठः पठितः। (कर्मवाच्यम्)।

क्त-प्रत्ययस्य प्रयोगः त्रिषु लिङ्गेषु भवति।

रूपनिर्माणम् → धातुः + क्त-प्रत्ययः = कृ + क्त → कृतः

| क्रमः | मूलधातुः | क्त-प्रत्यय | क्त-प्रत्ययान्तं पदम् (पुंलिङ्गम्) | क्त-प्रत्ययान्तं पदम् (स्त्रीलिङ्गम्) | क्त-प्रत्ययान्तं पदम् (नपुंसकलिङ्गम्) |
|---|---|---|---|---|---|
| १. | युज् | युक्त | युक्तः | युक्ता | युक्तम् |
| २. | भू | भूत | भूतः | भूता | भूतम् |
| ३. | विश् | विष्ट | विष्टः | विष्टा | विष्टम् |
| ४. | दा | दत्त | दत्तः | दत्ता | दत्तम् |
| ५. | रक्ष् | रक्षित | रक्षितः | रक्षिता | रक्षितम् |

© NCERT not to be republished

## २. शतृ-प्रत्ययः

**'शतृ'-प्रत्ययस्य प्रयोगः** वर्तमानकाले कार्यं कुर्वन्तं जनं पदार्थं वा बोधयति। अस्य प्रयोगः केवलं परस्मैपदिभिः धातुभिः सह भवति। अस्य प्रयोगः त्रिषु लिङ्गेषु भवति।

रूपनिर्माणम् → धातुः + शतृ-प्रत्ययः = **पठ्** + **शतृ** = **पठन्**

| क्रमः | मूलधातुः | लट्-लकारः | शतृ-प्रत्ययान्तं पदम् |
|---|---|---|---|
| १. | दृश् | पश्यति | पश्यन् |
| २. | कृ | करोति | कुर्वन् |
| ३. | ज्ञा | जानाति | जानन् |
| ४. | इष् | इच्छति | इच्छन् |
| ५. | गम् | गच्छति | गच्छन् |

© NCERT not to be republished

## अभ्यासात् जायते सिद्धिः

**१. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत—**

(क) प्रधानमन्त्रिसङ्ग्रहालये **कीदृशी** प्रौद्योगिकी प्रयुक्ता अस्ति? ....................

(ख) हॉलोग्राम्-द्वारा **कस्य** भाषणं दृश्यते? ....................

(ग) **कस्याः** प्रभावः दैनन्दिनजीवने दृश्यते? ....................

(घ) भारत-सर्वकारस्य महत्त्वाकाङ्क्षिणी योजना **का** अस्ति? ....................

(ङ) 'फ़ास्टॅग्' इत्यस्य उपयोगेन **कस्य** सङ्ग्रहणं भवति? ....................

**२. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत—**

(क) प्रधानमन्त्रिसङ्ग्रहालये काः डिजिटल्-प्रौद्योगिक्यः प्रदर्शिताः सन्ति?

....................................................................................

(ख) जनाः किमर्थं साङ्गणिक-अपराधेन पीडिताः भवन्ति?

....................................................................................

(ग) यशिका 'डिजि-लॉकर्' इत्यस्य उपयोगं कथं करोति ?

.................................................................................................................

(घ) डिजिटल्-भारतस्य वित्तीयसमावेशने काः योजनाः सन्ति ?

.................................................................................................................

(ङ) डिजिटल्-भारते शिक्षायाः क्षेत्रे केषां पटलानाम् उपयोगः करणीयः ?

.................................................................................................................

(च) ग्राम्य-क्षेत्रेषु डिजिटल्-सेवानां समस्या कथं निराकर्तुं शक्यते ?

.................................................................................................................

## ३. अधः दत्तान् शब्दान् सम्यक् संयोजयत —

| क्रमः | शब्दः | संयोजनीयः शब्दः |
|---|---|---|
| क. | हॉलोग्राम् | कृत्रिम-बुद्धिः (AI) |
| ख. | यूपीआय् (UPI) | आभासीया-वास्तविकता |
| ग. | डिजि-लॉकर् | शीघ्रं, सुरक्षितं, सुगमं च डिजिटल्-धनदेय-प्रत्यर्पणम् |
| घ. | फ़ास्टॅग् (FASTag) | डिजिटल्-प्रमाणपत्रम् |
| ङ. | वीआर (VR) | राजमार्गेषु स्वचालितविधिना मार्गशुल्कस्य शीघ्रं संग्रहणम् |

## ४. अधः प्रदत्तमञ्जूषातः शब्दान् चित्वा रिक्तस्थानानि पूरयत —

यूपीआय्, दीक्षा, प्रधानमन्त्रिणः भाषणं, स्वचालितं पारदर्शकं च, जीवन

(क) प्रधानमन्त्रिसङ्ग्रहालये हॉलोग्राम्-द्वारा ........................................ दृश्यते।

(ख) डिजिटल्-भारतस्य आर्थिकसमावेशनं सुगमं कर्तुं ........................................ प्रणाली अस्ति।

(ग) डिजिटल्-शासनं ........................................ सेवां प्रददाति।

(घ) डिजिटल्-भारतस्य शिक्षाक्षेत्रे ........................................ नाम डिजिटल्-शैक्षिकमञ्चः अस्ति।

(ङ) भारतस्य डिजिटल्-परिवर्तनं सर्वाणि ........................................ क्षेत्राणि स्पृशति।

© NCERT not to be republished

**५. अधः अस्मिन् पाठे आगतानां शब्दानाम् आधारेण शब्दजालं प्रदत्तम् अस्ति। अत्र वामतः दक्षिणम् उपरितःअधः च आधारं कृत्वा उदाहरणानुसारं शब्दान् रेखाङ्कयत —**





## वर्गचित्र-जालम्

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| मा | रा | डि | जी | लॉ | क | र् | सं | पी | सै |
| य् | ज | जि | आ | व | हॉ | त | वा | ए | ब |
| ग | मा | ट | भा | र्धि | लो | ब्लॉ | द | म् | र् |
| व् | र्गः | ल् | सी | ता | ग्रा | क् | य | कि | क्रै |
| यू | पी | आ | य् | ना | म् | चे | न्त्र | सा | म् |
| वा | म | जे | शा | वि | ज्ञा | न् | म् | न् | ना |
| णि | ज | म | स | नि | अ | र्थ | व्य | व | स्था |
| ज्य | को | वे | न् | म | कृ | त्रि | म | बु | द्धिः |
| म् | ज | क | स्व | य | म् | प्र | भा | शि | नि |
| प्रौ | द्यो | गि | की | फ़ा | स्टॅ | ग् | छ | क्षा | ष्ठा |



**६. अधोलिखितान् शब्दान् वर्गद्वये विभजत – सङ्गणकसम्बद्धाः, असङ्गणकसम्बद्धाः च —**

(शब्दाः – अन्तर्जालम्, शिक्षिका, सङ्गणकः, विद्यालयः, ई-पत्रम्, पाठ्यपुस्तकम्, डिजिटल्, लेखनी)

| सङ्गणकसम्बद्धाः | असङ्गणकसम्बद्धाः |
|---|---|
| | |
| | |
| | |
| | |



७. **अधोलिखितानि वाक्यानि पठित्वा शुद्धं (✓) अशुद्धं (✗) वा इति चिह्नीकुरुत —**

(क) हॉलोग्राम् कृत्रिमबुद्धेः एकः प्रकारः अस्ति। ( )

(ख) वर्धित-वास्तविकतायाः उपयोगिता ऐतिहासिक-घटनानां प्रत्यक्षानुभवाय अस्ति। ( )

(ग) डिजिटल्-प्रक्षेपण-मानचित्रं भारतस्य विकासयात्रां प्रदर्शयति। ( )

(घ) फ़ास्टॅग् इति राजमार्गेषु स्वचालितविधिना मार्गशुल्कस्य शीघ्रं संग्रहणं करोति। ( )

(ङ) डिजी-लॉकर् इत्यस्य माध्यमेन केवलम् आधार-पत्रं सुरक्षितुं शक्यते। ( )

(च) भारतस्य डिजिटल्-परिवर्तनं केवलं शासने प्रभावं करोति, नागरिकजीवने न। ( )

(छ) उमङ्ग्, माय्-गव्, जेम् इत्यादयः ई-शासन-मञ्चाः सन्ति। ( )

८. **अव्यवस्थितान् वर्णान् शब्ददृष्ट्या व्यवस्थितरूपेण लिखत —**

उदाहरणम् – वेयवित्तीसमानशम् = वित्तीयसमावेशनम्

(क) कसङ्गम्ण ..............................

(ख) कार्वसरः ..............................

(ग) लयःविद्या ..............................

(घ) जिकडिलॉर् ..............................

(ङ) शक्तसुम् ..............................

९. **अधोलिखितं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत —**

अद्यतने विज्ञानयुगे सर्वे मनुष्याः डिजिटल्-प्रौद्योगिक्याः प्रयोगं कुर्वन्ति। जनाः अन्तर्जालस्य, सचलदूरवाण्याः, सङ्गणकस्य च साहाय्येन शीघ्रं कार्याणि सम्पादयन्ति। विद्यार्थिनः अपि ई-अधिगम-प्रणालीं स्वीकृत्य ज्ञानं वर्धयन्ति।

प्रश्नाः —

(क) अद्यतनं युगं कीदृशम् अस्ति? ..............................

(ख) मानवाः केषां साहाय्येन कार्याणि शीघ्रं कुर्वन्ति? ..............................

(ग) ई-अधिगम-प्रणाल्याः प्रयोगं के कुर्वन्ति? ..............................

© NCERT not to be republished

## योग्यताविस्तरः

डिजिटल्-भारतम्
सशक्तीकरणार्थं शक्तिः

| क्षेत्रानुसारं भारते डिजिटल्-प्रगतिः | |
|---|---|
| **१. शिक्षाक्षेत्रम्**<br>• दीक्षामञ्चः = ज्ञान-विनिमयाय डिजिटल् – अवसंरचना (DIKSHA – Digital Infrastructure for Knowledge Sharing)<br>• राष्ट्रिय-ॲकेॅडमिक्-निक्षेपगृहः (National Academic Depository)<br>• ई-पाठशाला (एन्.सी.ई.आर्.टी.-सामग्रीभिः युक्ता) (ePathshala)<br>• सर्वेभ्यः कृत्रिम-बुद्धि-अभियानम् (AI for All) | **२. वित्तं विनिमयः च**<br>• एकीकृत-विनिमिय-पटलम् (UPI) (Unified Payments Interface)<br>• भीम-अनुप्रयोगः इत्यस्य माध्यमेन सचलदूरवाण्याः माध्यमेन वा सरलविनिमयः (BHIM App)<br>• आधार-सक्षम-वित्तीय-पद्धतिः (AEPS)<br>• रुपे-कार्ड्-स्वदेशी कार्ड्-प्रणाली (RuPay)<br>• ई-रूपी-डिजिटल्-वौचर्-प्रणाली (e-RUPI)<br>• जनधन-आधार-दूरवाणी-त्रयी (JAM Trinity) |
| **३. आरोग्यम्**<br>• आयुष्मान्-भारत-डिजिटल्-अभियान-स्वास्थ्य-परिचयपत्रम् (ABDM)<br>• कोविन्-कोविड्-टीकाकरण-पञ्जीकरणम् (CoWIN)<br>• ई-संजीवनी-दूरस्वास्थ्य-सेवा (eSanjeevani) | **४. शासनम्**<br>• डिजि-लॉकर्–सुरक्षित-प्रलेख-संग्रहः (Digi-Locker)<br>• मम शासनम् (जन-संवादाय) (MyGov)<br>• ई-जनपदसेवा-स्थानिकं शासनम् (eDistrict)<br>• केन्द्रीकृत-प्रतिवेदन-निस्तारण-पर्यवेक्षण-प्रणाली (CPGRAMS) |
| **५. कृषिक्षेत्रम्**<br>• ई-राष्ट्रिय-कृषि-आपणः (eNAM)<br>• प्रधानमन्त्री-किसान्-सम्माननिधिः (PM-KISAN)<br>• चल-किसान्-सन्देश-सेवा (mKisan)<br>• कृषक-सुविधा-सेवा (Kisan Suvidha) | **६. आजीविका-निपुणता**<br>• राष्ट्रिय-आजीविका-सेवा (National Career Service)<br>• निपुण-भारत-डिजिटल् (Skill India Digital)<br>• कौशल-मानचित्रण-पटलम् (ASEEM Portal)<br>• ई-निपुण-भारत-मञ्चः (eSkill India) |

| | |
|---|---|
| ७. न्यायव्यवस्था<br>• ई-न्यायालयः (eCourts)<br>• राष्ट्रिय-न्याय-सांख्यिकी-दत्तांश-गुच्छः (NJDG) | ८. परिचयः सुरक्षा च<br>• अपराध-अपराधि-प्रत्यक्षाभिज्ञान-जाल-प्रणाली (CCTNS) |
| ९. कर-प्रणाली व्यवसायः च<br>• वस्तु-सेवा-कर-पटलम् (GST Portal)<br>• सर्वकारस्य-विपणि-पटलम् (GeM Portal)<br>• उद्यम-पञ्जीकरण-पटलम् (Udyam Portal) | १०. संप्रेषणं तन्त्रज्ञानम् च<br>• डिजिटल्-भारताभियानम् (आधुनिकस्य राष्ट्रस्य सञ्जीवनी) (Digital India) |

### भारतीयज्ञानपरम्परा

- **छन्दःशास्त्रम् (पिङ्गलाचार्यः)** – पिङ्गलस्य छन्दःशास्त्रे द्व्यधिक-सङ्ख्या-व्यवस्था (Binary Number System) निरूपिता अस्ति।
- **आर्यभटीयम् (आर्यभटः)** – आर्यभटेन प्रतिपादितः दशमलव-सङ्ख्या-विधिः (Decimal System) एवञ्च स्थानिमूलक-गणना-विधिः (Place-Value Notation) आधुनिक-सङ्गणकगणनायाः मूलाधारौ स्तः।

अधिकसूचनार्थम् अधः प्रदत्तस्य क्यूआर्-कूटस्य उपयोगं कुर्वन्तु —

## परियोजनाकार्यम्

**(1) अधः प्रदत्तसम्पर्कचिह्नेन (लिङ्क् इत्यनेन) 'आशुप्रतिक्रियाकूट'-माध्यमेन (क्यूआर्-कोड्) च प्रधानमन्त्रिसङ्ग्रहालयस्य आभासीयं भ्रमणं कृत्वा भारतस्य डिजिटल्-विकासं वर्णयत – सम्पर्कचिह्नम् (लिङ्क्) : https://www.pmsangrahalaya.gov.in/virtual-tour**

**आशुप्रतिक्रियाकूटः**

**(2) छात्राः समूहेषु विभक्ताः भवेयुः, प्रत्येकं समूहः डिजिटल्-भारतस्य कस्याश्चिदपि योजनायाः प्रस्तुतिं करोतु।**

© NCERT not to be republished

सप्तमः पाठः

# मञ्जुलमञ्जूषा सुन्दरसुरभाषा



**मुनिवरविकसितकविवरविलसित-**
**मञ्जुलमञ्जूषा, सुन्दरसुरभाषा।**
**अयि मातस्तव पोषणक्षमता**
**मम वचनातीता, सुन्दरसुरभाषा॥ १॥**

**पदच्छेदः** – मुनिवर-विकसित-कविवर-विलसित-मञ्जुल-मञ्जूषा सुन्दरसुरभाषा। अयि मातः! तव पोषणक्षमता मम वचनातीता सुन्दरसुरभाषा।

**अन्वयः** – (त्वं) मुनिवरविकसितकविवरविलसितमञ्जुलमञ्जूषा सुन्दरसुरभाषा (असि)। अयि मातः! तव पोषणक्षमता मम वचनातीता अस्ति।

**भावार्थः** – संस्कृतभाषा अतीव सुन्दरभाषा देवभाषारूपेण च परिचिता अस्ति। मुनयः अस्याः संस्कृतभाषायाः विकासं कृतवन्तः। एषा भाषा भूयिष्ठानां भारतीयभाषाणां, तथा विश्वस्य बहूनां भाषाणां च जननी-भाषा (स्रोतो-भाषा) गुरुभाषा (पूरक-भाषा) वा अस्ति। बहवः कवयः काव्यरचनया अस्याः सौन्दर्यं वर्धितवन्तः। कोमलपदावल्या परिपूर्णा एषा ज्ञानपेटिका अस्ति। संस्कृतभाषा स्वपदावलिभिः अन्याः भाषाः ज्ञानं विज्ञानं च परिपोषयति। संस्कृतभाषायाः गौरवं वर्णनातीतम् अस्ति।





**वेदव्यास-वाल्मीकि-मुनीनां
कालिदास-बाणादिकवीनाम्।
पौराणिक-सामान्य-जनानां
जीवनस्य आशा, सुन्दरसुरभाषा॥ २॥**



**पदच्छेदः** – वेदव्यास-वाल्मीकि-मुनीनाम् कालिदास-बाणादिकवीनाम् पौराणिक-सामान्य-जनानाम् जीवनस्य आशा सुन्दरसुरभाषा।

**अन्वयः** – (त्वं) वेदव्यासवाल्मीकिमुनीनां कालिदास-बाणादिकवीनां पौराणिक-सामान्यजनानां जीवनस्य आशा (असि)। त्वं सुन्दरसुरभाषा (असि)।

**भावार्थः** – संस्कृतभाषा अति रमणीया भाषा अस्ति। वाल्मीकि-वेदव्यास-इत्यादयः मुनयः रामायण-महाभारत-पुराणादीन् ग्रन्थान् रचितवन्तः। कालिदास-बाणभट्ट-प्रभृतयः विशिष्टाः कवयः अपि उपादेयानि काव्यानि रचितवन्तः। प्राचीनकालाद् आरभ्य इदानीं यावत् सामान्यजनानां जीवनं संस्कृतभाषया रचितैः काव्यैः प्रभावितम् अस्ति। संस्कृतभाषा बहूनां लक्ष्याणां प्रापिका अस्ति। अतः संस्कृतभाषा सुन्दरभाषा अस्ति।





© NCERT not to be republished

श्रुतिसुखनिनदे सकलप्रमोदे
स्मृतिहितवरदे सरसविनोदे।
गति-मति-प्रेरक-काव्यविशारदे
तव संस्कृतिरेषा, सुन्दरसुरभाषा॥ ३॥

**पदच्छेदः** – श्रुतिसुखनिनदे सकलप्रमोदे स्मृतिहितवरदे सरसविनोदे गति-मति-प्रेरककाव्यविशारदे तव संस्कृतिः एषा सुन्दरसुरभाषा।

**अन्वयः** – हे! श्रुतिसुखनिनदे! सकलप्रमोदे! स्मृतिहितवरदे! सरसविनोदे! गति-मति-प्रेरक-काव्यविशारदे! तव एषा संस्कृतिः (अस्ति)। (त्वं) सुन्दरसुरभाषा (असि)।

**भावार्थः** – वस्तुतः रमणीया देवत्वविधायिनी संस्कृतभाषा संस्कृतेः जननी सदृशी अस्ति। संस्कृतभाषायाः ध्वनिश्रवणेन सुखं वर्धते, सर्वे जनाः आनन्दिताः भवन्ति। संस्कृतभाषा वररूपेण संस्कारजन्यं ज्ञानं प्रयच्छति, सरसं विनोदभावं च प्रकाशयति। मानवजीवने उत्तमां गतिं बुद्धिं च प्रददाति। काव्यशास्त्रपरिपूर्णा संस्कृतभाषा अस्माकं संस्कृतिं रक्षति प्रसारयति च।



नवरस-रुचिरालङ्कृति-धारा
वेदविषय-वेदान्त-विचारा।
वैद्य-व्योम-शास्त्रादि-विहारा
विजयते धरायां, सुन्दरसुरभाषा॥ ४॥

**पदच्छेदः** – नवरस-रुचिरा अलङ्कृति-धारा वेदविषय-वेदान्त-विचारा। वैद्य-व्योम-शास्त्रादि-विहारा विजयते धरायाम् सुन्दरसुरभाषा।

**अन्वयः** – नवरस-रुचिरा अलङ्कृतिधारा वेदविषयवेदान्तविचारा वैद्यव्योमशास्त्रादिविहारा धरायां सुन्दरसुरभाषा विजयते।

**भावार्थः** – संस्कृतकाव्यशास्त्रेषु शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-बीभत्स-अद्भुत-शान्त-प्रभृतयः नवसंख्याकाः रुचिराः रसाः सन्ति। शब्दार्थपूर्णाः विविधाः अलङ्काराः शोभन्ते। वेद-उपनिषद्-वेदान्त-पुराणादीनां विचाराः जनान् अभिप्रेरयन्ति। चिकित्साविज्ञान-खगोलशास्त्रादिभिः सह संस्कृतभाषा पृथिव्यां विहरति। एवं संस्कृतभाषा सर्वत्र विजयते।

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| विकसिता | विस्तारिता | विकसित की गई | Progressively developed | |
| विलसिता | रञ्जिता | आनन्द देने वाली | That which gives joy | |
| मञ्जुला | मनोहरा | मन को हरने वाली | Lovely / Charming | |
| मञ्जूषा | पेटिका | पेटी | Box / Encasement | |
| पोषणक्षमता | पालनशक्तिः | पोषण की क्षमता | Nurturing capacity | |
| मे | मम | मेरे | Mine | |
| अतीता | अतिक्रान्ता | पार हो | Beyond | |
| वृन्दानाम् | समूहानाम् | समूहों की | Of groups | |
| नवम् | नूतनम् | नई | New | |
| वचनातीता | वर्णनातीता | वाणी से परे | Beyond words | |
| भूयिष्ठानाम् | अधिकतराणाम् | अधिकांश | Mostly | |

© NCERT not to be republished

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| श्रुतिसुखनिनदे ! | श्रवणसुखध्वनिदात्रि ! | कर्णप्रिय ध्वनि देने वाली ! | Sound of which is pleasant to listen | |
| सकलप्रमोदे ! | सर्वेभ्यः आनन्दमयि ! | सभी को आनन्द देने वाली | That which gives pleasure to all | |
| सरसविनोदे | सरसविनोदशीले | मधुर विनोद करने वाली | That which creates pleasant humour | |
| काव्यविशारदे ! | काव्यपारङ्गते | काव्य करने में पारंगत | Oh! Proficient in Literature | |
| रुचिरा | रुचिकरा | आनन्द प्रदान करने वाली | That which gives happiness | |
| अलङ्कृतिधारा | अलङ्काराणाम् आधात्री | अलंकारों को धारण करने वाली | Well ornamented | |
| व्योमशास्त्रम् | अन्तरिक्षशास्त्रम् | अन्तरिक्ष विज्ञान | Astronomy | |
| धरायाम् | पृथिव्याम् | धरती पर | On earth | |

## अत्र इदम् अवधेयम्

परस्परसम्बद्धानां सार्थकपदानाम् एकपदीभावः समासः इति कथ्यते। प्रायेण द्वयोः ततोऽधिकानां वा पदानां संक्षिप्तीकरणं नाम समासः।

यथा, नद्याः तीरम् – नदीतीरम्, राज्ञः पुत्रः – राजपुत्रः, सुराणां भाषा – सुरभाषा, पोषणस्य क्षमता – पोषणक्षमता, वचनम् अतीता – वचनातीता, नवसंख्याकाः रसाः – नवरसाः, नवरसैः रुचिरा – नवरसरुचिरा।

समासानां विविधाः प्रभेदाः सन्ति – अव्ययीभावः, तत्पुरुषः, कर्मधारयः, द्विगुः, द्वन्द्वः, बहुव्रीहिः च इति।

अव्ययीभावसमासे प्रायः पूर्वम् अव्ययपदस्य प्रयोगः भवति। यथा – रूपस्य योग्यम् – अनुरूपम्।

तत्पुरुषसमासे परपदस्य प्राधान्यं भवति। यथा – सुराणां भाषा – सुरभाषा।

द्विगुसमासे पूर्वं संख्यावाचकपदस्य व्यवहारः भवति। यथा, पञ्चानां वटानां समाहारः – पञ्चवटी।

बहुव्रीहिसमासे अन्यपदस्य प्राधान्यं भवति। यथा, पीतम् अम्बरं यस्य सः – पीताम्बरः (श्रीविष्णुः)।

© NCERT not to be republished

## अभ्यासात् जायते सिद्धिः

**१. अधः प्रदत्तानां प्रश्नानां एकपदेन उत्तरं लिखत—**

(क) सुन्दरसुरभाषा कस्य वचनातीता? ..................................

(ख) संस्कृतभाषा कुत्र विजयते? ..................................

(ग) संस्कृतभाषा कस्य आशा? ..................................

(घ) संस्कृते कति रसाः सन्ति? ..................................

(ङ) कस्याः ध्वनिश्रवणेन सुखं वर्धते? ..................................

**२. अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखत—**

(क) संस्कृतभाषा केषां जीवनस्य आशा अस्ति?

..................................................................................................

(ख) केषां विचाराः जनान् अभिप्रेरयन्ति?

..................................................................................................

(ग) कैः रसैः समृद्धा साहित्यपरम्परा विराजते?

..................................................................................................

(घ) संस्कृतभाषा केषु शास्त्रेषु विहरति?

..................................................................................................

(ङ) संस्कृतभाषायाः कानि कानि सम्बोधनपदानि अत्र प्रयुक्तानि?

..................................................................................................

**३. रेखाङ्कितपदानि आश्रित्य प्रश्ननिर्माणं कुरुत—**

(क) मुनिगणाः संस्कृतभाषायाः विकासं कृतवन्तः। ..................................

(ख) सामान्यजनानां जीवनं काव्यैः प्रभावितम् अस्ति। ..................................

(ग) कवयः अपि उपादेयानि काव्यानि रचितवन्तः। ..................................

(घ) संस्कृतभाषा पृथिव्यां विहरति। ..................................

© NCERT not to be republished

(ङ) संस्कृतभाषा विविधभाषाः परिपोषयति। ..........................................................

(च) वेद-वेदाङ्गादीनि गभीराणि शास्त्राणि सन्ति। ..........................................................

**४. अधः प्रदत्तानां पदानाम् उदाहरणानुसारं विभक्तिं वचनं च लिखत—**

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा – | मातः | सम्बोधनम् | एकवचनम् |
| | तव | .......................... | .......................... |
| | मञ्जूषा | .......................... | .......................... |
| | संस्कृतिः | .......................... | .......................... |
| | जनानाम् | .......................... | .......................... |
| | जीवनस्य | .......................... | .......................... |
| | धरायाम् | .......................... | .......................... |
| | शास्त्रेषु | .......................... | .......................... |

**५. अधोलिखितानां पद्यांशानां यथायोग्यं मेलनं कुरुत—**

| कवर्गः | खवर्गः |
|---|---|
| (क) अयि मातस्तव पोषणक्षमता | स्मृतिहितवरदे सरसविनोदे |
| (ख) वेदव्यास-वाल्मीकि-मुनीनां | विजयते धरायाम् |
| (ग) पौराणिक-सामान्यजनानाम् | मम वचनातीता, सुन्दरसुरभाषा |
| (घ) श्रुतिसुखनिनदे सकलप्रमोदे | कालिदासबाणादिकवीनाम् |
| (ङ) वैद्यव्योम-शास्त्रादिविहारा | जीवनस्य आशा, सुन्दरसुरभाषा |

**६. उदाहरणानुसारम् अधः प्रदत्तानां पदानाम् एकपदेन अर्थं लिखत—**

यथा, देवस्य आलयः = .........देवालयः.........

(क) सुराणां भाषा = ..........................

(ख) सुन्दरी सुरभाषा = ..........................

(ग) नवरसैः रुचिरा = ..........................



© NCERT not to be republished

(घ) पोषणस्य क्षमता = ..........................

(ङ) मञ्जुला भाषा = ..........................

## ७. पेटिकातः पदानि चित्वा रिक्तस्थानानि पूरयत—

कालिदासबाणादि, आशा, संस्कृतिः, विजयते, मम, वेदविषय, मञ्जुलमञ्जूषा, सकलप्रमोदे

यथा – मुनिवर-विकसित-कविवर-विलसित- ....मञ्जुलमञ्जूषा.... सुन्दरसुरभाषा।

(क) अयि मातः तव पोषणक्षमता .......................... वचनातीता।

(ख) वेदव्यास-वाल्मीकि-मुनीनां .......................... कवीनाम्।

(ग) पौराणिक-सामान्य-जनानां जीवनस्य ..........................।

(घ) श्रुतिसुखनिनदे .......................... स्मृतिहितवरदे सरसविनोदे।

(ङ) गति-मति-प्रेरक-काव्य-विशारदे, तव .......................... एषा सुन्दरसुरभाषा।

(च) नवरस-रुचिरालङ्कृतिधारा .......................... -वेदान्तविचारा।

(छ) वैद्य-व्योम-शास्त्रादि-विहारा .......................... धरायाम्, सुन्दरसुरभाषा।

## ८. अधोलिखितविकल्पेषु प्रसङ्गानुसारम् अर्थं चिनुत—

(क) "मञ्जुलमञ्जूषा" इत्यस्य अर्थः कः?

(i) कठोरभाषा (ii) शोचनीया भाषा

(iii) मनोहररूपेण संकलिता (iv) सामान्यभाषा

(ख) सुन्दरसुरभाषा केषां जीवनस्य आशा उच्यते?

(i) केवलं कवीनाम् (ii) बालकानाम्

(iii) पौराणिक-सामान्यजनानाम् (iv) छात्राणाम्

(ग) सुन्दरसुरभाषा कुत्र विजयते?

(i) आकाशे (ii) जलधौ

(iii) धरायाम् (iv) पवने

(घ) सुन्दरसुरभाषायां किं नास्ति?

(i) शास्त्रज्ञानम् (ii) संस्कृतिः

(iii) वेदान्तचिन्तनम् (iv) अशुद्धिः



© NCERT not to be republished

(ङ) कविः सुन्दरसुरभाषां केन पदेन सम्बोधयति?

(i) पितः (ii) मातः

(iii) भ्रातः (iv) दातः

## योग्यताविस्तरः

### संस्कृतप्रशस्तयः

१. मातृभूमिः सदा सेव्या मातृभाषा तथैव च।
भारतं मातृभूमिर्नो मातृभाषा हि संस्कृतम्॥

२. भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा।
विहाय संस्कृतं नास्ति संस्कृतिः संस्कृताश्रिता॥

३. पुरुषाः संस्कृताः सन्तु महिलाः सन्तु संस्कृताः।
संस्कृतेन विचारेण राष्ट्रं भातु सुसंस्कृतम्॥

४. संस्कृतं संस्कृतेर्मूलं ज्ञानविज्ञानवारिधिः।
वेदतत्त्वार्थसञ्जुष्टं लोकालोककरं शिवम्॥

५. यावद् भारतवर्षं स्याद् यावद् विन्ध्यहिमाचलौ।
यावद् गङ्गा च गोदा च तावदेव हि संस्कृतम्॥



© NCERT not to be republished

## परियोजनाकार्यम्

**१. संस्कृतेन जीवनं कथं समृद्धं भवेत् इति अधिकृत्य 'सुन्दरसुरभाषा धरायां विजयते' इति संस्कृतनाटिकया छात्राः जागरूकाः करणीयाः।**

**२. सरलसंस्कृतगीतानां सङ्ग्रहं कुरुत कक्षायां च गायत।
यथा – सुरससुबोधा विश्वमनोज्ञा, मनसा सततं स्मरणीयम्, मृदपि च चन्दनमस्मिन् देशे, इत्यादीनि।**

**३. संस्कृतसाहित्ये प्रसिद्धानां कवीनां काव्यानां च सङ्ग्रहः करणीयः।**

अष्टमः पाठः

# पश्यत कोणमैशान्यं भारतस्य मनोहरम्

0872CH08

अरुणाचलप्रदेशः, असमः, मणिपुरं, मेघालयः, मिजोरमः, नागालैण्डं, त्रिपुरा एवञ्च सिक्किमः इत्येतानि अष्टराज्यानि देशस्य पूर्वोत्तरभागे स्थितानि। एतानि राज्यानि भारतस्य केवलं स्थानविशेषत्वेन न, अपितु सांस्कृतिक-ऐतिहासिक-विविधतायाः कारणेन विशेषमहत्त्वं वहन्ति। एषां प्रदेशानां प्राकृतिकं सौन्दर्यं, समुदायानां विविधता, भौगोलिक-पर्यावरणीयं वैचित्र्यं च देशस्य अन्येभ्यः भागेभ्यः पृथक् अस्ति। पर्वतैः नदीभिः च सुशोभितानि एतानि राज्यानि पूर्वहिमालय-श्रेणिषु पत्काई-नागपर्वत-प्रदेशे च स्थितानि। एतेषु बराक-ब्रह्मपुत्रादि-नद्यः प्रवहन्ति एवञ्च पर्वतश्रेण्यः, पीठस्थलानि, निम्नपर्वताः, उपत्यकाः च अस्मिन् भू-भागे भू-वैविध्यं धारयन्ति। प्राकृतिक-सम्पदाभिः समृद्धः अयं प्रदेशः पूर्व-दक्षिणपूर्व-एशियायाः द्वारम् अस्ति। तानि राज्यानि अष्टभ्रातृभगिन्यः इति नाम्ना प्रसिद्धानि सन्ति। तानि एव 'अष्टभगिन्यः' अथवा 'सप्तभगिन्यः एकः भ्राता च' इति कथ्यन्ते।



© NCERT not to be republished





**अध्यापिका** – सुप्रभातं छात्राः।

**छात्राः** – सुप्रभातम् आचार्ये।

**अध्यापिका** – शुभाशयाः। अद्य किं पठनीयम्?

**छात्राः** – वयं सर्वे स्वदेशस्य राज्यानां विषये ज्ञातुमिच्छामः।

**अध्यापिका** – शोभनम्। वदत, अस्माकं देशे कति राज्यानि सन्ति?

**स्वरा** – महोदये! मम भगिनी कथयति यत् अस्माकं देशे अष्टाविंशतिः राज्यानि सन्ति इति। एतद् अतिरिच्य अष्टकेन्द्रशासितप्रदेशाः अपि सन्ति।

**अध्यापिका** – शोभनं स्वरे! सम्यक् जानाति तव भगिनी। भवतु, अपि यूयं जानीथ यद् एतेषु राज्येषु अष्टराज्यानाम् एकः समवायोऽस्ति यः सप्तभगिन्यः एकः भ्राता च इति नाम्ना प्रथितः अस्ति।

**सर्वे छात्राः** – *(परस्परं साश्चर्यं पश्यन्तः)* सप्तभगिन्यः एकः भ्राता च!

**श्रीशः** – इमानि राज्यानि सप्तभगिन्यः एकः भ्राता च इति किमर्थं कथ्यन्ते?

**अध्यापिका** – प्रयोगोऽयं प्रतीकात्मको वर्तते। कदाचित् सामाजिक-सांस्कृतिक-परिदृश्यानां साम्याद् भौगोलिकवैशिष्ट्यात् च इमानि उक्तोपाधिना प्रथितानि।

**सर्वे छात्राः** – अहो! अत्यन्तं सुखकरी वार्ता। श्रावयतु तावद् यत् कानि तानि राज्यानि इति?

**अध्यापिका** –

**अद्वयं मत्रयं चैव न-त्रि-युक्तं तथाद्वयम्।**
**सप्तराज्यसमूहोऽयं भगिनीसप्तकं मतम्॥**

**तेन युक्तो लघुः भ्राता सिक्किमः इति विश्रुतः।**
**पश्यत कोणमैशान्यं भारतस्य मनोहरम्॥**



© NCERT not to be republished

इत्थं भ्रात्रा सिक्किमेन सह भगिनीसप्तके इमानि राज्यानि सन्ति – अरुणाचलप्रदेशः, असमः, मणिपुरम्, मिजोरमः, मेघालयः, नागालैण्डं, त्रिपुरा चेति। यद्यपि क्षेत्रपरिमाणैः इमानि लघूनि वर्तन्ते तथापि गुणगौरवदृष्ट्या बृहत्तराणि प्रतीयन्ते।

**सर्वे छात्राः** – कथं मान्ये!

**अध्यापिका** – भ्रात्रा सह इमाः सप्तभगिन्यः स्वीये प्राचीनेतिहासे प्रायः स्वाधीनाः एव दृष्टाः। न केनापि शासकेन इमाः स्वायत्तीकृताः। विविध-संस्कृतिविशिष्टायां भारतभूमौ एतासां भ्रातृ-भगिनीनां संस्कृतिः महत्त्वाधायिनी वर्तते।

**स्वरा** – अन्यत् किमपि वैशिष्ट्यमस्ति एतासाम्?

**अध्यापिका** – नूनम् अस्ति एव। पर्वत-वृक्ष-पुष्प-प्रभृतिभिः प्राकृतिकसम्पद्भिः सुसमृद्धानि सन्ति इमानि राज्यानि। भारतवृक्षे पुष्प-स्तबकसदृशानि विराजन्ते एतानि। अस्ति तावदेतेषां विषये किञ्चिद् वैशिष्ट्यमपि कथनीयम्। सावहितमनसा शृणुत। जनजातिबहुलप्रदेशोऽयम्। गारो-खासी-नागा-मिजो-लेप्चा-प्रभृतयः बहवः जनजातीयाः अत्र निवसन्ति। शरीरेण ऊर्जस्विनः एतत्प्रादेशिकाः बहुभाषाभिः समन्विताः, पर्वपरम्पराभिः परिपूरिताः, स्वलीला-कलासु च निष्णाताः सन्ति।




**मालती** – महोदये! तत्र तु वंशवृक्षाणां वनानि अपि प्राप्यन्ते?

**अध्यापिका** – आम्। प्रदेशेऽस्मिन् हस्तशिल्पानां बाहुल्यं वर्तते। आवस्त्राभूषणेभ्यः गृहनिर्माणपर्यन्तं प्रायः वंशवृक्षनिर्मितानां वस्तूनाम् उपयोगः क्रियते। यतो हि अत्र वंशवृक्षाणां प्राचुर्यं विद्यते। साम्प्रतं वंशोद्योगोऽयम् अन्ताराष्ट्रियख्यातिम् अवाप्तोऽस्ति।



© NCERT not to be republished

**अभिनवः** – भ्रातृ-भगिनीप्रदेशोऽयं बह्वाकर्षकः इति प्रतीयते।

**मृदुलः** – मान्ये ! किं भ्रमणाय भ्रातृ-भगिनीप्रदेशोऽयं समीचीनः ?

**सर्वेछात्राः** – (उच्चैः) महोदये ! आगामिनि अवकाशे वयं तत्रैव गन्तुमिच्छामः।

**स्वरा** – आचार्ये ! भवती अपि अस्माभिः सार्द्धं चलतु किल।

**अध्यापिका** – रोचते मेऽयं विचारः। एतानि राज्यानि तु भ्रमणार्थं स्वर्गसदृशानि सन्ति। अतः अवश्यं चलामः।

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| स्वदेशस्य | निजराष्ट्रस्य | अपने देश का | Of our country | |
| वैचित्र्यम् | विशिष्टं स्वरूपम् | विचित्रता | Uniqueness | |
| प्रवहन्ति | प्रकर्षेण वहन्ति | बहती हैं | Flows | |
| भू-वैविध्यम् | भूमेः विविधता | भूमि की विविधता | Land diversity | |
| पीठस्थलानि | खण्डस्थलानि | पठार | Plateau | |
| जानीथ | अवगच्छथ | जानते हैं | (You all)Know | |
| ऐशान्यम् | पूर्वोत्तरदिशा | पूर्वोत्तर दिशा | North-East corner | |
| ज्ञातुम् | वेदितुम् | जानने के लिए | To know | |
| भागेभ्यः | खण्डेभ्यः | भागों से | From parts | |
| समवायः | समाहारः | समूह | Combination | |
| केन्द्रशासितप्रदेशाः | प्रत्यक्षं केन्द्रशासनाधीनाः प्रदेशाः | केन्द्र द्वारा शासित प्रदेश | Union Territories | |
| अतिरिच्य | अतिरिक्तभावेन | इसके अतिरिक्त | Besides | |
| प्रथितः | प्रख्यातः | प्रसिद्ध | Famous | |
| प्रतीकात्मकः | साङ्केतिकः | प्रतीकात्मक | Symbolic | |

© NCERT not to be republished

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| साम्याद् | सादृश्याद् | समानता के कारण | Because of similarity | |
| उक्तोपाधिना | उक्तेन नाम्ना | दिए हुए नाम से | By the given name | |
| क्षेत्रपरिमाणैः | क्षेत्रफलस्य परिमाणेन | क्षेत्रफल के नाप से | By extent of area | |
| गुणगौरवदृष्ट्या | गुणस्य गौरवस्य च दृष्ट्या | गुण एवं गौरव की दृष्टि से | In terms of virtues and glory | |
| बृहत्तराणि | विशालानि | बहुत बड़े | Very significant | |
| स्वाधीनाः | स्वतन्त्राः | स्वतन्त्र | Independent | |
| स्वायत्तीकृताः | अधीनीकृताः | अपने अधीन किए गए | Captured / Autonomus | |
| प्राकृतिकसंपद्भिः | प्रकृतिजात-विभवैः | प्राकृतिक संपदाओं से | With rich natural resources | |
| पुष्पस्तबकसदृशानि | पुष्पपुञ्जसमानानि | पुष्प-गुच्छ के समान | Like flower bouquet | |
| सावहितमनसा | सावधानमनसा | ध्यानपूर्वक | With attention | |
| ऊर्जस्विनः | ऊर्जायुक्ताः | शक्तिशाली | Energetic | |
| पर्वपरम्पराभिः | उत्सवपरम्पराभिः | उत्सवों की परंपरा से | By the festive traditions | |
| परिपूरिताः | परिपूर्णाः | भरपूर | Full of | |
| स्वलीलाकलाभिः | निजकेलि-कलाभिः | अपनी लीलाओं से | by own amusements and pastimes | |
| निष्णाताः | पारङ्गताः | निपुण | Experts / Master | |
| वंशवृक्षाणाम् | वंशपादपानाम् | बाँस के वृक्षों के | Of bamboo trees | |
| बह्वाकर्षकः | अत्याकर्षकः | अत्यधिक आकर्षक | Very attractive | |

© NCERT not to be republished



## अत्र इदम् अवधेयम्

### दश दिशः

**पूर्वाग्नेयी दक्षिणा च नैर्ऋती पश्चिमा तथा।**
**वायवी चोत्तरैशानी ऊर्ध्वा चाधो दिशो दश॥**

| | | | |
|---|---|---|---|
| पूर्वा | – East | आग्नेयी | – South-East |
| दक्षिणा | – South | नैर्ऋती | – South-West |
| पश्चिमा | – West | वायवी | – North-West |
| उत्तरा | – North | ईशानी | – North-East |
| ऊर्ध्वा | – Up / High | अधः | – Down / Low |





## अभ्यासात् जायते सिद्धिः

**१. अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत—**

(क) अस्माकं देशे कति राज्यानि सन्ति? ..............................

(ख) प्राचीनेतिहासे काः स्वाधीनाः आसन्? ..............................

(ग) केषां समवायः 'सप्तभगिन्यः' इति कथ्यते? ..............................

(घ) अस्माकं देशे कति केन्द्रशासितप्रदेशाः सन्ति? ..............................

(ङ) सप्तभगिनी-प्रदेशे कः उद्योगः सर्वप्रमुखः? ..............................

**२. अधोलिखितानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखत—**

(क) भ्रातृसहित-भगिनीसप्तके कानि राज्यानि सन्ति?

..............................................................................

(ख) इमानि राज्यानि सप्तभगिन्यः इति किमर्थं कथ्यन्ते?

..............................................................................

(ग) ऐशान्यकोणप्रदेशेषु के निवसन्ति?

..............................................................................

© NCERT not to be republished



(घ) पूर्वोत्तरप्रादेशिकाः केषु निष्णाताः सन्ति?

..............................................................................................................

(ङ) वंशवृक्षवस्तूनाम् उपयोगः कुत्र क्रियते?

..............................................................................................................

**३. अधोलिखितेषु पदेषु प्रकृति-प्रत्ययविभागं कुरुत—**

| | | | |
|---|---|---|---|
| यथा – गन्तुम् | गम् | + | तुमुन् |
| (क) ज्ञातुम् | .................... | + | .................... |
| (ख) विश्रुतः | .................... | + | .................... |
| (ग) अतिरिच्य | .................... | + | .................... |
| (घ) पठनीयम् | .................... | + | .................... |

**४. रेखाङ्कितम् पदम् आधृत्य प्रश्ननिर्माणं कुरुत—**

(क) वयं <u>स्वदेशस्य</u> राज्यानां विषये ज्ञातुमिच्छामः।

..............................................................................................................

(ख) <u>सप्तभगिन्यः</u> प्राचीनेतिहासे प्रायः स्वाधीनाः एव दृष्टाः।

..............................................................................................................

(ग) प्रदेशेऽस्मिन् <u>हस्तशिल्पानां</u> बाहुल्यं वर्तते।

..............................................................................................................

(घ) एतानि राज्यानि तु भ्रमणार्थं <u>स्वर्गसदृशानि</u>।

..............................................................................................................

**५. यथानिर्देशम् उत्तरत—**

(क) 'महोदये! मम भगिनी कथयति'। अत्र 'मम' इति सर्वनामपदं कस्यै प्रयुक्तम्?

..............................................................................................................

(ख) 'सामाजिक-सांस्कृतिकपरिदृश्यानां साम्याद् इमानि उक्तोपाधिना प्रथितानि'। अस्मिन् वाक्ये प्रथितानि इति क्रियापदस्य कर्तृपदं किम्?

..............................................................................................................



© NCERT not to be republished

(ग) 'एतेषां राज्यानां पुनः सङ्घटनं विहितम्'। अत्र 'सङ्घटनम्' इति कर्तृपदस्य क्रियापदं किम्?

.......................................................................................................................

(घ) 'अत्र वंशवृक्षाणां प्राचुर्यं विद्यते'। अस्मात् वाक्यात् 'अल्पता' इति पदस्य विपरीतार्थकं पदं चित्वा लिखत?

.......................................................................................................................

(ङ) 'क्षेत्रपरिमाणैः इमानि लघूनि वर्तन्ते'। अस्मिन् वाक्ये 'सन्ति' इति क्रियापदस्य किं समानार्थकं पदं प्रयुक्तम्?

.......................................................................................................................

**६. अधः शब्दजालं प्रदत्तम् अस्ति। अस्मिन् उपरितः अधः, वामतः दक्षिणं चेति आधारं कृत्वा सार्थक-शब्दान् रेखाङ्कयत—**



**वर्गचित्र-जालम्**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ज | न | जा | तिः | म | त्रि | खा | सी |
| च | अ | र | सि | णि | पु | ना | गा |
| भ्रा | ता | स | क्कि | पु | रा | ज्या | नि |
| मि | जो | र | मः | र | सं | स्कृ | तिः |
| पू | र्वो | त्त | र | म् | दे | श | स्य |
| ब | स | म्र | भ | गि | न्यः | गा | रो |
| प्रा | कृ | ति | कः | वं | श | वृ | क्षः |
| भ | गि | नि | अ | रु | णा | च | लः |
| भ्रा | ता | मे | घा | ल | यः | ध | मि |
| ना | गा | लै | ण्डम् | ब | ह | वः | जोः |



© NCERT not to be republished

७. **पट्टिकातः पदानि चित्वा रिक्तस्थानानि पूरयत—**

सिक्किमः, पूर्वोत्तरराज्यानि, अष्टाविंशतिः, स्वदेशस्य राज्यानाम्, अरुणाचलप्रदेशः, असमः, मणिपुरं, मिजोरमः, मेघालयः, नागालैण्डं, त्रिपुरा, जनजातिः, प्राचुर्यम्

(क) छात्राः अद्य .......................... विषये ज्ञातुमिच्छन्ति।

(ख) अस्माकं देशे .......................... राज्यानि तथा अष्ट केन्द्रशासितप्रदेशाः सन्ति।

(ग) सप्तभगिन्यः एकः भ्राता च इति .......................... कथ्यन्ते।

(घ) सप्तभगिन्यः इत्युक्तानि राज्यानि – .........................., .........................., .........................., .........................., .........................., .........................., ..........................।

(ङ) प्रदेशेऽस्मिन् .......................... बाहुल्यम् अस्ति।

(छ) पूर्वोत्तरराज्येषु वंशवृक्षाणां .......................... विद्यते।

८. **भिन्नप्रकृतिकं पदं चिनुत—**

(क) गच्छति, पठति, धावति, अहसत्, क्रीडति

..........................................................................................

(ख) छात्रः, सेवकः, शिक्षकः, लेखिका, क्रीडकः

..........................................................................................

(ग) पत्रम्, मित्रम्, पुष्पम्, आम्रः, फलम्

..........................................................................................

(घ) व्याघ्रः, भल्लूकः, गजः, कपोतः, शाखा, वृषभः, सिंहः

..........................................................................................

(ङ) पृथिवी, वसुन्धरा, धरित्री, यानम्, वसुधा

..........................................................................................

© NCERT not to be republished

९. **विशेष्य-विशेषणानाम् उचितं मेलनं कुरुत —**

| विशेषण-पदानि | विशेष्य-पदानि |
|---|---|
| अयम् | संस्कृतिः |
| संस्कृतिविशिष्टायाम् | इतिहासे |
| महत्त्वाधायिनी | प्रदेशः |
| प्राचीने | समवायः |
| एकः | भारतभूमौ |

## योग्यताविस्तरः

- पत्काई इति भारतस्य पूर्वोत्तरभागे बर्मादेशेन सह सीमावर्तिक्षेत्रे स्थिता पर्वतशृङ्खला अस्ति।
- बराकनदी भारतस्य मणिपुरं, नागालैण्डं, मिजोरमः, असमः चेति राज्येषु एवञ्च बङ्गलादेशे वहन्ती ९०० कि.मी. दीर्घा नदी अस्ति।
- गारोपर्वतः, खासीपर्वतः, जयन्तियापर्वतः च उत्तरपूर्वीयपीठस्थले स्थिताः त्रयः पर्वतशृङ्खलाः सन्ति।
- मेघालयपीठस्थले कृष्णहीरकः (कोयला), लौह-अयस्कः, सिलिमेनाइटः, क्षारशिला, यूरेनियम इत्यादयः खनिजसम्पदः प्रचुरं विद्यन्ते।
- सप्तभगिन्यन्तर्गतप्रदेशानाम् उल्लेखः महाभारतं, रामायणं, पुराणानि इति प्राचीनग्रन्थेषु अपि उपलभ्यते।

| क्र. सं. | राज्यम् | राजधानी | राजभाषा | अन्याः भाषाः | स्रोतांसि |
|---|---|---|---|---|---|
| 1. | अरुणाचल-प्रदेशः | ईटानगरम् | आङ्ग्लभाषा | न्यीशी, दाफला, मिजी, गल्लोंगः, वंछो, तागिनः, हिल-मिरी, मोहपा, नाक्टी, आकः, तांग्सा, खम्ती इत्यादयः | www.mdoner.gov.in/about-north-east/arunachal-pradesh |



© NCERT not to be republished

| | | | | | |
|---|---|---|---|---|---|
| 2. | असमः | दिसपुरम् | असमिया, बङ्गला, बोडो, आङ्ग्लभाषा च | बङ्गला, डिमासा, मिशिंगः, कार्बी, रम्भा, तिनुआ, ताई-फाके, ताई-ऐतों, ताई-खम्ती | www.assam.gov.in |
| 3. | मणिपुरम् | इम्फालः | मणिपुरी | तंगखुलः, हम्मरः, पैते, लुशाई, थादौ / कुकी | www.manipur.gov.in |
| 4. | मेघालयः | शिलांगः | खासी, पुआरः, गारो आङ्ग्लभाषा च | अबेङ्गः रेन्घा वा, अलोंगः, अकरवे (अल्वे वा) मच्चि, दुअलः, उइबोक्, चिसकः, मेगामः, लिङ्गोजमः वा, रुगा, गाओ-गंचिंगः पुआन् ख्यानीराम भोई पुआइ च वारः | www.meghalaya.gov.in |
| 5. | मिजोरमः | आइजोलः | मिज़ो, आङ्ग्लभाषा च | असो, छो, हलमः, 'हिनारः', लाई, लुसेई, मारा, मिउ-खुमी, पैते थाडो-कुकी च | www.mizoram.gov.in |
| 6. | नागालैण्डम् | कोहिमा | आङ्ग्लभाषा | 'नागामी', असमिया, 'बङ्गला' च | www.nagaland.gov.in |
| 7. | त्रिपुरा | अगरतला | आङ्ग्लभाषा बङ्गला च | 'कक-बरकः' 'त्रिपुरी' वा, हलम्, रङ्खालः चकमा च | www.tripura.gov.in |
| 8. | सिक्किमः | गङ्गटोकः | आङ्ग्लभाषा | नेपाली, भूतिया, लेप्चा, लिम्बू, नेवारी, राय, गुरुंग, मंगाई, शेर्पा, तामांगः सुनवरः च | www.sikkim.gov.in |

सप्तभगिन्यः इति प्रथितः राज्यसमूहः प्राकृतिकसौन्दर्येण अतिविशिष्टः। प्रत्येकं राज्यस्य अपि स्वकीयं महत्त्वम् अस्ति, भारते अरुणाचलप्रदेशे सूर्यस्य अरुणोदयः सर्वप्रथमं भवति, अतः अरुणाचलः। अत्र तादृशः प्रदेशः अपि अस्ति यत्र आवर्षं हिमपातः भवति।

असमराज्यं पूर्वं कामरूपमिति नाम्ना प्रसिद्धम्। अस्मिन् खनिजं इन्धनतैलं, इन्धनानिलः (CNG) च प्रचुरमात्रया दृश्यते। लोके बृहत्तमः रमणीयः नदीद्वीपः माजुली असमे ब्रह्मपुत्रनदे स्थितः अस्ति। मणिपुरस्य उल्लेखः तु महाभारतादिग्रन्थेषु अपि लभ्यते। अत्र सम्पूर्णे विश्वे एकमात्रं राष्ट्रियं प्लवमानम् उद्यानम् अस्ति। इदं लोकटक-सरोवरे प्लवते। मिजोरम्, सिक्किम, मेघालय, त्रिपुरा राज्यानामपि सन्ति वैशिष्ट्यानि।

© NCERT not to be republished

## परियोजनाकार्यम्

१. **"पश्यत कोणमैशान्यं भारतस्य मनोहरम्" इति पाठस्य सन्दर्भे भित्तिपत्रे उत्तरपूर्वराज्यानां पृथक् पृथक् मानचित्रं प्रदर्शयत। संस्कृतभाषया कस्यापि राज्यस्य पञ्चवाक्यैः विवरणं लिखत।**

उदाहरणम्—

**नागालैण्डम्** – होर्न्बिल्-महोत्सवः अत्र प्रसिद्धः।

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................




२. **पूर्वोत्तरराज्यानां पर्यटनस्थलानां नामानि लिखित्वा तेषां संक्षिप्तं वर्णनं कुरुत।**

उदाहरणम्—

राज्यम् – असमः

नाम – काजीरङ्गा राष्ट्रियम् अभयारण्यम्

वर्णनम् – अत्र एकशृङ्गगजाः दृश्यन्ते। एतत् यूनेस्को-विश्व-प्रत्नकीर्ति-स्थलम् अस्ति।

३. **विद्यालये 'उत्तरपूर्वसंस्कृतिदिवसः' (एकः विशेषः दिवसः) आयोजनीयः। छात्राः विविधराज्यानां परिधानं नृत्यं भोजनं वेशभूषां च प्रस्तुवन्तु। सम्पूर्णः कार्यक्रमः संस्कृत-संवाद-माध्यमेन एव करणीयः।**



© NCERT not to be republished

## नवमः पाठः

# कोऽरुक्? कोऽरुक्? कोऽरुक्?

0872CH09




© NCERT not to be republished

'भारतवर्षे वैद्याः विभिन्नानां व्याधीनां शमनं कथं कुर्वन्ति' इति ज्ञातुं पुरा भगवान् धन्वन्तरिः मनोहरं शुकरूपं धृत्वा प्रतिग्रामम् अभ्रमत्। भ्रमणकाले सः बहूनां प्रख्यातवैद्यानां भवनपार्श्वस्थे वृक्षे उपविश्य **'कोऽरुक्'** **'कोऽरुक्'** **'कोऽरुक्'** इति ध्वनिम् अकरोत्। किन्तु खगस्य **'कोऽरुक्'** इति शब्दं प्रति कस्यापि अवधानं नासीत्।



अन्ते सः वैद्यस्य वाग्भटस्य कुटीरसमीपं गतवान्। तत्र विशाले प्राङ्गणे स्थितं पुष्पतरुम् आरुह्य मधुरया गिरा **'कोऽरुक्'** **'कोऽरुक्'** **'कोऽरुक्'** इति शब्दम् अकरोत्। मधुरां वाणीं श्रुत्वा चिकित्सानिरतः वाग्भटः प्राङ्गणम् आगत्य सर्वासु दिक्षु अपश्यत्। क्षणात् वाग्भटः मनोहरं तं शुकम् अपश्यत्। सार्थकं मानुषध्वनिं कुर्वन्तं शुकं दृष्ट्वा विस्मितः वाग्भटः चिन्तितवान् – "नायं लौकिकः खगः। एषः निश्चयेन कश्चन देवविशेषः अस्ति"। सः झटिति तस्मै विहगाय मधुराणि फलानि समर्पितवान् परन्तु सः खगः फलानि



© not to be republished NCERT

न गृहीत्वा पुनरपि तथैव 'कोऽरुक्' 'कोऽरुक्' 'कोऽरुक्' इति प्रश्नस्वरेण शब्दमकरोत्। अथ वैद्यः वाग्भटः अचिन्तयत् यत् यावत् खगः स्वप्रश्नानाम् उत्तराणि न प्राप्नोति तावत् अयं भोजनं न वाञ्छति इति। ततः सः अचिरादेव सूत्ररूपाणि त्रीणि उत्तराणि प्राददात् – '**हितभुक्**' '**मितभुक्**' '**ऋतुभुक्**' इति। समुचितम् उत्तरं श्रुत्वा अत्यन्तं प्रीतः सः शुकः वाग्भटेन अर्पितानि फलानि खादितवान्।

ततः शुकरूपः धन्वन्तरिः वाग्भटम् उक्तवान् – "वत्स! अहं धन्वन्तरिः अस्मि। उत्तमस्य वैद्यस्य अन्वेषणाय भारतवर्षे सर्वत्र परिभ्रमन् अत्र समागतः। तव उत्कृष्टेन आयुर्वेदज्ञानेन अहम् अतीव सन्तुष्टः अस्मि। त्वम् अवश्यमेव आयुर्वेद-अष्टाङ्गविचार-सारभूतं तन्त्रं विरचयेः" एतद् उक्त्वा सः अन्तर्हितः।

एतत् सर्वं दूरात् पश्यन्तः विस्मिताः शिष्याः आचार्यवाग्भटस्य समीपम् आगत्य अपृच्छन् – "गुरुवर! शुकः '**कोऽरुक् कोऽरुक् कोऽरुक्**' इति उक्तवान्, तस्य कोऽर्थः? अपि च भवान् किम् उत्तरं दत्तवान्?" तदा वाग्भटः छात्राणां जिज्ञासाम् उपशमयन् कथयति – "छात्राः, शृणुत! एषः शुकः वदति यत् कः अरुक् अर्थात् कः स्वस्थः नीरोगः वा वर्तते? तदा मया उक्तम् – 'यः **हितभुक्**, **मितभुक्**, **ऋतुभुक्** च, सः एव सर्वदा स्वस्थः भवति'।" छात्राः पुनः जिज्ञासया अपृच्छन् "आचार्य! '**हितभुक्**, **मितभुक्**, **ऋतुभुक्**' इति – एतेषां कः आशयः?" वाग्भटः वदति – "शिष्याः! महर्षेः चरकस्य नाम भवन्तः श्रुतवन्तः स्युः। सः हितभुक्-विषये कथयति —

**तच्च नित्यं प्रयुञ्जीत स्वास्थ्यं येनानुवर्तते।**
**अजातानां विकाराणामनुत्पत्तिकरं च यत्॥ १॥**



© NCERT not to be republished

अर्थात् यस्य आहारस्य सेवनेन स्वास्थ्यस्य रक्षणं भवेत्, न जातानाम् अर्थात् अनुत्पन्नानां विकाराणाम् उत्पत्तिः न भवेत्, तादृशः आहारः सेवनीयः।

मितभुक्-विषये कथयति आचार्यः —

**अल्पादाने गुरूणां च लघूनां चातिसेवने।**
**मात्राकारणमुद्दिष्टं द्रव्याणां गुरुलाघवे॥ २॥**

अर्थात् गरिष्ठद्रव्याणि अपि अल्पमात्रं सेवनेन सुपाच्यानि भवन्ति, लघुद्रव्याणि चापि अतिमात्रं सेवनेन हानिकराणि जायन्ते। अतः मात्रानुसारम् एव खादितव्यम्।

एवमेव ऋतुभुक्-विषये उच्यते —

**तस्याशिताद्यादाहारात् बलं वर्णश्च वर्धते।**
**तस्यर्तुसात्म्यं विदितं चेष्टाहारव्यपाश्रयम्॥ ३॥**



अर्थात् ग्रीष्मः, वर्षा, शरद्, शिशिरः, हेमन्तः, वसन्तः चेति षट् ऋतवः भवन्ति। यः पुरुषः ऋतूनाम् अनुकूलं स्वास्थ्यप्रदम् आहारसेवनं जानाति तदनुसारम् आचरणं च करोति तस्य जनस्य अशितम् अर्थात् भुक्तं पीतं च सर्वमपि बलवर्धकं, वर्णकान्तिजनकं, सुखवर्धकम्, आयुर्वर्धकञ्च भवति। अतः ऋतोः अनुसारं भोक्तव्यम् इति। नियमितरूपेण समयानुसारं सात्त्विकं भोजनम् आवश्यकमिति ऋतुभुक्-पदेन ज्ञायते।”

एतत् सर्वं श्रुत्वा कश्चन छात्रः वाग्भटम् अपृच्छत् – "आचार्य! हितभुगादिविषये वयं तु ज्ञातवन्तः, किन्तु किं सः शुकः सन्तुष्टः अभवत्"? तदा वाग्भटः शुकस्य रहस्यम् उक्तवान् – "प्रियशिष्याः! अयं विहगः न सामान्यविहगः, अपि तु आयुर्वेदस्य पूज्यः देवः भगवान् धन्वन्तरिः एव स्वयं शुकरूपेण अत्र आगच्छत्। अस्माकं कृते संक्षेपेण स्वास्थ्यरक्षणाय सूत्ररूपेण सन्देशं च प्रदत्तवान्, भवन्तः अपि शृण्वन्तु स्मरन्तु च—

**व्यायामः प्रातरुत्थाय, नित्यं दन्तविशोधनम्।**
**स्वच्छजलेन सुस्नानं, बुभुक्षायाञ्च भोजनम्॥ ४॥**

अस्माकम् ऋषयः नित्यं प्रार्थनाम् अपि कुर्वन्ति। वयमपि स्मरामः—

**सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्॥ ५॥"**

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| निरामयाः | नीरोगिणः | स्वस्थ | Healthy | |
| अरुक् | स्वस्थः | नीरोग | One who is not sick | |
| झटिति | शीघ्रमेव | शीघ्र | Quickly | |
| हितभुक् | यः हितकरं खादति | हितकारक खाने वाला | One who eats nutritious food | |
| मितभुक् | यः आवश्यक-मात्रा- अनुसारं भोजनं खादति | सीमित मात्रा में भोजन करने वाला | One who eats food in limited quantity | |
| ऋतुभुक् | यः ऋत्वनुकूलं पथ्यं भोजनं करोति | ऋतु के अनुसार उपयुक्त भोजन करने वाला | One who eats food which is appropriate as per season | |

© NCERT not to be republished

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| प्रयुञ्जीत | प्रयोगं कुर्यात् | प्रयोग करे | Should take | |
| अनुवर्तते | अनुसरति | अनुसरण करता है | Follows | |
| अजातानाम् | न उत्पन्नानाम् | जो पैदा नहीं हुए उनको | Of those who are not born | |
| अनुत्पत्तिकरम् | यत् (विकारान्) न उत्पादयति | जो (विकारों) को उत्पन्न न करे | That which may not cause (harm) | |
| लघूनाम् | सुपाच्यानाम् | सुपाच्य खाद्यों का | Of digestible food | |
| उद्दिष्टम् | उल्लिखितम् | बताया गया है | Which has been instructed | |
| गरिष्ठम् | यत् कठिनतया पच्यते | जो कठिनता से पचे | Difficult to digest | |
| अतिमात्रम् | मात्रायाः आधिक्यम् | अत्यधिक मात्रा से | In excessive quantity | |
| अशिताद्यात् | भुक्तात् | खाए हुए से | From eaten food | |
| व्यपाश्रयम् | आश्रयस्थानम् | अवलम्ब | Depending | |
| वर्णकान्तिजनकम् | वर्णस्य सौन्दर्यस्य च उत्पादकम् | रूप रंग निखारने वाला | that which enhances the beauty and complexion | |
| बुभुक्षायाम् | क्षुधायाम् | भूख लगने पर | On feeling hungry | |

© NCERT not to be republished

## इदम् अत्र अवधेयम्

१. **विशेषणम्** – यत् पदं कस्यचित् विशेषतां सूचयति तत् **विशेषणम्** इति उच्यते।
यथा – अस्मिन् पाठे 'उत्तमाः', 'मनोहरम्' इत्यादयः शब्दाः विशेषतां प्रकटयन्ति अतः एते शब्दाः **विशेषणम्** इति उच्यन्ते।

२. **विशेष्यम्** – यत् पदं मुख्यतया विशेषरूपेण उच्यते तत् पदं **विशेष्यं** भवति।
यथा – 'उत्तमाः वैद्याः' अत्र 'वैद्यस्य' विशेषता उक्ता। अतः अत्र 'वैद्याः' इति **विशेष्य-पदं** वर्तते।

३. **विशेष्य-विशेषणयोः सम्बन्धः —**

(क) विशेष्यस्य यत् लिङ्गं भवति तत् एव लिङ्गं विशेषणस्य अपि भवति।

यथा – लौकिकः खगः। अत्र 'खगः' इति विशेष्यपदं पुंलिङ्गम् अस्ति। अतः लौकिकः इति विशेषणपदमपि पुंलिङ्गम् एव।

(ख) विशेष्यस्य यत् वचनं भवति तदेव वचनं विशेषणस्य अपि भवति।

यथा – उत्तमाः वैद्याः। अत्र 'वैद्याः' इति विशेष्यपदं बहुवचने वर्तते, अतः उत्तमाः इति विशेषणपदमपि बहुवचने एव भविष्यति।

(ग) विशेष्यस्य या विभक्तिः सा एव विभक्तिः विशेषणस्य अपि भवति।

यथा – मधुरां वाणीम्। अत्र 'वाणीम्' इति विशेष्यपदं द्वितीयाविभक्तौ वर्तते, अतः 'मधुराम्' इति विशेषणपदमपि द्वितीयाविभक्तौ एव भविष्यति।

**यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य।**
**तल्लिङ्गं तद्वचनं सा च विभक्तिर्विशेषणस्यापि॥**

- **अस्यां सारिण्यां केषाञ्चन विशेषणपदानां त्रिषु लिङ्गेषु प्रयोगः दर्शितः। एतान् पठत।**

| शब्दः | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| उत्तम | उत्तमः | उत्तमा | उत्तमम् |
| मनोहर | मनोहरः | मनोहरा | मनोहरम् |
| विस्मित | विस्मितः | विस्मिता | विस्मितम् |
| उत्कृष्ट | उत्कृष्टः | उत्कृष्टा | उत्कृष्टम् |
| एक | एकः | एका | एकम् |

- **अस्यां सारिण्यां केषाञ्चन विशेषण-विशेष्यपदानां वाक्यप्रयोगः दर्शितः।**

| पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|
| उत्तमः बालकः | उत्तमा बालिका | उत्तमं गृहम् |
| मनोहरः पर्वतः | मनोहरा वाटिका | मनोहरम् उद्यानम् |
| उत्कृष्टः लेखकः | उत्कृष्टा लेखिका | उत्कृष्टं पुस्तकम् |
| एकः विद्यालयः | एका पाकशाला | एकं चित्रम् |



© NCERT not to be republished

## अभ्यासात् जायते सिद्धिः

**१. अधोलिखितान् प्रश्नान् एकपदेन उत्तरत—**

(क) शुकरूपं कः धृतवान्? ..................................................

(ख) धन्वन्तरिः (शुकः) कुत्र उपविश्य ध्वनिम् अकरोत्? ..................................................

(ग) अन्ते शुकः कस्य आश्रमस्य समीपं गतवान्? ..................................................

(घ) ऋतवः कति सन्ति? ..................................................

(ङ) वाग्भटः शुकस्य रहस्यं केभ्यः उक्तवान्? ..................................................

**२. पट्टिकातः उचितानि पदानि चित्वा रिक्तस्थानानि पूरयत—**

चरकस्य, कुटीरसमीपं, भारतवर्षे, आयुर्वेदज्ञानेन, अतिमात्रं

(क) .................................... जनाः कथं निरामयाः भवन्ति?

(ख) अन्ते सः वैद्यस्य वाग्भटस्य .................................... गतवान्।

(ग) तव उत्कृष्टेन .................................... अहम् अतीव सन्तुष्टः अस्मि।

(घ) महर्षेः .................................... नाम भवन्तः श्रुतवन्तः स्युः।

(ङ) लघुद्रव्याणि .................................... सेवनेन हानिकराणि जायन्ते।



**३. अधोलिखितानां प्रश्नानां पूर्णवाक्येन उत्तराणि लिखत—**

(क) मधुरां वाणीं श्रुत्वा चिकित्सानिरतः वाग्भटः किम् अकरोत्?

..........................................................................................................................

(ख) वाग्भटः झटिति किम् अकरोत्?

..........................................................................................................................

(ग) छात्राः पुनः जिज्ञासया आचार्यं किम् अपृच्छन्?

..........................................................................................................................

(घ) भगवान् धन्वन्तरिः अस्माकं कृते संक्षेपेण किं प्रदत्तवान्?

..........................................................................................................................

(ङ) ऋषयः नित्यं कां प्रार्थनां कुर्वन्ति?

..........................................................................................................................

© NCERT not to be republished

४. **पाठात् यथोचितानि विशेषणपदानि विशेष्यपदानि वा चित्वा रिक्तस्थानानि पूरयत—**

| विशेषणम् | विशेष्यम् | विशेषणम् | विशेष्यम् |
|---|---|---|---|
| विभिन्नानाम् | व्याधीनाम् | ............................ | वैद्याः |
| मनोहरम् | ............................ | ............................ | वृक्षे |
| ............................ | प्राङ्गणे | ............................ | वाणीम् |
| ............................ | वाग्भटः | लौकिकः | ............................ |
| मधुराणि | ............................ | समुचितम् | ............................ |
| ............................ | वैद्यस्य | ............................ | शिष्याः |
| महर्षेः | ............................ | सात्त्विकम् | ............................ |

५. **पाठं पठित्वा अधोलिखितपट्टिकातः पदानि चित्वा उचितसञ्चिकायां पूरयत—**

लौकिकः, व्याधीनाम्, देवः, वृक्षे, त्रीणि, उत्तमस्य, वाणीम्, विस्मितः, मधुरया, प्रश्नान्, पूज्यः, खगः, विशाले, शुकम्, वाग्भटः

| विशेषणपदानि | विशेष्यपदानि |
|---|---|
| लौकिकः | व्याधीनाम् |
| | |
| | |
| | |
| | |
| | |
| | |
| | |
| | |
| | |
| | |
| | |
| | |





© NCERT not to be republished

६. **अधोलिखितानि वाक्यानि पठित्वा तेन सम्बद्धं श्लोकं पाठात् चित्वा लिखत—**

(क) अस्माभिः नित्यं व्यायामः, स्नानं, दन्तधावनं, बुभुक्षायाञ्च भोजनं कर्तव्यम्।

..............................................................................................................

..............................................................................................................

(ख) अस्माभिः हितकरः आहारः सेवनीयः येन विकाराणां शमनं स्वास्थ्यस्य च रक्षणं भवेत्।

..............................................................................................................

..............................................................................................................

(ग) ऋतोः अनुसारं भोजनेन बलस्य वर्णस्य च अभिवृद्धिः भवति।

..............................................................................................................

..............................................................................................................

## योग्यताविस्तरः

**(क) श्लोकानां पदच्छेदः अन्वयः च—**

**तच्च नित्यं प्रयुञ्जीत, स्वास्थ्यं येनानुवर्तते।**
**अजातानां विकाराणामनुत्पत्तिकरं च यत्॥ १ ॥**

**पदच्छेदः** – तत् च नित्यम् प्रयुञ्जीत स्वास्थ्यम् येन अनुवर्तते, अजातानाम् विकाराणाम् अनुत्पत्तिकरम् च यत्।

**अन्वयः** – अजातानां विकाराणां च यत् अनुत्पत्तिकरं, येन स्वास्थ्यम् अनुवर्तते च तत् नित्यं प्रयुञ्जीत।

**भावार्थः** – अर्थात् यस्य आहारस्य सेवनेन स्वास्थ्यस्य रक्षणं भवेत्, न जातानाम् अर्थात् अनुत्पन्नानां विकाराणाम् उत्पत्तिः न भवेत्, तादृशः आहारः सेवनीयः।

© NCERT not to be republished

**अल्पादाने गुरूणां च लघूनां चातिसेवने।**

**मात्राकारणमुद्दिष्टं द्रव्याणां गुरुलाघवे॥ २॥**

**पदच्छेदः** – अल्पादाने गुरूणाम् च लघूनाम् च अतिसेवने मात्राकारणम् उद्दिष्टम् द्रव्याणाम् गुरुलाघवे।

**अन्वयः** – गुरूणाम् (द्रव्याणाम्) अल्पादाने (हितं भवति) लघूनां (द्रव्याणां) च अतिसेवने (हानिः भवति)। गुरुलाघवे (भोजनग्रहणे) द्रव्याणां मात्रा कारणम् उद्दिष्टम् (अस्ति)।

**भावार्थः** – अर्थात् गरिष्ठद्रव्याणि अपि अल्पमात्रं सेवनेन सुपाच्यानि भवन्ति, लघुद्रव्याणि च अतिमात्रं सेवनेन हानिकराणि जायन्ते। अतः मात्रानुसारम् एव खादितव्यम्।

**तस्याशिताद्यादाहारात् बलं वर्णश्च वर्धते।**

**तस्यर्तुसात्म्यं विदितम् चेष्टाहारव्यपाश्रयम्॥ ३॥**

**पदच्छेदः** – तस्य अशिताद्यात् आहारात् बलम् वर्णः च वर्धते, तस्य ऋतुसात्म्यम् विदितम्, चेष्टा-आहार-व्यपाश्रयम्।

**अन्वयः** – तस्य (जनस्य) अशिताद्यात् आहारात् बलं वर्णः च वर्धते। तस्य चेष्टा आहारव्यपाश्रयम् ऋतुसात्म्यं विदितम् (भोक्तव्यम्)।

**भावार्थः** – वसन्तः, ग्रीष्मः, वर्षा, शरद्, हेमन्तः शिशिरः, चेति षट् ऋतवः भवन्ति। यः पुरुषः ऋतूनाम् अनुकूलं स्वास्थ्यप्रदम् आहारसेवनं जानाति, तदनुसारं च आचरणं करोति, तस्य जनस्य अशितम् अर्थात् भुक्तं पीतं च सर्वमपि बलवर्धकं, वर्णकान्तिजनकं, सुखवर्धकम् आयुर्वर्धकञ्च भवति। अतः ऋतोः अनुसारं भोक्तव्यम् इति। नियमित-भावेन समयानुसारं सात्त्विकभोजनम् आवश्यकम् इति ऋतुभुक् इति पदस्य भावः।

**व्यायामः प्रातरुत्थाय, नित्यं दन्तविशोधनम्।**

**स्वच्छजलेन सुस्नानं, बुभुक्षायाञ्च भोजनम्॥ ४॥**

**पदच्छेदः** – व्यायामः प्रातः उत्थाय नित्यम् दन्तविशोधनम् स्वच्छजलेन सुस्नानम् बुभुक्षायाम् च भोजनम्।

**अन्वयः** – नित्यं प्रातः उत्थाय व्यायामः (करणीयः) दन्तविशोधनं (कर्त्तव्यम्) स्वच्छजलेन सुस्नानं (कार्यम्) बुभुक्षायां (जातायां) भोजनं च (कर्त्तव्यम्)।

© NCERT not to be republished

**भावार्थः** – प्रतिदिनं प्रातः एव जागरणं कुर्यात्, ततः परं व्यायामः करणीयः। पुनः सम्यक्तया दन्तमार्जनं करणीयम्। स्वच्छजलेन उत्तमरीत्या स्नानं कर्त्तव्यम्। यदा उदरे बुभुक्षा भवति तदा एव हितकरं स्वल्पं तथा ऋत्वनुकूलं भोजनं ग्रहणीयम्।

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्॥ ५॥**

**पदच्छेदः** – सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।

**अन्वयः** – सर्वे सुखिनः भवन्तु, सर्वे निरामयाः सन्तु। सर्वे भद्राणि पश्यन्तु, कश्चिद् दुःखभाक् मा भवेत्।

**भावार्थः** – संसारे सर्वे सुखेन निवसेयुः, ते नीरोगिणः च भवेयुः। ते परस्परं समभावेन उत्तमविचारैः च विचारयेयुः। तेषां कल्याणं भवेत्। कश्चिद् अपि जनः कदापि दुःखं न प्राप्नुयात्। वस्तुतः सर्वे नियमित-हितकर-भोजनेन रोगमुक्ताः भवेयुः।

### (ख) चरकसंहितायाः परिचयः —

महर्षिः चरकः चरकसंहिताग्रन्थं रचितवान्। चरकसंहिता इति आयुर्वेदस्य प्रमुखः ग्रन्थः अस्ति। अस्मिन् ग्रन्थे 'सूत्रस्थानं, निदानस्थानं, विमानस्थानं, शरीरस्थानम्, इन्द्रियस्थानं, चिकित्सास्थानं, कल्पस्थानं, सिद्धिस्थानं' चेति अष्टस्थानानि सन्ति। अत्र न केवलं रोगाणां चिकित्सा एव वर्णिता, अपितु स्वास्थ्यस्य संरक्षणार्थम् आयुषः च संवर्धनार्थम् उपायाः अपि निर्दिष्टाः।

### (ग) आहारपरिचयः —

**सात्त्विकः आहारः**

**आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।**
**रस्याः स्निग्धाः स्थिरा हृद्याः आहाराः सात्त्विकप्रियाः॥**

*(श्रीमद्-भगवद्गीता १७/८)*

**भावार्थः** – खाद्यं विना जीवनधारणं सम्भवं नास्ति। भगवता प्रदत्तं शरीरम् आहारेण पुष्टं भूत्वा कर्मकरणाय समर्थं स्यात्। मानवस्य कृते ये सात्त्विकाहाराः भवन्ति, ते श्लोकेऽस्मिन् प्रदत्ताः। ये आहाराः आयुषः वर्द्धकाः, बुद्धिप्रदायकाः, बलकारकाः, आरोग्यप्रदाः,

© NCERT not to be republished

सुखदाः, प्रीतिगुणयुक्ताः, रसयुक्ताः, स्निग्धगुणपरिपूर्णाः, खाद्यसारपरिपूरिताः च ते आहाराः स्वभावतः सात्त्विकजनानां प्रियाः भवन्ति। अतः आरोग्यार्थं सात्त्विकः आहारः सेवनीयः।

### राजसिकः आहारः

**कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः**
**आहारा राजसस्येष्टा दुःखशोकामयप्रदाः॥**

(*श्रीमद्भगवद्गीता १७/९*)

**भावार्थः** – अतिकटुः, अत्यम्लः, अतिलवणः, अत्युष्णः, अतितीक्ष्णः, अतिरूक्षः, अतिविदाही च आहारः राजसजनानां प्रियः भवति। एतस्य आहारस्य सेवनेन अनेके व्याधयः भवन्ति। एतस्य सेवनेन मनुष्यः दुःखं शोकं च प्राप्नोति। अतः हितम् इच्छन् छात्रः कदापि एतस्य आहारस्य सेवनं न कुर्यात्।

### तामसिकः आहारः

**यातयामं गतरसं पूतिं पर्युषितं च यत्।**
**उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥**

(*श्रीमद्भगवद्गीता १७/१०*)

**भावार्थः** – एकप्रहरात् पूर्वं निर्मितं भोजनम्, अर्धसिक्तं खाद्यम्, अग्निदग्धं भोजनम्, आतपशुष्कम् अन्नम्, ऋतौ गते रसहीनं फलं, पलाण्डु-लशुनादीनि दुर्गन्धपूर्णानि भोजनानि, पूर्वदिवसस्य अवशिष्टं खाद्यम्, उच्छिष्टं खाद्यं, मांस-अण्डकादीनि अमेध्यभोजनानि तथा च तामस-गुण-युक्तानि द्रव्याणि तामसपुरुषाणां प्रियतराणि भवन्ति। एतैः भोज्यद्रव्यैः ते प्रीताः आनन्दिताः च भवन्ति। तामसिक-भोजनेन निद्रा तन्द्रा, आलस्यं च वर्धन्ते। अतः विद्यार्थिभिः एतानि त्यक्तव्यानि।

### (घ) काश्चन आहारविषयकसूक्तयः —

- भोजनं परमेशस्य, भक्तये जीवनाय च।
  त्वं तु मूर्ख विजानासि भोजनार्थं हि जीवनम्॥ (*सुमनोवाटिका*)

- अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम्।
  अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत्॥ (*मनुस्मृतिः २/५७*)



© NCERT not to be republished

- मिताहारो नरः सोढुं शक्तः कष्ट-शतं सुखम्।
  अनभ्यस्तो हि कष्टानामध्यशनो विपद्यते॥ (सुमनोवाटिका)

- अशीतेनाम्भसा स्नानं कवोष्णदुग्धसेवनम्।
  एतद् वो मानुषाः पथ्यं स्निग्धमुष्णं च भोजनम्॥ (भोजप्रबन्धः)

## परियोजनाकार्यम्

**१. विद्यालयस्य परिसरे विद्यमानानां पञ्चवृक्षाणां नामानि तेषाम् औषधीयं प्रयोगं च लिखत।**

**२. स्वास्थ्येन सम्बद्धानां दशश्लोकानां संग्रहणं कुरुत।**

**३. पाठे आगतान् श्लोकान् कण्ठस्थीकृत्य कक्षायां श्रावयत।**











© NCERT not to be republished

दशमः पाठः

# सन्निमित्ते वरं त्यागः (क-भागः)

0872CH10

संस्कृतवाङ्मये कथासाहित्यस्य विशिष्टं स्थानम् अस्ति। कथानां द्वारा अतीव मनोरञ्जकतया जीवनसम्बद्धाः विविधाः उपदेशाः, प्रेरणाः हि एतस्य साहित्यस्य प्रयोजनम्। संस्कृतस्य कथासाहित्यम् अत्यन्तं समृद्धं वैविध्यपूर्णं च अस्ति।

प्रस्तुतः पाठः 'हितोपदेशः' इत्यस्मात् कथाग्रन्थात् स्वीकृतः। राज्ञः शूद्रकस्य सेवायां नियुक्तस्य कस्यचित् वीरवरनामकस्य कर्तव्यनिष्ठस्य राजपुत्रस्य वैशिष्ट्यस्य वर्णनं कथायामत्र वर्तते। सः राज्ञः राष्ट्रस्य च रक्षणाय स्वप्राणान् अपि अर्पयितुम् उद्यतः अभवत्। तस्य स्वामिभक्तिः राष्ट्राय समर्पणभावः च प्रेरणार्हः। अत्र एषः पाठः भागद्वये अस्ति। पठनीया इयं वीरवरकथा। अनुकरणीयः अयं वीरवरः।

आसीत् शोभावती नाम काचन नगरी। तत्र शूद्रको नाम महापराक्रमी नानाशास्त्रवित् पूतचरित्रः महीपतिः प्रतिवसति स्म। अथैकदा वीरवरनामा राजपुत्रः वृत्त्यर्थं कस्मादपि देशाद् राजद्वारमुपागच्छत्। तेन सह वेदरता नाम तस्य पत्नी, शक्तिधरो नाम सुतः, वीरवती नाम कन्या च समायाताः।



© NCERT not to be republished

**वीरवरः** – (*प्रतिहारं वीक्ष्य*) भोः प्रतिहार ! वृत्त्यर्थमागतो राजपुत्रोऽस्मि, तस्मान्नय मां स्वामिनः समीपम्।

(*ततो दौवारिकः तं प्रभोः समीपम् अनयत्।*)

**वीरवरः** – (*प्रणामपुरस्सरं सविनयम्*) देव ! यदि सौभाग्येन अहं भवतः सेवायां नियोजितः तर्हि यदादिश्यते तत् श्रद्धया पालयिष्यामि।

**राजा** – किं ते वर्तनम् ?

**वीरवरः** – प्रतिदिनं सुवर्णशतचतुष्टयं देव !

**राजा** – का ते सामग्री ?

**वीरवरः** – इमौ बाहू, एष खड्गश्च।

**राजा** – नैतच्छक्यम् !

(*तत् श्रुत्वा वीरवरः राजानं प्रणम्य राजसभातः निर्गतः।*)

**मन्त्री** – (*तदालोक्य*) देव ! दिनचतुष्टयस्य वेतनार्पणेन प्रथमं परीक्ष्यतां स्वरूपमस्य वेतनार्थिनो राजपुत्रस्य, किमुपपन्नमेतत् वेतनं न वेति।

अथ मन्त्रिणां वचनात् ताम्बूलदानेन नियोजितोऽसौ राजपुत्रो वीरवरो नरपतिना। स च राजपुत्रः प्रतिदिनं प्रभाते राजदर्शनादनन्तरं स्ववेतनस्य यच्छति देवेभ्यः अर्धम्। स्थितस्य चार्द्धं दरिद्रेभ्यो ददाति, निक्षिपति च तदवशिष्टं भोज्यविलासव्ययार्थं पत्न्याः हस्ते। ततो





not to be republished © NCERT

धृतायुधः सः राजद्वारमहर्निशं सेवते। यदा राजा स्वयमादिशति तदा याति स्वगृहम्। अथैकदा कृष्णचतुर्दश्यामर्द्धरात्रे स राजा श्रुतवान् करुणरोदनध्वनिं कञ्चन।

**राजा** – कोऽत्र द्वारि तिष्ठति?

**वीरवरः** – सेवको वीरवरोऽत्र द्वारि वर्त्तते देव!

**राजा** – क्रन्दनमनुसर राजपुत्र!

**वीरवरः** – यथादिशति देवः।

*(ततोऽसौ तद्रोदनस्वरम् अनुसरन् प्रचलितः।)*

**राजा** – *(स्वगतम्)* नैष गन्तुमर्हति राजपुत्र एकाकी सूचिभेद्ये तिमिरेऽस्मिन्। तस्मात् अहमपि गच्छामि पृष्ठतोऽस्य, निरूपयामि च किमेतदिति।

*(ततो नरपतिः खड्गपाणिः तस्य अनुसरणक्रमेण बहिः निरगच्छत् नगरीद्वारात्। अथ गच्छता राजपुत्रेण बहिः नगरादालोकिता रोदनपरा कापि सुन्दरी दिव्याभरणभूषिता।)*

**वीरवरः** – का त्वमम्ब! किमर्थं विलपसि?



**राजलक्ष्मीः** – वत्स ! अहमेतस्य भूपालस्य शूद्रकस्य राजलक्ष्मीरस्मि। चिरमेतस्य भुजच्छायायां सुमहता सुखेन निवसामि। साम्प्रतं तु देव्या अपराधेनाद्य प्रभृति तृतीये दिवसे राजा पञ्चत्वं यास्यति, तदाहमनाथा भविष्यामि। तदिदानीं नात्र स्थास्यामीति क्रन्दामि।

**वीरवरः** – (*तदाकर्ण्य प्रणिपत्य*) भगवति ! अस्त्यत्र कश्चिदुपायो येन भगवत्याः पुनरिह चिरवासो भवति, सुचिरं जीवति च स्वामी ?

**राजलक्ष्मीः** – अस्ति वत्स ! एकैवात्र प्रवृत्तिः, सा चातीव दुःसाध्या।

**वीरवरः** – (*साष्टाङ्गं नमस्कृत्य*) अम्ब ! कथय, कः सः उपायः दुःसाध्यः ?

**राजलक्ष्मीः** – श्रूयतां पुत्र ! यदि त्वया स्वस्य सर्वतः प्रियं वस्तु सहासवदनेन भगवत्यै सर्वमङ्गलायै उपहारः क्रियेत, तदा पुनर्जीविष्यति राजा शूद्रको वर्षाणां शतम्, अहञ्च सुखेन निवत्स्यामि।

(*ततः सा तत्क्षणादेव गताऽदृश्यतां तत्सम्मुखात्।*)

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| महीपतिः | भूपालः | राजा | King | |
| महापराक्रमी | अतिबलशाली | बहुत बलवान् | Very brave | |
| नानाशास्त्रवित् | अनेकेषां शास्त्राणां ज्ञाता | अनेक शास्त्रों का ज्ञाता | Who knows many shastras | |
| पूतचरित्रः | पवित्रं चरित्रं यस्य | पवित्र चरित्र वाला | Of high character | |
| प्रतिवसति स्म | अवसत् | रहता था | lived | |
| वृत्त्यर्थम् | आजीविकां प्राप्तुम् | आजीविका पाने के लिए | To get livelihood | |
| समायाताः | आगतवन्तः | आए | Came | |
| प्रतिहारम् | द्वारपालम् | द्वारपाल को | To the door-keeper | |

© NCERT not to be republished

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| दौवारिकः | द्वारपालकः | द्वारपाल | Gate-keeper | |
| वर्तनम् | वेतनम् | वेतन | Salary | |
| उपपन्नम् | उपयुक्तम् | उपयुक्त | Appropriate | |
| सुवर्णशत-चतुष्टयम् | चतुश्शतसंख्यकाः स्वर्णमुद्राः | चार सौ स्वर्णमुद्राएँ | Four hundred gold coins | |
| निर्गतः | बहिः गतवान् | बाहर चला गया | Went out | |
| आलोक्य | दृष्ट्वा | देखकर | After seeing | |
| नियोजितः | सेवायां नियुक्तः | नियुक्त | Appointed | |
| उपपन्नम् | युक्तियुक्तम् | उचित | Suitable | |
| धृतायुधः | शस्त्रयुक्तः | शस्त्र धारण किए हुए | Armed | |
| अहर्निशम् | दिवसः रात्रिः च | दिन-रात | Day and Night | |
| करुणरोदनध्वनिम् | करुणाजनकं रोदनध्वनिम् | करुणाजनक क्रन्दन ध्वनि | Sorrowful voice | |
| व्यचिन्तयत् | अचिन्तयत् | सोचा | Thought | |
| सूचिभेद्ये | गहने | सघन | Dense | |
| तिमिरे | अन्धकारे | अन्धकार में | In darkness | |
| पृष्ठतः | पृष्ठभागात् | पीछे से | From back | |
| निरूपयामि | पश्यामि | देखता हूँ | I see | |
| खड्गपाणिः | खड्गवान् जनः | खड्गधारी | One with sword | |
| रोदनपरा | रोदनं कुर्वती | रोती हुई | Weeping lady | |
| विलपसि | रोदनं करोषि | रो रही हो | (You) crying | |
| क्रन्दामि | रोदनं करोमि | रो रही हूँ | Crying | |
| साष्टाङ्गं नमस्कृत्य | अष्टभिः अङ्गैः सह प्रणामं कृत्वा | आठों अंगों सहित प्रणाम करके | With eight parts After bowing | |
| प्रत्युवाच | उत्तरं दत्तवती | उत्तर दिया | Answered | |

© NCERT not to be republished

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| पञ्चत्वम् | मृत्युम् | मृत्यु को | To the death | |
| अनाथा | स्वामिनं विना | स्वामी के बिना | Without protector | |
| प्रवृत्तिः | आचरणम् | आचरण | Follow-up | |
| सुचिरम् | दीर्घकालं यावत् | दीर्घ-काल तक | For long time | |
| दु:साध्या | काठिन्येन अनुपालनीया | कठिनाई से पालन करने योग्य | Difficult to be followed | |
| सहासवदनेन | हास्य-युक्त-मुखेन | हास्य युक्त मुख से | With a smiling face | |
| निवत्स्यामि | वासं करिष्यामि | रहूँगी | Will stay | |
| तत्क्षणादेव | तत्कालम् | उसी क्षण | On the spot | |

© NCERT not to be republished

## अत्र इदम् अवधेयम्

### १. वाक्यान्वयः

संस्कृतभाषायाः अनेकवैशिष्ट्येषु अन्यतमः अस्ति मुक्तः पदविन्यासक्रमः। तन्नाम वाक्ये कर्तृकर्म-क्रियादिपदानि वयं स्वेच्छया भिन्नभिन्नक्रमेण नियोजयितुं शक्नुमः। तद्यथा –

रामः वनम् अगच्छत्।

अगच्छत् रामः वनम्।

वनम् अगच्छत् रामः।



साहित्यम् एवं विविध-पदविन्यासेन रमणीयं भवति। अस्मिन् पाठे एवंविधः मुक्तपदविन्यासः पुनः पुनः दृश्यते। तस्य अवलोकनेन संस्कृतवाक्यरचनायाः सौन्दर्यम् अवगच्छामः। पाठात् कानिचन उदाहरणानि पश्यन्तु।

**सामान्यः वाक्यक्रमः**

शोभावती नाम काचन नगरी आसीत्।

**(पाठे) साहित्ये वाक्यक्रमः**

आसीत् शोभावती नाम काचन नगरी।

**सामान्यः वाक्यक्रमः**

तदविशिष्टं भोज्यविलासव्ययार्थं पत्न्याः हस्ते निक्षिपति च।

**(पाठे) साहित्ये वाक्यक्रमः**

निक्षिपति च तदविशिष्टं भोज्यविलासव्ययार्थं पत्न्याः हस्ते।

पाठकः पदानां विभक्तिं सम्यक् आलोच्य तेषाम् अन्वयं कुर्यात्।

## २. भूतकालः

कालस्य प्रायः 'वर्तमानकालः भूतकालः भविष्यत्-कालः' इति त्रयः भेदाः सन्ति। एतेषु भूतकालः इति 'अतीतस्य कालस्य' वाचकं पदम् अस्ति। सामान्यतः भूतकालाय लङ्-लकारस्य प्रयोगः भवति।

यथा, अस्मिन् पाठे '**उपागच्छत् (उप+अगच्छत्)**, अनयत्, व्यचिन्तयत् (वि+अचिन्तयत्)' इत्यादयः। एतदतिरिक्तं लट्-लकारस्य **क्रिया-पदेन सह 'स्म'** इत्यस्य योजनं कृत्वा अपि भूतकालस्य भावः प्रकट्यते। यथा, अस्मिन् पाठे **'प्रतिवसति स्म'**। एवमेव भूतकाले धातुना सह 'क्तवतु-प्रत्ययः' अपि योज्यते। यथा, अस्मिन् पाठे **'श्रुतवान्'** इति प्रयोगः। एतासु परिस्थितिषु वाक्यस्य संरचना कर्तृवाच्ये भवति। एवमेव, भूतकाले **'क्त-प्रत्ययस्य'** अपि योजनं भवति। यथा, अस्मिन् पाठे 'निर्गतः, नियोजितः, आलोकिता' इत्यादयः प्रयोगाः। क्त-प्रत्ययस्य प्रयोगस्य सन्दर्भे वाक्यस्य संरचना कर्तृवाच्ये, कर्मवाच्ये, भाववाच्ये च भवति।

**कर्तृ-कर्म-भाव-वाच्यानां विषये अग्रिमपाठस्य अवधेयांशे द्रष्टव्यम्**

© NCERT not to be republished

## अभ्यासात् जायते सिद्धिः

१. **पाठम् आधृत्य उदाहरणानुगुणं लिखत 'आम्' अथवा 'न' —**

यथा —

किं राज्ञः शूद्रकस्य नगर्याः नाम शोभावती आसीत् ? ......आम्......

किं वीरवरः अनेकशास्त्राणां ज्ञाता आसीत् ? ......न......

(क) किं वीरवरः राजपुत्रः आसीत् ? ..........................

(ख) "किं ते वर्तनम्" ? इति किं शूद्रकः अपृच्छत् ? ..........................

(ग) किं वीरवरं राज्ञः समीपे दौवारिकः अनयत् ? ..........................

(घ) किं राजा शूद्रकः राजपुत्रं वीरवरं साक्षात् दृष्ट्वा एव वृत्तिम् अयच्छत् ? ..........................

(ङ) किं वीरवरः स्ववेतनस्य चतुर्थं भागम् एव पत्न्यै यच्छति स्म ? ..........................

(च) किं करुण-रोदन-ध्वनिं राजा श्रुतवान् ? ..........................

(छ) किं करुणरोदनध्वनिः दिवसे श्रुतः आसीत् ? ..........................

(ज) किं राजलक्ष्म्या उक्तः उपायः अतीव दुःसाध्यः आसीत् ? ..........................

(झ) किं भगवती सर्वमङ्गला उपायं संसूच्य शीघ्रमेव अदृश्या अभवत् ? ..........................

२. **अधोलिखितान् प्रश्नान् पूर्णवाक्येन उत्तरत —**

(क) शूद्रकः कीदृशः राजा आसीत् ?

..........................................................................................

(ख) वीरवरः कस्य समीपं गन्तुम् इच्छति स्म?

..........................................................................................

(ग) राज्ञः शूद्रकस्य 'का ते सामग्री ?' इति प्रश्नस्य उत्तरं वीरवरः किम् अयच्छत् ?

..........................................................................................

(घ) वीरवरः स्वगृहं कदा गच्छति स्म ?

..........................................................................................

(ङ) वीरवरः स्ववेतनस्य अर्धं केभ्यः यच्छति स्म ?

..........................................................................................

© NCERT not to be republished

(च) राजलक्ष्मीः कुत्र सुखेन अवसत्?

(छ) राजलक्ष्म्याः दुःखस्य कारणं श्रुत्वा बद्धाञ्जलिः वीरवरः किम् अवदत्?

**३. उदाहरणानुसारं निम्नलिखितानि वाक्यानि अन्वयरूपेण लिखत—**

यथा — वृत्त्यर्थमागतो राजपुत्रोऽस्मि, तस्मान्नय मां स्वामिनः समीपम्।

(अहं) राजपुत्रः वृत्त्यर्थम् आगतः अस्मि, तस्माद् मां स्वामिनः समीपं नय।

(क) आसीत् शोभावती नाम काचन नगरी।

(ख) प्रतिदिनं सुवर्णशतचतुष्टयं देव!

(ग) देव! दिनचतुष्टयस्य वेतनार्पणेन प्रथममवगम्यतां स्वरूपमस्य वेतनार्थिनो राजपुत्रस्य, किमुपपन्नमेतत् वेतनं न वेति।

(घ) क्रन्दनमनुसर राजपुत्र!

(ङ) अथ मन्त्रिणां वचनात् ताम्बूलदानेन नियोजितोऽसौ राजपुत्रो वीरवरो नरपतिना।

(च) नैष गन्तुमर्हति राजपुत्र एकाकी सूचिभेद्ये तिमिरेऽस्मिन्।

(छ) भगवति! अस्त्यत्र कश्चिदुपायो येन भगवत्याः पुनरिह चिरवासो भवति, सुचिरं जीवति च स्वामी?

(ज) तदा पुनर्जीविष्यति राजा शूद्रको वर्षाणां शतम्।

© NCERT not to be republished

## ४. उदाहरणानुगुणं पाठगतानि पदानि अधिकृत्य रिक्तस्थानानि पूरयत —

यथा – अथैकदा = अथ + ........एकदा........

| | | | | | | |
|---|---|---|---|---|---|---|
| वृत्त्यर्थम् | = | वृत्ति | + | ..................... | | |
| कस्मादपि | = | ..................... | + | अपि | | |
| कोऽपि | = | कः | + | ..................... | | |
| राजपुत्रोऽस्मि | = | ..................... | + | अस्मि | | |
| यथेष्टम् | = | यथा | + | ..................... | | |
| वेतनार्पणेन | = | वेतन | + | ..................... | | |
| तदालोक्य | = | ..................... | + | आलोक्य | | |
| ततोऽसौ | = | ततः | + | ..................... | | |
| वर्त्तनार्थिनो | = | ..................... | + | अर्थिनः | | |
| तदवशिष्टं | = | ..................... | + | अवशिष्टम् | | |
| राजदर्शनादनन्तरं | = | राजदर्शनात् | + | ..................... | | |
| वेति | = | ..................... | + | इति | | |
| राजलक्ष्मीरुवाच | = | राजलक्ष्मीः | + | ..................... | | |
| चार्द्धं | = | ..................... | + | अर्धम् | | |
| बहिर्नगरादालोकिता | = | बहिः | + | ..................... | + | आलोकिता |
| कापि | = | ..................... | + | अपि | | |
| प्रत्युवाच | = | प्रति | + | ..................... | | |
| राजलक्ष्मीरस्मि | = | ..................... | + | अस्मि | | |
| स्थास्यामीति | = | स्थास्यामि | + | ..................... | | |
| भुजच्छायायां | = | ..................... | + | छायायाम् | | |
| अस्त्यत्र | = | अस्ति | + | ..................... | | |
| कश्चिदुपायो | = | ..................... | + | उपायः | | |

© NCERT not to be republished

५. **अधोलिखितेषु वाक्येषु रक्तवर्णीयपदानि केभ्यः प्रयुक्तानि इति उदाहरणानुगुणं लिखत—**

यथा — अहं भवतः सेवायां नियोजितः। ..........राज्ञे..........

(क) ततः असौ तद्रोदनस्वरानुसरणक्रमेण प्रचलितः। ..............................

(ख) तत् अहम् अपि गच्छामि पृष्ठतोऽस्य। ..............................

(ग) चिरम् एतस्य भुजच्छायायां सुमहता सुखेन निवसामि। ..............................

(घ) सा चातीव दुःसाध्या। ..............................

(ङ) किं ते वर्तनम्? ..............................

६. **अधोलिखितानि वाक्यानि पठित्वा तेन सम्बद्धं श्लोकं पाठात् चित्वा लिखत—**

(क) राजलक्ष्मीः वदति यत् यदि वीरवरः स्वस्य सर्वप्रियं वस्तु त्यजति तदा सा पुनः शूद्रकस्य समीपे स्थास्यति।

(ख) राजा शूद्रकः प्रथमं वीरवरस्य वृत्त्यर्थं प्रार्थनां न स्वीकरोति।

(ग) एकदा कोऽपि वीरवरः नाम राजपुत्रः वृत्तिं प्राप्तुं राज्ञः शूद्रकस्य समीपं गच्छति।

(घ) सः तस्य कर्तव्यनिष्ठां साक्षात् पश्यति।

(ङ) राजा मन्त्रिणां मन्त्रणया वीरवराय वृत्तिं यच्छति।



..............................................................................................

..............................................................................................

..............................................................................................

..............................................................................................

..............................................................................................

..............................................................................................

..............................................................................................

..............................................................................................

..............................................................................................

© NCERT not to be republished

**७. अधोलिखितानां वाक्यानां पदच्छेदं कुरुत —**

यथा – अथैकदा वीरवरनामा राजपुत्रः वृत्त्यर्थं कस्मादपि देशाद् राजद्वारमुपागच्छत्।

अथ एकदा वीरवरनामा राजपुत्रः वृत्त्यर्थं कस्मात् अपि देशात् राजद्वारम् उपागच्छत्।

(क) वृत्त्यर्थमागतो राजपुत्रोऽस्मि।

..........................................................................................................

(ख) अथैकदा कृष्णचतुर्दश्यामर्धरात्रे स राजा श्रुतवान् करुणरोदनध्वनिं कञ्चन।

..........................................................................................................

(ग) तदहमपि गच्छामि पृष्ठतोऽस्य निरूपयामि च किमेतदिति।

..........................................................................................................

(घ) अस्त्यत्र कश्चिदुपायो येन भगवत्याः पुनरिह चिरवासो भवति।

..........................................................................................................

(ङ) एकैवात्र प्रवृत्तिः सा चातीव दुःसाध्या।

..........................................................................................................

## योग्यताविस्तरः

**१. पाठस्य भावानुगुणम् अत्र केचन श्लोकाः प्रदत्ताः सन्ति। एतान् पठत —**



कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥

*(यजुर्वेदः ४०.२)*

यथा छायातपौ नित्यं सुसंबद्धौ परस्परम्।
एवं कर्म च कर्ता च संश्लिष्टावितरेतरम्॥

*(पञ्चतन्त्रम्)*

कार्ये कर्मणि निर्वृत्ते यो बहून्यपि साधयेत्।
पूर्वकार्याविरोधेन स कार्यं कर्तुमर्हति॥

*(वाल्मीकि-रामायणम्)*

© NCERT not to be republished

## २. पठत बोधत —

### जीमूतवाहनस्य कथा

पुरा विदेहनगरस्य शुद्धकेतुः नाम धर्मात्मा राजा आसीत्। तस्य पुत्रः जीमूतवाहनः बाल्यकालाद् एव धर्मनिष्ठः, त्यागशीलः, परोपकाररतः, दीनानुकम्पी च आसीत्। सः स्वेच्छया धर्माचरणं कर्तुं राज्यं त्यक्त्वा वनं गतवान्।

एकदा सः सागरतीरे भ्रमन्, एकं वृद्धं नागं विलोकयति, यः अत्यन्तं दुःखितः आसीत्। जीमूतवाहनः तं पृष्टवान् – "किं कारणं भवतः दुःखस्य ?"

नागः – "हे राजपुत्र ! अस्माकं नागकुलं गरुडेन खाद्यते। प्रतिदिनं एकः नागः तस्मै दातव्यः भवति। अद्य मम पुत्रस्य शङ्खचूडस्य क्रमः अस्ति। अहं कुलविहीनः भविष्यामि इति कारणेन दुःखितोऽस्मि।" (तं दुःखितं दृष्ट्वा जीमूतवाहनः अत्यन्तं द्रवितचित्तः जातः। पश्चात् विचिन्त्य)

जीमूतवाहनः उक्तवान् – "यदि मम शरीरं गरुडस्य क्षुधार्थं पर्याप्तं स्यात्, तर्हि अहं तस्य स्थाने स्वदेहं दास्यामि।" जीमूतवाहनः तं नागं रक्षितुं स्वयं शङ्खचूडनागस्य रूपं धृत्वा गरुडस्य समीपं गतः। गरुडः तं नागं (जीमूतवाहनम्) गृहीत्वा शिलाखण्डे क्षिप्त्वा, भोक्तुं आरब्धवान्। गरुडस्य भोजनकाले जीमूतवाहनः किमपि कष्टं न दर्शितवान्। अत्यन्तं सहिष्णुतया तत्र निश्चलः स्थितवान्। निर्विकारचित्तं तं दृष्ट्वा गरुडः अचिन्तयत् – 'एषः न कोऽपि सामान्यः नागः, यः स्वमृत्युसमयेऽपि ईदृशं धैर्यं धारयति।' ततः सः भोजनात् विरम्य तस्य वास्तविकं परिचयं ज्ञातुम् इष्टवान्। सर्वं वृत्तान्तं ज्ञात्वा तस्य साहसं, कारुण्यं, परोपकारभावनां च दृष्ट्वा तं साधुवादेन सह मुक्तवान्। सः 'नागवंशस्य हननात् विरंस्ये' इति प्रतिज्ञामपि कृतवान्।

**परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः।**
**परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम्॥**

## परियोजनाकार्यम्

१. **कर्तव्यनिष्ठाम् अधिकृत्य दश सूक्तीनां श्लोकानां वा सङ्ग्रहणं कुरुत।**

२. **अस्य पाठस्य कृते कानिचन नूतनानि शीर्षकाणि लिखत।**



© NCERT not to be republished

एकादशः पाठः

# सन्निमित्ते वरं त्यागः (ख-भागः)

0872CH11

वीरवरः नाम कश्चित् राजपुरुषः राज्ञः शूद्रकस्य सेवकरूपेण नियुक्तः। तस्मै वेतनं सुवर्णशतचतुष्टयं दीयते। प्राप्तवेतनस्य अर्धं सः देवकार्ये नियोजयति। एकचतुर्थांशं दरिद्रेभ्यः वण्टयति। अवशिष्टं च एकचतुर्थांशं स्वपत्न्याः हस्ते अर्पयति। स्वखड्गम् आदाय अहर्निशं राजद्वारे रक्षकरूपेण स्थित्वा सः सेवां करोति। एकदा रात्रौ राज्ञः आदेशेन कञ्चित् करुणक्रन्दनध्वनिम् अनुसृत्य सः नगराद् बहिः गच्छति, एकां दिव्याभरणभूषितां कामपि रोदनपरां सुन्दरीं च पश्यति। तस्याः रोदनस्य कारणं पृष्ट्वा जानाति यत् सा राज्ञः शूद्रकस्य राजलक्ष्मीः अस्ति इति। तस्याः वचनात् शूद्रकस्य आयुः केवलं दिनत्रयम् एव अस्ति इति ज्ञात्वा तस्य दीर्घायुषः उपायं पृच्छति। ततः राज्ञलक्ष्मीः अतीव दुःसाध्यम् उपायं सूचयति। तस्याः अनुसारं यदि वीरवरः स्वस्य सर्वप्रियं वस्तु देव्यै सर्वमङ्गलायै उपहाररूपेण समर्पयति, तर्हि तस्य राजा चिरं वर्षशतं जीविष्यति, राजलक्ष्मीरपि तेन सह सुखं स्थास्यति इति। एवं कठिनम् उपायं संसूच्य राजलक्ष्मीः वीरवरं किंकर्तव्यमूढं कृत्वा अदृश्या भवति। गुप्ततया वीरवरम् अनुसरन् राजापि तयोः संवादं शृणोति।

अथ राजपुत्रो वीरवरो स्वावासं गत्वा निद्रालसां पत्नीं पुत्रं दुहितरञ्च प्राबोधयत् अखिलराजलक्ष्मीसंवादं च अवर्णयत्।



© NCERT not to be republished

**शक्तिधरः**– (*तच्छ्रुत्वा सानन्दम्*) हे पितः ! जानाम्यहं भवतः सर्वप्रियं वस्तु। तद् अहमेव भवतः प्रियतमः इति सर्वविदितः। धन्योऽहं स्वामिजीवितरक्षार्थं यदि विनियुक्तः। तत् कोऽधुना विलम्बस्तात ? एवंविधे कर्मणि राष्ट्रस्य राज्ञश्च हिताय मम सर्वस्वविनियोगः परमश्लाघ्यः।

यतः — **धनानि जीवितञ्चैव परार्थे प्राज्ञ उत्सृजेत्।**
**सन्निमित्ते वरं त्यागो विनाशे नियते सति॥ १॥**

**वेदरता** – यद्येवम् अस्मत्कुलोचितं नाचरितव्यं तर्हि गृहीतस्वामिवर्तनस्य कथं निस्तारो भवेत् ?

**वीरवती** – धन्याहं यस्या ईदृशो जनको भ्राता च। तत् कथं विलम्ब्यते ? एष एव गृहीतस्वामिवर्तनस्य निस्तारस्य उपायः।

(*ततस्ते सर्वे सर्वमङ्गलाया आयतनं गताः*)

**वीरवरः** – (*देवीपूजां विधाय*) भगवति ! प्रसीद, विजयतां महाराजः शूद्रकः, गृह्यतामेष मद्दत्त उपहारः।

**वीरवरः** – (*स्वगतम्*) कृतो मया गृहीतस्वामिवर्तनस्य निस्तारो स्वपुत्रसमर्पणेन। अधुना पुत्रवियुक्तस्य मे जीवनं निष्फलम्।

(*ततः सः आत्मानमपि देव्यै समर्पितवान्। ततस्तस्य पत्न्या दुहित्रा च तदेवाचरितम्। राजा शूद्रकोऽपि तेषां सर्वेषां सर्वमेतद् आचरितम् तददृश्य एवालोकयत्।*)



ततोऽसौ व्यचिन्तयत्—

**जायन्ते च म्रियन्ते च मादृशाः क्षुद्रजन्तवः।**
**अनेन सदृशो लोके न भूतो न भविष्यति॥ २॥**

तदेतत्परित्यक्तेन मम राज्येनापि किं प्रयोजनम्।

(*देवीं प्रति प्रकटयन्*) हे मातः! सर्वमङ्गले! गृहाण मे सर्वस्वम्। नेष्टं मे राज्यं न च जीवितं वा।

**देवी** – (*ततः प्रत्यक्षीभूतया भगवत्या सर्वमङ्गलया राज्ञः करं धृत्वा*) वत्स! प्रसन्ना भवामि त्वयि, अलं साहसेन। नेदानीं राज्यभङ्गस्ते भविष्यति।

**राजा** – (*साष्टाङ्गं प्रणिपत्य*) भगवति! न मे प्रयोजनं राज्येन जीवितेन वा। यदि मयि कृपा भगवत्या जाता, तदा ममायुःशेषेणापि प्रत्यावर्तेत राजपुत्रो वीरवरः सह पुत्रेण पत्न्या दुहित्रा च। अन्यथा मया यथाप्राप्ता गतिर्गन्तव्या जगदम्ब!

**देवी** – वत्स! अनेन ते सत्त्वोत्कर्षेण भृत्यवात्सल्येन च परं प्रीतास्मि। तद् गच्छ, विजयी भव। अयमपि सपरिवारो जयतु राजपुत्र आदर्शचरितो वीरवरः।



ततो देवी गताऽदर्शनम्। ततो वीरवरः सपरिवारो सानन्दं स्वगृहं गतः। नृपतिरपि सर्वेषामदृश्य एव स्वप्रासादं प्राविशत्। अन्येद्युः वीरवरोऽपि पुनः द्वारि सेवानिरतोऽभवत्।

**राजा** – (*तं वीक्ष्य*) का वार्ता राजपुत्र!

**वीरवरः** – देव! सा रोदनपरा नारी मद्दर्शनाददृश्यतां गता। न हि कापि वार्ताऽन्या स्वामिन्!

ततः परमां प्रीतिं गतो महीपतिस्तस्मै प्रायच्छत् समग्रकर्णाटप्रदेशं राजपुत्राय वीरवराय।

© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| आवासम् | गृहम् | घर | House | |
| निद्रालसाम् | निद्राप्रभावेण आलस्ययुक्ताम् | नींद के कारण अलसाई हुई को | To the lanuishing due to sleepiness | |
| दुहितरम् | पुत्रीम् | बेटी को | Daughter | |
| अवर्णयत् | वर्णनम् अकरोत् | वर्णन किया | Described | |
| सानन्दम् | प्रसन्नतया | प्रसन्नता के साथ | Happily | |
| आह | अकथयत् | कहा | Said | |
| विनियोगः | नियुक्तिः | नियुक्त | Utilisation | |
| परमश्लाघ्यः | अत्यन्तं प्रशंसनीयः | परम प्रशंसा के योग्य | Most appreciable | |
| उत्सृजेत् | त्यक्तव्यम् | त्यागना चाहिए | Should Sacrifice | |
| सन्निमित्ते | समुपयुक्ते कारणे | बहुत अच्छा कारण होने पर | Having good cause | |
| वरम् | श्रेयस्करम् | प्रशंसनीय | Praiseworthy | |
| ब्रवीति | वदति | कहता है | Says | |
| आचरितव्यम् | आचरणीयम् | आचरण करना चाहिए | Should follow | |
| निस्तारः | (ऋणाद्) विमुक्तिः | चुकाना | Repay | |
| आयतनम् | परिसरः | आँगन | Courtyard | |
| गृह्यताम् | स्वीकुरु | स्वीकार करो | Accept | |

© NCERT not to be republished

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| प्रयोजनम् | लक्ष्यम् | उद्देश्य | Purpose | |
| उत्क्षिप्तः | उत्थापितः | उठाया गया | Lifted upward | |
| प्रत्यक्षीभूतया | प्रत्यक्ष-रूपेण विराजमानया | प्रत्यक्ष रूप से उपस्थित के द्वारा | By the one who has become manifest | |
| राज्यभङ्गः | राज्य-नाशनम् | राज्य का नाश | Downfall of the empire | |
| सत्त्वोत्कर्षेण | सत्त्वगुणस्य पराकाष्ठया | सत्त्वगुण की पराकाष्ठा से | By the excellence of purity | |
| वात्सल्येन | स्नेहेन | वात्सल्यभाव से | With affection | |
| उक्त्वा | कथयित्वा | कहकर | After saying | |
| प्रासादम् | राजभवनम् | राजभवन | Palace | |
| भूपालः | राजा | राजा | King | |

© NCERT not to be republished

## अत्र इदम् अवधेयम्

वाच्यं त्रिविधम्।

१. कर्तृवाच्यम्    २. कर्मवाच्यम्    ३. भाववाच्यम्।

### कर्तृवाच्यम्

कर्तृवाच्ये वाक्ये कर्तृपदस्य प्रथमाविभक्तिः भवति क्रियापदं कर्तृपदानुसारि च भवति। अर्थात् क्रियापदस्य पुरुषः वचनं च कर्तृपदस्य अनुसारेण भवति। वाक्ये कर्मपदम् अस्ति चेत् तस्य द्वितीयाविभक्तिः भवति।

यथा—



बालकः ग्रामं गच्छति। त्वं ग्रामं गच्छसि। अहं ग्रामं गच्छामि।



बालकाः ग्रामं गच्छन्ति। यूयं ग्रामं गच्छथ। वयं ग्रामं गच्छामः।

## कर्मवाच्यम्

कर्मवाच्ये कर्तृपदस्य तृतीया विभक्तिः, कर्मपदस्य प्रथमाविभक्तिः तथा च क्रियापदं कर्मपदानुसारि भवति। अर्थात् क्रियापदस्य पुरुषः वचनं च कर्मपदस्य अनुसारेण भवति।

यथा—

बालकेन ग्रामः गम्यते। त्वया ग्रामः गम्यते। मया ग्रामः गम्यते।

बालकेन ग्रामाः गम्यन्ते। युष्माभिः ग्रामाः गम्यन्ते। अस्माभिः ग्रामाः गम्यन्ते।



© NCERT not to be republished

अत्र ध्यातव्यं यत् कर्मवाच्ये कर्मपदस्य प्रथमा-विभक्तिः कर्तृपदस्य च तृतीया विभक्तिः भवति। क्रियापदस्य रूपं "धातुः + य + आत्मनेपदम्" भवति।

यथा — गम् (धातु) + य + ते (आत्मनेपदप्रत्ययः) = गम्यते।

एवं पठ्यते, लिख्यते, खाद्यते इत्यादीनि यकार-सहितानि भाव-कर्मवाचकक्रियापदानि भवन्ति।

### भाववाच्यम्

अकर्तृवाच्यवाक्ये यदि कर्मपदस्य अभावः भवति तर्हि भाववाच्यस्य प्रयोगः भवति। तदा कर्तृपदस्य तृतीया-विभक्तिः भवति क्रियापदस्य च केवलम् एकम् एव अपरिवर्तनीयं रूपं भवति। तत् च प्रथमपुरुषस्य एकवचनं रूपम्।

यथा —

बालकेन हस्यते। बालकैः हस्यते।
त्वया हस्यते। युष्माभिः हस्यते।





मया हस्यते। अस्माभिः हस्यते।
इत्येवम्।

अत्र ध्यातव्यं यत् हस्यते इति क्रियापदं कर्तृपदानां परिवर्तने अपि अपरिवर्तनीयं भवति। इदम् अपि ध्यातव्यं यत् केचन धातवः सर्वदा अकर्मकाः भवन्ति।

यथा — हस्, क्रन्द्, स्था, स्ना, शी, भू इत्यादयः।

NCERT not to be republished

## अभ्यासात् जायते सिद्धिः

१. **निम्नलिखितेषु वाक्येषु रक्तवर्णीयानि स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत—**

(क) **वीरवरो** पत्नीं पुत्रं दुहितरञ्च प्राबोधयत्।

........................................................................................................

(ख) ततस्ते सर्वे **सर्वमङ्गलाया** आयतनं गताः।

........................................................................................................

(ग) वीरवरः वर्तनस्य निस्तारं **पुत्रोत्सर्गेण** अकरोत्।

........................................................................................................

(घ) राजा **स्वप्रासादं** प्राविशत्।

........................................................................................................

(ङ) महीपतिः **वीरवराय** समग्रकर्णाटप्रदेशम् अयच्छत्।

........................................................................................................

२. **अधोलिखितान् प्रश्नान् उत्तरत—**

(क) वीरवरः किम् अवर्णयत्?

........................................................................................................

(ख) प्राज्ञः धनानि जीवितञ्च केभ्यः उत्सृजेत्?

........................................................................................................

(ग) केन सदृशः लोके न भूतो न भविष्यति?

........................................................................................................

(घ) का अदृश्या अभवत्?

........................................................................................................

(ङ) सपरिवारः वीरवरः कुत्र गतवान्?

........................................................................................................

© NCERT not to be republished

३. **अधोलिखितेषु वाक्येषु रक्तवर्णीयपदानि केभ्यः प्रयुक्तानि इति उदाहरणानुगुणं लिखत —**

उदाहरणम् —

धन्यः अहम् स्वामिजीवितरक्षार्थं विनियुक्तः। ......शक्तिधराय......

(क) भगवति ! न मे प्रयोजनं राज्येन जीवितेन वा। ....................

(ख) वत्स ! अनेन ते सत्त्वोत्कर्षेण भृत्यवात्सल्येन च परं प्रीतास्मि। ....................

(ग) धन्याहं यस्या ईदृशो जनको भ्राता च। ....................

(घ) तदेतत्परित्यक्तेन मम राज्येनापि किं प्रयोजनम् ! ....................

(ङ) अयम् अपि सपरिवारो जीवतु। ....................

४. **उदाहरणानुसारं निम्नलिखितानि वाक्यानि अन्वयरूपेण लिखत —**

यथा — कृतो मया गृहीतस्वामिवर्तनस्य निस्तारो स्वपुत्रोत्सर्गेण।

गृहीतस्वामिवर्तनस्य निस्तारो मया स्वपुत्रोत्सर्गेण कृतः।

(क) नेदानीं राज्यभङ्गस्ते भविष्यति।

....................................................................................................

(ख) तेन पातितं स्वशिरः स्वकरस्थखड्गेन।

....................................................................................................

(ग) तदा ममायुःशेषेणापि जीवतु राजपुत्रो वीरवरः सह पुत्रेण पत्न्या दुहित्रा च।

....................................................................................................

(घ) तत्क्षणादेव देवी गताऽदर्शनम्।

....................................................................................................

(ङ) महीपतिस्तस्मै प्रायच्छत् समग्रकर्णाटप्रदेशं राजपुत्राय वीरवराय।

....................................................................................................

(च) जायन्ते च म्रियन्ते च मादृशाः क्षुद्रजन्तवः।

....................................................................................................

© NCERT not to be republished

**५. उदाहरणानुगुणम् अधोलिखितानां पदानां पदच्छेदं कुरुत—**

यथा—

यद्येवमस्मत्कुलोचितम् = यदि-एवम्-अस्मत्-कुलोचितम्

सत्त्वोत्कर्षेण = सत्त्व-उत्कर्षेण

(क) गृहीतस्वामिवर्तनस्य = ..........

(ख) निस्तारोपायः = ..........

(ग) गृह्यतामेष = ..........

(घ) स्वपुत्रोत्सर्गेण = ..........

(ङ) स्वकरस्थखड्गेन = ..........

(च) तदेतत्परित्यक्तेन = ..........

(छ) स्वशिरश्छेदनार्थमुत्क्षिप्तः = ..........

(ज) मद्दर्शनाददृश्यताम् = ..........

(झ) तत्क्षणादेव = ..........

(ञ) लब्धजीवितः = ..........

**६. (क) उदाहरणानुगुणं पाठगतानि पदानि अधिकृत्य सन्धियुक्तपदैः रिक्तस्थानानि पूरयत—**

यथा—

स्व + आवासम् = स्वावासम्

तत् + श्रुत्वा = ..........

दुहितरम् + च = ..........

धन्यः + अहम् = ..........

जीवितम् + च + एव = ..........

विलम्बः + तात = ..........

कः + अधुना = ..........

न + आचरितव्यम् = ..........

© NCERT not to be republished

धन्या + अहम् = ....................

निस्तारः + उपायः = ....................

वीरवरः + अवदत् = ....................

ततः + असौ = ....................

ततः + ते = ....................

**(ख) निम्नलिखितपदानां सन्धिच्छेदं कुरुत —**



शूद्रकोऽपि = .................... + ....................

पुनर्भूपालेन = .................... + ....................

महीपतिस्तस्मै = .................... + ....................

प्रायच्छत् = .................... + ....................

नृपतिरपि = .................... + ....................

सर्वेषामदृश्य = .................... + ....................

वार्ताऽन्या = .................... + ....................

राज्यभङ्गस्ते = .................... + ....................

गतिर्गन्तव्या = .................... + ....................

इत्युक्त्वा = .................... + ....................

नेदानीं = .................... + ....................

प्रीतास्मि = .................... + ....................



© NCERT not to be republished

**७. अधोलिखितानि कथनानि कथायाः घटनानुसारं लिखत —**

(क) सर्वं दृष्ट्वा राजा शूद्रकः अपि सर्वस्वसमर्पणार्थं सिद्धः अभवत्।

(ख) पितुः वार्तां श्रुत्वा शक्तिधरः प्रसन्नतया स्वस्य समर्पणार्थं सिद्धः अभवत्।

(ग) प्रातः राजा वीरवरम् अपृच्छत् 'ह्यः रात्रौ किम् अभवत्'?

(घ) वीरवरो गृहं गत्वा पत्नीं पुत्रं पुत्रीञ्च प्राबोधयत्, सर्वां च वार्ताम् अकथयत्।

(ङ) वीरवरेण उक्तम् – स्वामिन्! न कापि वार्ता। सा नारी अदृश्या अभवत्।

(च) भगवती प्रसन्ना अभवत्। भगवत्याः कृपया सर्वे जीवितवन्तः।

(छ) वीरवरः परिवारेण सह सर्वस्वसमर्पणम् अकरोत्।



.......................................................................................................

.......................................................................................................

.......................................................................................................

.......................................................................................................

.......................................................................................................

.......................................................................................................

.......................................................................................................



## योग्यताविस्तरः

**१. श्लोकानां पदच्छेदम् अन्वयं भावार्थं च पठत स्मरत च —**

**धनानि जीवितञ्चैव परार्थे प्राज्ञ उत्सृजेत्।**
**सन्निमित्ते वरं त्यागो विनाशे नियते सति॥ १॥**

**पदच्छेदः** – धनानि जीवितम् च एव परार्थे प्राज्ञः उत्सृजेत् सन्निमित्ते वरम् त्यागो विनाशे नियते सति।

**अन्वयः** – प्राज्ञः धनानि जीवितम् चैव परार्थे उत्सृजेत्। विनाशे नियते सति सन्निमित्ते त्यागो वरम्।



© NCERT not to be republished

**भावार्थः** – परोपराकार्थं बुद्धिमान् सम्पदां जीवनं च त्यक्तुं सिद्धः भवेत्। यतः शरीरस्य नाशः तु भवति एव। अतः तस्य सत्कार्यार्थं त्यागः श्रेष्ठः खलु।

**जायन्ते च म्रियन्ते च मादृशाः क्षुद्रजन्तवः।**
**अनेन सदृशो लोके न भूतो न भविष्यति॥ २॥**

**पदच्छेदः** – जायन्ते च म्रियन्ते च मादृशाः क्षुद्रजन्तवः अनेन सदृशः लोके न भूतः न भविष्यति।

**अन्वयः** – मादृशाः क्षुद्रजन्तवः जायन्ते च म्रियन्ते च। लोके अनेन सदृशः न भूतः न भविष्यति च।

**भावार्थः** – मत्सदृशाः अल्पाः जन्म मृत्युं च प्राप्नुवन्ति। एतादृशः जनः तु लोके पूर्वं न जातः न अग्रे भविष्यति च।

२. **(क) सुभाषितानि पठत स्मरत च—**

यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदन-ताप-ताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते कुलेन शीलेन गुणेन कर्मणा॥

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥

यो हि स्वधर्मनिरतः स तेजस्वी भवेदिह।
विना स्वधर्मान्न सुखं स्वधर्मो हि परं तपः॥

**(ख) अकर्मकधातुलक्षणम्—**

धातोरर्थान्तरे वृत्ते धात्वर्थेनोपसङ्ग्रहात्।
प्रसिद्धेरविविक्षातः धातोरकर्मिका क्रिया॥



© NCERT not to be republished

## परियोजनाकार्यम्

**पाठस्य कथाधारेण सरलसंस्कृतेन एकं नाटकं रचयत तस्य मञ्चनं च कुरुत।**

## द्वादशः पाठः

# सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते

0872CH12




© NCERT not to be republished

**यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम्।**
**स्वजनः श्वजनो माभूत् सकलं शकलं सकृत् शकृत्॥ १॥**

**पदच्छेदः** – यद्यपि बहु न अधीषे तथापि पठ पुत्र व्याकरणम् स्वजनः श्वजनः मा अभूत् सकलम् शकलम् सकृत् शकृत्।

**अन्वयः** – पुत्र! यद्यपि बहु न अधीषे तथापि व्याकरणं पठ। येन स्वजनः श्वजनः (इति) सकलं शकलं (इति ) सकृत् शकृत् (इति) च मा अभूत्।

**भावार्थः** – अयि पुत्र! यद्यपि भवान् वा बहून् विषयान् पठितुं न पारयति तथापि व्याकरणं तु अवश्यं पठतु। येन उच्चारणसमये स्वजनः (अर्थात् बन्धुः) इत्यस्य स्थाने श्वजनः (अर्थात् शुनकः) इति न भवेत्। एवमेव, सकृत् (अर्थात् एकवारम्) इत्यस्य स्थाने शकृत् (अर्थात् विष्ठा) इति, सकलम् (पूर्णम्) इत्यस्य स्थाने शकलं (खण्डम्) इति दोषपूर्णम् उच्चारणं न भवेत्। अत्र स्वजनः इत्यादीनाम् उदाहरणद्वारा एकस्य वर्णस्य उच्चारणस्य दोषेण कथं समग्रपदस्य अर्थः परिवर्तितः भवति इति दर्शितम्।

**व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।**
**भीता पतनभेदाभ्यां तद्वद् वर्णान् प्रयोजयेत्॥ २॥**



**पदच्छेदः** – व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्याम् न च पीडयेत् भीता पतनभेदाभ्याम् तद्वद् वर्णान् प्रयोजयेत्।

**अन्वयः** – यथा पतनभेदाभ्यां भीता व्याघ्री दंष्ट्राभ्यां पुत्रान् हरेत् न च पीडयेत् तद्वत् (जनः) वर्णान् प्रयोजयेत्।

**भावार्थः** – व्याघ्री स्वशिशुं दन्तैः नयति। तस्याः दन्ताः अतीव तीक्ष्णाः भवन्ति। अतः सा शिशुं तथा न गृह्णाति येन शिशुः क्षतः भवेत्। एवमेव तथा न गृह्णाति येन शिशुः पतेत्। वर्णानाम् उच्चारणम् अपि तथैव कर्तव्यम्। वर्णोच्चारणम् अतिकठोररूपेण अतिशैथिल्येन वा न कर्तव्यम्।



**एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः।**
**सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते॥ ३॥**

**पदच्छेदः** – एवं वर्णाः प्रयोक्तव्याः न अव्यक्ताः न च पीडिताः सम्यग् वर्णप्रयोगेण ब्रह्मलोके महीयते।

**अन्वयः** – एवम् अव्यक्ताः पीडिताः च वर्णाः न प्रयोक्तव्याः। सम्यक् वर्णप्रयोगेण (सः) ब्रह्मलोके महीयते।

**भावार्थः** – वर्णानाम् उच्चारणसमये इदम् अवधेयं यत् वर्णाः स्पष्टतया स्वाभाविकरूपेण च उच्चारणीयाः। एतेन श्रोता वक्तुः भावान् सम्यक्तया अवगच्छति। एवं सावधानम् उच्चारणशीलः समाजे सम्मानं प्राप्नोति।

**माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।**
**धैर्यं लयसमर्थं च षडेते पाठका गुणाः॥ ४॥**

**पदच्छेदः** – माधुर्यम् अक्षरव्यक्तिः पदच्छेदः तु सुस्वरः धैर्यं लयसमर्थं च षट् एते पाठका गुणाः।

**अन्वयः** – माधुर्यम् अक्षरव्यक्तिः पदच्छेदः तु सुस्वरः धैर्यं लयसमर्थं च एते षट् पाठकाः गुणाः (भवन्ति)।

**भावार्थः** – मधुरेण स्पष्टम् उच्चारणम्, अपेक्षितस्थाने पदच्छेदः, सर्वेषां श्रवणयोग्येन समुचितस्वरेण कथनम्, सन्देहं विना पठनाय धैर्यं, विषये च तल्लीनता इति एते उत्तमस्य पाठकस्य षड् गुणाः भवन्ति। पठनम् इति कौशलं सम्पादयितुं वयम् एतान् गुणान् वर्धयामः।

© NCERT not to be republished

**गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः।**
**अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः॥ ५॥**

**पदच्छेदः** – गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः अनर्थज्ञः अल्पकण्ठः च षट् एते पाठकाधमाः।

**अन्वयः** – गीती शीघ्री शिरःकम्पी लिखितपाठकः अनर्थज्ञः अल्पकण्ठः च एते षट् पाठकाधमाः भवन्ति।

**भावार्थः** – यः जनः गीतगानम् इव पठति, शीघ्रं-शीघ्रं वेगेन वा पठति, मस्तकदोलनं कृत्वा पठति, यः जनः लिखित्वा लिखित्वा पठति, अर्थबोधं विना पठति, मन्दस्वरेण पठति सः अधमपाठकः इति उच्यते। अतः पठनकाले वयम् एतान् दोषान् परिष्कृत्य पठामः चेत् आदर्शपाठकाः भवामः।

© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| ऋत्विजः | पुरोहिताः | पुरोहित | Priests | |
| करतालम् | करताडनध्वनिः | ताली | Clap | |
| अधीषे | पठसि | तुम पढ़ते हो | You read | |
| श्वजनः | शुनकः / कुक्कुरः | कुत्ता | Dog | |
| सकलम् | सम्पूर्णम् | पूरा | Entire | |
| शकलम् | खण्डम् | टुकड़ा | Fragment | |
| सकृत् | एकवारम् | एक बार | Once | |
| शकृत् | मलम् | विष्ठा (मल) | Faeces | |
| अव्यक्ताः | अस्पष्टाः (अल्पप्रयत्नयुक्ताः) | अस्पष्ट (आवश्यकता से कम प्रयत्न करना) | Unclear (Usage of less effort as supposed to be used) | |

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| पीडिताः | बाधिताः (अधिकप्रयत्नयुक्ताः) | पीड़ित (आवश्यकता से अधिक प्रयत्न से युक्त) | Afflicted (Usage of more effort as supposed to be used) | |
| महीयते | पूज्यते / सम्मानं लभते | सम्मानित होता है | Honoured / respected. | |
| व्याघ्री | शार्दूला (स्त्रीव्याघ्रः) | बाघिन | Tigress | |
| दंष्ट्राभ्याम् | दन्ताभ्याम् | दाँतों से | With the fangs | |
| पीडयेत् | हिंसनं कुर्यात् | कष्ट दे | May cause pain | |
| भीता | भयेन पूरिता | डरी हुई | Afraid | |
| प्रयोजयेत् | उच्चारणं / प्रयोगं कुर्यात् | उच्चारण / प्रयोग कर सकता है | May pronounce / apply | |
| माधुर्यम् | मधुरभावः | मिठास / माधुर्य | Sweetness | |
| अक्षरव्यक्तिः | अक्षराणां स्फुटतया उच्चारणम् | अक्षर स्पष्टता | Clarity of letters | |
| सुस्वरः | शोभनः स्वरः | मधुर स्वर | Pleasant voice | |
| धैर्यम् | विश्वासः | आत्मविश्वास | Courage / Self-Confidence | |
| पाठकाः | पठनसम्बन्धिनः | पढ़ने से सम्बन्धित | Related to Reading | |
| शीघ्री | यः वेगेन पठति | तेज गति से पढ़ने वाला | Fast reader | |
| शिरःकम्पी | यः शिरः चालयन् पठति | सिर हिलाकर पढ़ने वाला | One who nods head and reads | |
| अनर्थज्ञः | यः अर्थं न जानाति | जो अर्थ नहीं जानता | Who does not understand meaning | |
| अल्पकण्ठः | दुर्बलध्वनियुक्तः | धीमे स्वर वाला | Weak-voiced | |

© NCERT not to be republished

### अत्र इदम् अवधेयम्

'शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दः-ज्योतिषम्' इति षट् वेदाङ्गानि सन्ति।

**वेदाङ्गानि**

1. **शिक्षा**
   - शिक्षाग्रन्थेषु वर्णानाम् उच्चारणविधिः, स्वराः, विरामः च वर्णिताः सन्ति।
2. **कल्पः**
   - कल्पग्रन्थेषु यज्ञादीनां क्रियाविधेः वर्णनम् अस्ति।
3. **व्याकरणम्**
   - व्याकरणग्रन्थेषु भाषायाः नियमाः सन्ति।
4. **निरुक्तम्**
   - अस्मिन् शास्त्रे शब्दानां व्युत्पत्तिः वर्तते।
5. **छन्दः**
   - अस्मिन् शास्त्रे मात्रा-ताल-इत्यादिदृष्ट्या गायनसम्बद्धं वर्णनम् अस्ति।
6. **ज्योतिषम्**
   - अस्मिन् शास्त्रे सूर्य-चन्द्र-इत्यादीनां नक्षत्राणां गतेः एवं तेषां प्रभावस्य वर्णनम् अस्ति।

## अभ्यासात् जायते सिद्धिः

**१. पाठे विद्यमानानां श्लोकानाम् उच्चारणं स्मरणं लेखनं च कुरुत।**

**२. अधोलिखितानां प्रश्नानाम् एकपदेन उत्तराणि लिखत —**

(क) पाठकाः केषां सम्यक् प्रयोगं कुर्युः? ..........................................

(ख) किम् अवश्यमेव पठनीयम्? ..........................................

(ग) ब्रह्मलोके केन सम्मानं भवति? ..........................................

(घ) अधमाः पाठकाः कति भवन्ति? ..........................................

(ङ) धैर्यं केषां गुणः? ..........................................

© NCERT not to be republished

### ३. अधोलिखितानां प्रश्नानाम् पूर्णवाक्येन उत्तराणि लिखत—

(क) व्याघ्री दंष्ट्राभ्यां कान् नयति?

.................................................................................................................................................

(ख) वर्णाः कथं प्रयोक्तव्याः?

.................................................................................................................................................

(ग) पाठकानां षड्-गुणाः के भवन्ति?

.................................................................................................................................................

(घ) के अधमाः पाठकाः भवन्ति?

.................................................................................................................................................

(ङ) 'स्वजनः' 'श्वजनः' च इत्यनयोः अर्थदृष्ट्या कः भेदः?

.................................................................................................................................................

(च) 'सकलं' 'शकलं' च इत्यनयोः अर्थदृष्ट्या कः भेदः?

.................................................................................................................................................

### ४. अधोलिखितानि लक्षणानि पाठकस्य गुणाः वा दोषाः वा इति विभजत—

अक्षरव्यक्तिः, शीघ्री, लिखितपाठकः, लयसमर्थम्, अनर्थः, अल्पकण्ठः,
माधुर्यम्, गीती, पदच्छेदः, शिरःकम्पी, अनर्थज्ञः, धैर्यम्, सुस्वरः



| गुणाः | दोषाः |
|---|---|
| यथा– अक्षरव्यक्तिः | शीघ्री |
| | |
| | |
| | |
| | |
| | |



© NCERT not to be republished



५. **श्लोकानुसारं रिक्तस्थानानि उचितैः शब्दैः पूरयत—**

(क) भीता .................................... तद्वद् वर्णान् प्रयोजयेत्।

(ख) .................................... लयसमर्थं च षडेते पाठका गुणाः।

(ग) गीती शीघ्री .................................... तथा लिखितपाठकः।

(घ) एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च ....................................।

(ङ) स्वजनः .................................... माभूत् सकलं शकलं सकृत् शकृत्।

६. **अधोलिखितानि वाक्यानि सत्यम् वा असत्यम् वा इति लिखत—**

यथा– पदच्छेदः पाठकानां गुणः अस्ति। ........सत्यम् / असत्यम्........

(क) गानसहितपठनं पाठकानां दोषः भवति। ....................................

(ख) माधुर्यं नाम अक्षराणाम् उच्चारणे स्पष्टता अस्ति। ....................................

(ग) शकृत् नाम एकवारम् इति अर्थः अस्ति। ....................................

(घ) अव्यक्ताः वर्णाः प्रयोक्तव्याः भवन्ति। ....................................

(ङ) व्याघ्री यथा पुत्रान् हरति तथा वर्णान् प्रयोजयेत्। ....................................

## योग्यताविस्तरः

**(क) अक्षर/मात्रापरिवर्तनेन अर्थपरिवर्तनं भवति—**

यथा—

| | | | | |
|---|---|---|---|---|
| मित्रम् | (बन्धुः) | – | मित्रः | (सूर्यः) |
| फलम् | (आम्रादिफलम्) | – | पलम् | (मांसः) |
| पुरुषः | (जनः) | – | परुषः | (कठोरः) |
| अवदानम् | (योगदानम्) | – | अवधानम् | (एकाग्रता) |
| प्रतिपलम् | (प्रतिक्षणम्) | – | प्रतिफलम् | (परिणामः) |
| नदति | (ध्वनिं करोति) | – | नुदति | (प्रेरयति) |
| ददाति | (दानं करोति) | – | दधाति | (धारणं करोति) |



© NCERT not to be republished

**(ख) निम्नलिखितान् श्लोकान् अपि स्मरत—**

आलस्यात् मूर्खसंयोगाद् भयाद् रोगनिपीडनात्।
अत्याशक्त्याच्च मानाच्च षड्भिर्विद्या विनश्यति॥ *(माण्डूक्य-शिक्षा)*

जलमभ्यासयोगेन शैलानां कुरुते क्षयम्।
कर्कशानां मृदुस्पर्शं किमभ्यासात् न साध्यते? *(याज्ञवल्क्य-शिक्षा)*

येषां तीर्थाऽगता विद्या नित्यमभ्यासवर्तिता।
ते भवन्ति दुराधर्षाः ससिंहाः इव पर्वताः॥ *(माण्डूक्य-शिक्षा)*

काकचेष्टो बकध्यानः श्वाननिद्रस्तथैव च।
अल्पाहारी गृहत्यागी विद्यार्थी पञ्चलक्षणः॥ *(लोकप्रचलित-नीतिश्लोकः)*

यथा खनन् खनित्रेण नरो वार्यधिगच्छति।
तथा गुरुगतां विद्यां शुश्रुषुरधिगच्छति॥ *(याज्ञवल्यक्य-शिक्षा)*

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥ *(पाणिनीय-शिक्षा कारिका)*

## परियोजनाकार्यम्

**कक्ष्यायां श्लोकोच्चारण-प्रतियोगितां स्थापयित्वा निर्मित-सूच्यनुगुणम् उच्चारणम् अवलोकनीयम्।**

**अत्र के के गुणाः दोषाः च जाताः इति अधः लिखत—**

| गुणाः | दोषाः |
|---|---|
| | |
| | |
| | |
| | |
| | |

© NCERT not to be republished

## त्रयोदशः पाठः

# वर्णोच्चारण-शिक्षा १

0872CH13

शब्दानां सम्यक् शुद्धं च उच्चारणं नितान्तं महत्त्वपूर्णम् अस्ति इति वयं पूर्वस्मिन् पाठे दृष्टवन्तः। कस्यचित् शब्दस्य सम्यग्-उच्चारणार्थं, तस्य शब्दस्य प्रत्येक-वर्णस्य शुद्धं निर्दुष्टम् उच्चारणं भवेत्। अतः प्रत्येक-वर्णस्य शुद्धम् उच्चारणं कथं भवतीति अत्र ज्ञास्यामः।

वर्णानां स्वर-व्यञ्जनादीनां विविध-भेद-उपभेदानां विषये वयं पूर्वासु कक्षासु ज्ञातवन्तः। तत्र आस्ये षट् उच्चारण-स्थानानि अपि वयं दृष्टवन्तः। परन्तु, वर्णानाम् उच्चारणे केवलम् आस्यस्य एव उपयोगः भवति इति – न। वर्णानाम् उच्चारणार्थम् आस्येन सह शरीरस्य इतरेषाम् अपि अङ्गानाम् उपयोगः भवति, यथा —

| | | | |
|---|---|---|---|
| १. | **नाभि-प्रदेशः** | (Navel-region | – Abdominal Muscles) |
| | | मांसपेशी-बल–तन्त्रम् | – (Muscular-pressure System) |
| २. | **उरः** | (Chest | – Lungs & Diaphragm) |
| | | वायु-बल–तन्त्रम् | – (Air-pressure System) |
| ३. | **कण्ठ-बिलः** | (Voice-box | – Larynx / Vocal-cords) |
| | | ध्वनि–तन्त्रम् | – (Phonatory & Resonatory System) |
| ४. | **आस्यम्** | (Head | – Mouth & Nose) |
| | | उच्चारण–तन्त्रम् | – (Articulatory System) |

• **आस्यस्य अभ्यन्तरे** — (क) **मुखम्** – (Mouth / Oral cavity),
(ख) **नासिका** – (Nose / Nasal cavity) – च उभौ भवतः।

यदा वयं कञ्चित् शब्दं वर्णं वा उच्चारयितुम् इच्छामः, तदा —

१. सर्वप्रथमं **नाभि-प्रदेशे** स्थिताः मांसपेश्यः उरः नोदयन्ति।

२. **उरः** पुनः श्वासकोश-स्थितं वायुम् ऊर्ध्वं निःसारयति।

३. सः वायुः ऊर्ध्वं सरन् **कण्ठ-बिलं** प्राप्नोति।

४. ततः, सः वायुः पुनः ऊर्ध्वं सरन् **आस्यं** प्रविशति।

आस्यस्य अभ्यन्तरं प्रविश्य, **मुखे**, **नासिकायां** च स्थितेषु षट्सु उच्चारण-स्थानेषु वर्णानुसारं स्वकीयं स्थानं प्राप्य, सः वायुः तस्मिन् स्थाने वर्णरूपेण प्रकटीभवति।

© NCERT not to be republished

# मनुष्येषु वाग्-उत्पत्ति-प्रक्रिया
## (Voice Production Mechanism in Humans)




© NCERT not to be republished

'आस्यस्य अभ्यन्तरे स्थितेषु षट्सु स्थानेषु सः वायुः वर्णरूपेण कथं प्रकटीभवति ?' इति अग्रे ज्ञास्यामः।

**आस्यस्य** अभ्यन्तरे वर्णानाम् उत्पत्त्यर्थं वस्तुतः त्रीणि तत्त्वानि आवश्यकानि भवन्ति—

(क) प्रथमम् – **स्थानम्**

(ख) द्वितीयम् – **करणम्**

(ग) तृतीयम् – **आभ्यन्तर-प्रयत्नः**

अस्मिन् पाठे '**स्थानस्य**', '**करणस्य**' च चर्चां कुर्मः। '**आभ्यन्तर-प्रयत्नस्य**' विषये अग्रिमायां कक्षायां ज्ञास्यामः।

## (क) स्थानम्

वर्णस्य उच्चारण-समये, श्वासकोशतः ऊर्ध्वं सरन् वायुः, कण्ठ-बिल-माध्यमेन आस्यस्य अभ्यन्तरं प्रविश्य, तत्र मुखे नासिकायां वा यस्मिन् स्थले वर्णरूपेण प्रकटीभवति, तत्— '**स्थानम्**' इति उच्यते।

**आस्ये – षट् स्थानानि** वयं दृष्टवन्तः, यथा—




### आस्ये वर्णानां षट् उच्चारण-स्थानानि




© NCERT not to be republished



**स्थानस्य** सम्यक् कार्य-निदर्शनार्थं '**मुरली**' समुचितम् उदाहरणम् अस्ति। मुरल्याः '**अङ्गुलिच्छिद्राणि**' आस्यस्य '**स्थानानि**' इव व्यवहरन्ति। मुरली-नलिकया आगच्छन् वायुः **अङ्गुलिच्छिद्रेषु** एव विविध-ध्वनि-रूपेण प्रकटीभवति।




© NCERT not to be republished

### (ख) करणम्

वर्णस्य उच्चारण-समये, आस्यस्य यः भागः **स्थानं** स्पृशति, **स्थानस्य** समीपं वा याति, सः भागः — '**करणम्**' इति कथ्यते।

यथा निदर्शने – मुरलीं वादयन्त्यः '**अङ्गुलयः**' – आस्यस्य **करणानि** इव व्यवहरन्ति। अङ्गुलयः यदा **अङ्गुलिच्छिद्राणि** विविधरूपेण स्पृशन्ति, तेषां समीपं वा यान्ति; तदा तेषु अङ्गुलिच्छिद्रेषु विविध-ध्वनयः प्रकटीभवन्ति।

**तालु**, **मूर्धा**, **दन्तः** च – एतेषु त्रिषु स्थानेषु → '**जिह्वा**' **करणं** भवति।

**तालव्यानां**, **मूर्धन्यानां**, **दन्त्यानां** च वर्णानाम् उच्चारणार्थं → **जिह्वा** – यथाक्रमं **तालु**, **मूर्धानं**, **दन्तं** च **स्थानं** स्पृशति, समीपं वा याति, येन यथाक्रमं तत्-तद्-वर्णानाम् उत्पत्तिः भवति। अतः, एतेषां त्रिविधानां वर्णानाम् उच्चारणार्थं → **जिह्वा** – '**करणम्**', अर्थात् 'उपकरणं' भवति —

**तालव्याः वर्णाः**




[जिह्वा-मध्यः]

**मूर्धन्याः वर्णाः**




[जिह्वा-उपाग्रः]

**दन्त्याः वर्णाः**




[जिह्वा-अग्रः]




**कण्ठः, ओष्ठः, नासिका च – एतेषु त्रिषु स्थानेषु → 'स्व-स्थानम्' एव करणं भवति।**

**कण्ठ्यानाम्, ओष्ठ्यानां, नासिक्यानां** च वर्णानाम् उच्चारणे **जिह्वा** प्रायः निष्क्रिया भवति। एतेषां वर्णानाम् उच्चारणार्थं → तत्-तत्-स्थानस्य एव कश्चित् पर-भागः तत्-तत्-स्थानस्य पूर्व-भागं स्पृशति, समीपं वा याति। अतः, एतेषां त्रिविधानां वर्णानाम् उच्चारणार्थं → **स्व-स्थानं – 'करणम्'**, अर्थात् 'उपकरणं' भवति —

**कण्ठ्याः वर्णाः**




**ओष्ठ्याः वर्णाः**




**नासिक्याः वर्णाः**




© NCERT not to be republished

# पारिभाषिक-शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English |
|---|---|---|---|
| **शिक्षा** | **वर्णोच्चारण-शास्त्रम्** | **वर्णों के शुद्ध उच्चारण का विधान एवं विज्ञान** | **Phonetics (& Phonology)** |
| उच्चारणम् | कथनम् / वाङ्-निष्पत्तिः | कथन | Articulation (Speech) / Pronunciation |
| ध्वनिः | ध्वानः | ध्वनि | Sound / Phonation / Resonation |
| शब्दः | पदम् | शब्द | Word |
| वाक्यम् | वचः / परस्परान्वित-पद-समूहः | वाक्य | Sentence |
| वाक् | वाणी / गीः | वाणी | Speech / Spoken words |
| वर्णः | शब्दस्य अवयवभूतः लघुतमः ध्वनिः | वर्ण | Letter / Phoneme / Grapheme |
| आस्यम् | शिरः / मस्तकम् | मस्तक | Head |
| मुखम् | वक्त्रम् / वदनम् | मुँह | Mouth / Oral cavity |
| नासिका | नासा | नाक / नासिका-स्थान | Nose / Nasal cavity |
| कण्ठ-बिलम् | स्वरयन्त्रम् / ध्वनियन्त्रम् / कण्ठ-कूपः / कुहरम् | स्वरतन्त्री / घोषतन्त्री | Voice-box / Larynx [Vocal-cords] |
| गल-बिलम् | अधो-ग्रसनी | अधो-ग्रसनी | Lower Pharynx / Hypopharynx / Laryngopharynx |
| उरः | वक्षः | छाती | Chest |
| श्वासकोशः | फुप्फुसः | फेफड़े | Lungs |
| नाभि-प्रदेशः | तुन्दकूपी-क्षेत्रः | नाभि-भाग | Navel-region / Abdominal Muscles |
| मांसपेश्यः | स्नायवः | स्नायु | Muscles |
| बलम् | प्रणोदः / अभिपीडनम् | दबाव | Pressure |
| तन्त्रम् | प्रणाली | प्रणाली | (Anatomy) System / System (of Human Body) |
| **वर्णमाला** | **वर्णानां क्रम-पूर्वक-व्यवस्था** | **वर्णों की क्रम-पूर्वक व्यवस्था** | **Alphabet / Sequence of Letters** |
| **स्वरः** | **अच् / अच्-वर्णः** | **स्वर** (*स्वतन्त्र-वर्ण*) | **Vowel [V]** |
| अक्षरम् | स्वरः, एक-स्वर-केन्द्रित-वर्ण-समूहः वा | स्वर या एक-स्वर-केन्द्रित-वर्ण-समूह | Syllable / A Single Vowel or group of letters comprising a single Vowel |
| समानाक्षरम् | सिम् | सामान्य-स्वर | Simple-Vowel / Monophthong [V] |
| सन्ध्यक्षरम् | सन्धि-स्वरः | सन्धि-स्वर | Compound-Vowel / Diphthong [V] |
| **व्यञ्जनम्** | **हल्, हल्-वर्णः** | **व्यञ्जन** | **Consonant [C]** |
| स्पर्शः | वर्गीय-वर्णः | स्पर्श-वर्ण | Stop / Plosive [C], (*Touch*) |
| वर्गीयः | स्पर्श-वर्णः | वर्गीय-वर्ण | Class-Consonants / Groped [C] |

© NCERT not to be republished

| | | | |
|---|---|---|---|
| अन्तःस्थः | वर्णमालायां स्पर्शानाम् ऊष्मणां च मध्ये स्थितः व्यञ्जन-वर्णः | वर्णमाला में स्पर्श एवं ऊष्मा वर्णों के मध्य स्थित व्यञ्जन-वर्ण | Glide (*Situated In-between*) |
| अर्ध-स्वरः | स्वरस्य किञ्चिद्-गुण-सदृशः व्यञ्जन-वर्णः | (*स्वर के समान कुछ गुण वाले व्यञ्जन-वर्ण*) | Semivowel / Semiconsonant [C] |
| ऊष्मा | संघर्षी / वायुप्रधानम् | (*वाष्प / भाप निःसृत करने वाले संघर्षी वर्ण*) | Fricative [C], (*Steam*) Sibilant (hissing sound) (श,ष,स) Aspirate (breathy sound) (ह) |
| अयोगवाहः | संयोगवाहः / प्रत्याहार-सूत्रेभ्यः बहिर्भूतः विशिष्टः व्यञ्जन-वर्णः | (*माहेश्वर-सूत्रों में अपठित विशिष्ट व्यञ्जन-वर्ण*) | After-sound [C] (*Special Consonant that is not enumerated in Śhiva-sūtras*) |
| अनुस्वारः | स्वरानुगः | बिन्दु / स्वर के बाद उच्चारित शुद्ध नासिक्य व्यञ्जन वर्ण [ ं ] | Nasalised Resonant sound uttered after a Vowel [C] (*Following the vowel*) |
| विसर्गः | विसर्जनीयः | विसर्ग [ : ] | Released "h" like sound (ḥ) [C] (*To send out / To release*) |
| अनुनासिकः | स्वस्थानेन सह नासिकया अपि उच्चारितः वर्णः | चन्द्र-बिन्दु [ ँ ] | Nasalised Letter |
| सानुनासिकः | अनुनासिक-गुण-सहितः | अनुनासिक गुण के सहित | Letter with Nasalisation |
| निरनुनासिकः | अनुनासिक-गुण-रहितः | अनुनासिक गुण के रहित | Letter without Nasalisation |
| संयुक्त-व्यञ्जनानि | संयोगः | स्वर-रहित व्यञ्जनों का समूह | Conjunct Consonants [C] |
| **स्थानम्** | **आस्ये उच्चारणस्य स्थलम्** | **मस्तक में उच्चारण का 'स्थल'** | **'Place' of Articulation (in the head)** |
| कण्ठः | गलः (जिह्वामूलः) | गला / कण्ठ-स्थान | Throat / Glottis / Soft Palate / Velum. (*Uvula, Upper-Pharynx / Oropharynx*) |
| कण्ठ्यः | कण्ठ-स्थानोत्पन्नः वर्णः | कण्ठ-स्थान में उत्पन्न वर्ण | Guttural / Velar (Letter) (*Uvular, Pharyngeal*) |
| तालु | तालुकम् / काकुदम् | तालु-स्थान | Hard Palate |
| तालव्यः | तालु-स्थानोत्पन्नः वर्णः | तालु-स्थान में उत्पन्न वर्ण | Palatal (Letter) |
| मूर्धा | मूर्द्ध्वा / मूर्द्धा | मूर्धा-स्थान | Alveolar Ridge |
| मूर्धन्यः | मूर्ध-स्थानोत्पन्नः वर्णः | मूर्धा-स्थान में उत्पन्न वर्ण | Retroflex / Alveolar / Cerebral |
| दन्तः | रदनः / दशनः | दाँत / दन्त-स्थान | (Base of) Tooth |
| दन्त्यः | दन्त-स्थानोत्पन्नः वर्णः | दन्त-स्थान में उत्पन्न वर्ण | Dental (Letter) |
| ओष्ठः | दन्तवासः / दशनवासः | होंठ / ओष्ठ-स्थान | Lip |
| ओष्ठ्यः | ओष्ठ-स्थानोत्पन्नः वर्णः | ओष्ठ-स्थान में उत्पन्न वर्ण | Labial / Bilabial (Letter) |
| नासिक्यः | नासा-स्थानोत्पन्नः वर्णः | नासिका-स्थान में उत्पन्न वर्ण | Nasal (Letter) |

© NCERT not to be republished

| | | | |
|---|---|---|---|
| कण्ठ-तालव्यः | कण्ठ-तालु-स्थानयोः उत्पन्नः वर्णः | कण्ठ एवं तालु स्थानों में उत्पन्न वर्ण | Velar-palatal / Palato-velar Gutturo-palatal / Palato-guttural |
| कण्ठोष्ठ्यः | कण्ठ-ओष्ठ-स्थानयोः उत्पन्नः वर्णः | कण्ठ एवं ओष्ठ स्थानों में उत्पन्न वर्ण | Velar-labial / Labio-velar Gutturo-labial / Labio-guttural |
| दन्त्योष्ठ्यः | दन्त-ओष्ठ-स्थानयोः उत्पन्नः वर्णः | दन्त एवं ओष्ठ स्थानों में उत्पन्न वर्ण | Dento-labial / Labio-dental |
| **करणम्** | **आस्ये उच्चारणस्य उपकरणम्** | **मस्तक में उच्चारण का 'उपकरण' या 'यन्त्र'** | **'Tool' of Articulation (in the Head)** |
| उपकरणम् | यन्त्रम् | साधन | Tool |
| जिह्वा | रसना | जीभ | Tongue |
| जिह्वा-मध्यः | जिह्वायाः मध्यभागः | जीभ का मध्य भाग | Middle of Tongue |
| जिह्वा-उपाग्रः | जिह्वाग्रात् किञ्चित् पूर्वभागः | जीभ का अग्र भाग से थोड़ा पहले का भाग | Near Tip of Tongue |
| जिह्वा-अग्रः | जिह्वायाः अग्रभागः | जीभ का अग्र भाग | Tip of Tongue |
| स्वस्थानकरणः | निजस्थानस्य पर-भागः एव करणं यस्य वर्णस्य | जिस वर्ण का उच्चारण-स्थान का पर-भाग ही उसका करण हो | Such letters where a part of the 'Place' of Articulation itself acts as the 'Tool' of Articulation |

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| नितान्तम् | अत्यन्तम् | अतीव | Very / Highly | |
| निर्दुष्टम् | दोष-रहितम्/शुद्धम् | दोष-रहित / शुद्ध | Impeccable | |
| नोदयन्ति | अभिपीडयन्ति | दबातें हें | Press | |
| निःसारयति | बहिः प्रेषयति | बाहर निकालता है | Pushes out | |
| सरन् | चरन् | बढ़ना हुआ | Move | |
| प्रकटीभवति | उत्पद्यते | उत्पन्न होता है | Appears / Is produced | |
| निदर्शने | उदाहरणे | उदाहरण में | Example | |
| मुरली | वंशी | बाँसुरी | Flute | |
| परिभाषा | शास्त्रीय-व्याख्यानम् | शास्त्रीय व्याख्या | Technical definition | |

© NCERT not to be republished

## अभ्यासात् जायते सिद्धिः

**१. अधोलिखितप्रश्नानाम् उत्तराणि एकपदेन द्विपदेन वा उत्तरत —**

(क) उरसि किं तन्त्रं भवति? ....................................

(ख) नाभिप्रदेशे स्थिताः मांसपेश्यः किं नोदयन्ति? ....................................

(ग) आस्यस्य आभ्यन्तरे वार्णानाम् उत्पत्त्यर्थं द्वितीयं तत्त्वं किम् अस्ति? ....................................

(घ) आस्ये कति स्थानानि सन्ति? ....................................

(ङ) स्थानस्य कार्यनिदर्शनार्थं किं समुचितम् उदाहरणम् अस्ति? ....................................

(च) करणानि मुरल्याः कस्य भागम् इव व्यवहरन्ति? ....................................

**२. अधोलिखितप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत —**

(क) करणं किं भवति?

(ख) उरः श्वासकोशस्थितं वायुं कुत्र निःसारयति?

(ग) मुरल्याः अङ्गुलिच्छिद्राणि कीदृशं व्यवहरन्ति?

(घ) केषां वार्णानाम् उच्चारणे जिह्वा प्रायः निष्क्रिया भवति?

(ङ) तालव्यानां, मूर्धन्यानां, दन्त्यानां च वर्णानाम् उच्चारणार्थं सामान्यं करणं किम् अस्ति?

(च) कण्ठ्यानां, ओष्ठ्यानां, नासिक्यानां च वर्णानाम् उच्चारणार्थं स्थानस्य करणस्य च मध्ये किं भवति?

**३. अधोलिखितेषु वाक्येषु आम् / न इति लिखित्वा उचितभावं सूचयत —**

(क) श्वासकोशस्थितः वायुः ऊर्ध्वं चरन् पूर्वम् आस्यं प्राप्नोति। ......................

(ख) सर्वप्रथमं नाभि-प्रदेशे स्थिताः मांसपेश्याः कण्ठं नोदयन्ति। ......................

(ग) आस्यस्य आभ्यन्तरे वर्णानाम् उत्पत्त्यर्थम् आभ्यन्तर-प्रयत्नः आवश्यकम् अस्ति। ......................

(घ) तालव्य-वर्णनाम् उच्चारणार्थं दन्तः स्थानं स्पृशति। ......................

(ङ) मूर्धन्यानां वर्णानाम् उच्चारणार्थं जिह्वा स्थानं स्पृशति। ......................

(च) तत्तत्स्थानस्य एव कश्चित् पूर्वभागः, तत्तत्स्थानस्य परभागं स्पृशति। ......................

not to be republished © NCERT

४. मुखे उपलभ्यमानानि स्थानानि बहिष्ठात् अन्तः यथाक्रमं (अर्थात् विपरीत-क्रमेण) लिखन्तु—



(क) मूर्धा ..........................................

(ख) दन्तः ..........................................

(ग) तालु ..........................................

(घ) कण्ठः ..........................................

(ङ) ओष्ठः ..........................................

५. यथायोग्यं मेलनं कुरुत—

| सामान्य-स्थानम् | विशेष-स्थानम् | सामान्य-करणम् | विशेष-करणम् |
|---|---|---|---|
| ओष्ठः | मूर्धा | स्वस्थानं करणम् | अधरोष्ठः |
| दन्तः | नासिकामूलस्य उपरिभागः | जिह्वा करणम् | जिह्वाग्रः |
| नासिका | तालु | स्वस्थानं करणम् | जिह्वामध्यः |
| कण्ठः | उत्तरोष्ठः | जिह्वा करणम् | कण्ठस्य अग्रभागः |
| मूर्धा | दन्तः | स्वस्थानं करणम् | नासिकामूलस्य अधोभागः |
| तालु | कण्ठस्य पृष्ठभागः | जिह्वा करणम् | जिह्वोपाग्रः |

© NCERT not to be republished

### अत्र इदम् अवधेयम्

**परिभाषा—**

- '**स्वरः**' इत्यस्य परिभाषा-वाक्यम्—

  **स्वयं राजन्ते इति स्वराः।**

  अर्थः – ये वर्णाः (*स्वयं*) स्वतन्त्ररूपेण (*राजन्ते*) उच्चार्यन्ते,
  ते → **स्वराः** भवन्ति।

- '**व्यञ्जनम्**' इत्यस्य परिभाषा-वाक्यम्—

  **अन्वग् भवति व्यञ्जनम्।**

  अर्थः – उच्चारणार्थं यः वर्णः अचं (*स्वरं*) प्रति पराश्रितः भवति,
  सः वर्णः → '**व्यञ्जनं**' भवति।

## योग्यताविस्तरः

**पाणिनीय-शिक्षा-सूत्राणि—**

षष्ठ-कक्षायां 'स्थान-प्रकरणस्य' सूत्राणि दृष्टवन्तः। अधुना '**करण-प्रकरणस्य**' सूत्राणि—

| सूत्राणि | अर्थाः |
|---|---|
| | **करण–प्रकरणम्** |
| करणम् अपि। | अधुना (*वर्णोच्चारणस्य*) '**करणं**' जानीमः। |
| तालव्य-मूर्धन्य-दन्त्यानां – जिह्वा करणम्। | तालव्यानां मूर्धन्यानां दन्त्यानां च वर्णानाम् उच्चारणे → 'जिह्वा' करणं भवति। |
| जिह्वामध्येन – तालव्यानाम्। | तालव्य-वर्णानाम् उच्चारणे → जिह्वायाः 'मध्य-भागः' करणं भवति। |
| जिह्वोपाग्रेण – मूर्धन्यानाम्। | मूर्धन्य-वर्णानाम् उच्चारणे → जिह्वायाः 'उपाग्र-भागः' करणं भवति। |
| जिह्वाग्रेण – दन्त्यानाम्। | दन्त्य-वर्णानाम् उच्चारणे → जिह्वायाः 'अग्र-भागः' करणं भवति। |
| शेषाः – स्वस्थानकरणाः। | शेषाणां (कण्ठ्य-ओष्ठ्य-नासिक्यानां) वर्णानाम् उच्चारणे → 'स्वस्थानं' (*स्वस्य स्थानस्य कश्चिद् भागविशेषः*) एव → करणं भवति। |
| इत्येतत् करणम्। | अत्र पर्यन्तम् एतत् उच्चारणस्य '**करणं**' चर्चितम्। |

© NCERT not to be republished

# आस्यस्य

अभ्यन्तरे

## षट् स्थानानि, षट् करणानि च



परिशिष्टम् १

# व्याकरणम्

0872CH14

## उपसर्गः

धातोः पूर्वम् उपसर्गान् योजयित्वा नूतनक्रियापदानां निर्माणं क्रियते। सामान्यतः **द्वाविंशतिः (२२) उपसर्गाः** सन्ति। तद्यथा —

**प्र, परा, अप, सम्,** **अनु, अव, निस्, निर्,**
**दुस्, दुर्, वि, आङ्,** **नि, अधि, अपि, अति,**
**सु, उत्, अभि, प्रति,** **परि, उप** — उपसर्गाः।

- उपसर्गाः धातोः पूर्वं भवन्ति।
- उपसर्गकारणतः कदाचित् धातोः अर्थः परिवर्तते। यथा — **गच्छति – आगच्छति**।
- कदाचित् उपसर्गः धातोः एव अर्थम् उत्कर्षेण पोषयति। (अर्थात् विपरीतम् अर्थं न सूचयति) यथा — **शोभते – सुशोभते**।
- धातोः पूर्वं द्वित्राः उपसर्गाः अपि भवितुम् अर्हन्ति।
  प्रति + आ + गच्छति = **प्रत्यागच्छति**।
- उपसर्गकारणतः कदाचित् परस्मैपदी धातुः आत्मनेपदिरूपेण, आत्मनेपदी धातुः परस्मैपदिरूपेण च परिवर्तते। वि + जयति = **विजयते** ; वि + रमते = **विरमति**।

**उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।**
**प्रहाराहारसंहारविहारपरिहारवत्॥**




© NCERT not to be republished

## प्रत्ययाः

धातोः प्रातिपदिकात् च अनन्तरं यः वर्ण-समुदायः वर्णः वा प्रयुज्यते सः प्रत्ययः भवति। धातुभ्यः संज्ञापदानि, विशेषणपदानि अव्ययपदानि वा निर्मातुं **कृत्-प्रत्ययाः** योज्यन्ते। अत्र केषाञ्चन **कृत्-प्रत्ययानां** परिचयः दीयते –

- **क्त्वा** – यदा एकः एव कर्ता कार्यद्वयं करोति, तदा पूर्व-कार्यवाचके क्रियापदे '**क्त्वा**'-प्रत्ययः भवति।

यथा – बालकः पठति। तदनन्तरं बालकः लिखति।

बालकः पठित्वा लिखति।

**पठ्** + **क्त्वा** = **पठित्वा** – छात्रः पुस्तकं पठित्वा उत्तराणि लिखति।

**लिख्** + **क्त्वा** = **लिखित्वा** – अहं कवितां लिखित्वा गायामि।

**कृ** + **क्त्वा** = **कृत्वा** – त्वं कार्यं कृत्वा गृहं गच्छ।

- **ल्यप्** – यदा धातुः उपसर्गेण युक्तः भवति, तदा क्त्वा-प्रत्ययस्य स्थाने '**ल्यप्**' भवति।

यथा – शिष्यः गुरुं प्रणमति। तदनन्तरं शिष्यः पठति।

शिष्यः गुरुं प्रणम्य पठति।

**सम्** + **पूज्** + **ल्यप्** = **सम्पूज्य** – भक्तः देवं सम्पूज्य प्रसादं स्वीकरोति।

**वि** + **ज्ञा** + **ल्यप्** = **विज्ञाय** – अहं वार्तां विज्ञाय सूचयामि।

**आ** + **नी** + **ल्यप्** = **आनीय** – माता जलम् आनीय स्थापयति।

- **तुमुन्** – यदा प्रथमा क्रिया द्वितीयायाः क्रियायाः निमित्तं भवति, तदा निमित्तार्थक-क्रियापदे '**तुमुन्**'-प्रत्ययः भवति।

यथा – रमेशः पठितुं विद्यालयं गच्छति।

**खाद्** + **तुमुन्** = **खादितुम्** – बालः भोजनं खादितुम् आगच्छति।

**स्ना** + **तुमुन्** = **स्नातुम्** – अहं स्नातुं तरणतालं गच्छामि।

**गम्** + **तुमुन्** = **गन्तुम्** – सः गृहं गन्तुम् उद्यतः।

© NCERT not to be republished

- **क्तवतु** – '**क्तवतु**'-प्रत्ययः भूतकालार्थे भवति। विशेषणत्वेन क्तवतु-प्रत्ययान्तपदानां प्रयोगः भवति । एतानि क्रियापदानि न चेदपि, क्रियापदस्य अर्थम् एव सूचयन्ति।

यथा – सः कार्यम् अकरोत्।

सः कार्यं कृतवान्।

क्तवतु-प्रत्यायान्तपदानां रूपाणि त्रिषु लिङ्गेषु भवन्ति—

| | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|
| हस् + क्तवतु = | हसितवान् | हसितवती | हसितवत् |
| श्रु + क्तवतु = | श्रुतवान् | श्रुतवती | श्रुतवत् |
| स्था + क्तवतु = | स्थितवान् | स्थितवती | स्थितवत् |

| धातुः | लट्-लकारः | क्त्वा | ल्यप् | तुमुन् | क्तवतु (पुंलिङ्गः) |
|---|---|---|---|---|---|
| पठ् | पठति | पठित्वा | सम्पठ्य | पठितुम् | पठितवान् |
| खाद् | खादति | खादित्वा | प्रखाद्य | खादितुम् | खादितवान् |
| हस् | हसति | हसित्वा | विहस्य | हसितुम् | हसितवान् |
| लिख् | लिखति | लिखित्वा | विलिख्य | लेखितुम् | लिखितवान् |
| पा | पिबति | पीत्वा | निपाय | पातुम् | पीतवान् |
| गम् | गच्छति | गत्वा | आगत्य | गन्तुम् | गतवान् |
| त्यज् | त्यजति | त्यक्त्वा | परित्यज्य | त्यक्तुम् | त्यक्तवान् |
| नी | नयति | नीत्वा | आनीय | नेतुम् | नीतवान् |
| कृ | करोति | कृत्वा | अनुकृत्य | कर्तुम् | कृतवान् |
| घ्रा | जिघ्रति | घ्रात्वा | आघ्राय | घ्रातुम् | घ्रातवान् |
| स्था | तिष्ठति | स्थित्वा | प्रस्थाय | स्थातुम् | स्थितवान् |
| नम् | नमति | नत्वा | प्रणम्य | नन्तुम् | नतवान् |
| स्मृ | स्मरति | स्मृत्वा | संस्मृत्य | स्मर्तुम् | स्मृतवान् |
| लुण्ठ् | लुण्ठति | लुण्ठित्वा | विलुण्ठ्य | लुण्ठितुम् | लुण्ठितवान् |
| ज्ञा | जानाति | ज्ञात्वा | विज्ञाय | ज्ञातुम् | ज्ञातवान् |
| क्षाल् | क्षालयति | क्षालयित्वा | प्रक्षाल्य | क्षालयितुम् | क्षालितवान् |
| दा | ददाति | दत्त्वा | प्रदाय | दातुम् | दत्तवान् |
| दृश् | पश्यति | दृष्ट्वा | प्रदृश्य | द्रष्टुम् | दृष्टवान् |

© NCERT not to be republished

| | | | | | |
|---|---|---|---|---|---|
| **प्रच्छ्** | पृच्छति | पृष्ट्वा | प्रपृच्छय | प्रष्टुम् | पृष्टवान् |
| **ग्रह्** | गृह्णाति | गृहीत्वा | सङ्गृह्य | ग्रहीतुम् | गृहीतवान् |
| **वद्** | वदति | उदित्वा | प्रोद्य | वदितुम् | उदितवान् |
| **क्रीड्** | क्रीडति | क्रीडित्वा | प्रक्रीड्य | क्रीडितुम् | क्रीडितवान् |

# विभक्तिः

## (क) कारक-विभक्तिः

क्रियान्वयि कारकम्। अन्वयः नाम सम्बन्धः। अर्थात् क्रियया यस्य सम्बन्धः भवति तत् कारकम्।

**कारके प्रवृत्ता विभक्तिः — कारक-विभक्तिः।** कारकाणि षट् भवन्ति —

**कर्ता कर्म च करणं सम्प्रदानं तथैव च।**
**अपादानाधिकरणे इत्याहुः कारकाणि षट्॥**

१. **कर्ता** – यः क्रियायाः सम्पादनं करोति सः '**कर्ता**'।
**कर्तृ**-कारके — **प्रथमा विभक्तिः** भवति।
यथा – रामः गच्छति।

२. **कर्म** – क्रियायाः सम्पादने कर्तुः यत् इष्टतमं भवति तत् '**कर्म**'।
**कर्म**-कारके — **द्वितीया विभक्तिः** भवति।
यथा – रामः वनं गच्छति।

३. **करण** – क्रियायाः सम्पादने यत् प्रकृष्टम् उपकारकं साधनं भवति तत् '**करणम्**'।
**करण**-कारके — **तृतीया विभक्तिः** भवति।
यथा – रामः पुष्पकविमानेन अयोध्यां गच्छति।

४. **सम्प्रदानम्** – कर्ता दानकर्मणा येन सह सम्बन्धं स्थापयितुम् इच्छति तत् '**सम्प्रदानम्**'।
**सम्प्रदान**-कारके — **चतुर्थी विभक्तिः** भवति।
यथा – गुरुः शिष्याय ज्ञानं ददाति।

५. **अपादानम्** – एकस्मात् पदार्थात् अपरस्य पदार्थस्य पृथक्करणे, यस्मात् पृथक्करणं भवति, तत् '**अपादानम्**'। **अपादान**-कारके — **पञ्चमी विभक्तिः** भवति।
यथा – वृक्षात् पत्रं पतति।

६. **अधिकरणम्** – क्रियायाः कारकस्य यः आधारः, तत् '**अधिकरणम्**'।
**अधिकरण**-कारके — **सप्तमी विभक्तिः** भवति।
यथा – छात्राः विद्यालये पठन्ति।

© NCERT not to be republished

## (ख) संबन्ध-विभक्तिः

कारकभिन्नः **स्व-स्वामि-भावादि-सम्बन्धः** शेषः, तत्र — **षष्ठी विभक्तिः** भवति।

यथा – रामस्य राजधानी अयोध्या आसीत्।

## (ग) संबोधन-विभक्तिः

यदा कमपि संबोधयामः, तदा — **संबोधन-विभक्तिः** भवति।

संबोधन-विभक्तिः तु प्रथमा-विभक्तेः एव रूपान्तरम् अस्ति। अत्र केवलम् एकवचने एव भेदः भवति। द्विवचने, बहुवचने तु प्रथमा-विभक्तिवत् एव रूपं भवति।

| यथा – | (एकवचने) | (द्विवचने) | (बहुवचने) |
|---|---|---|---|
| | हे राम ! | हे रामौ ! | हे रामाः ! |
| | हे सीते ! | हे सीते ! | हे सीताः ! |

## (घ) उपपद-विभक्तिः

क्रियापदं विहाय अन्यत् **विशिष्टं पदम् आश्रित्य प्रवृत्ता विभक्तिः** — **उपपद-विभक्तिः।**

यथा – गणेशाय **नमः**। – अत्र '**नमः**' इति पदस्य प्रयोगे — चतुर्थी विभक्तिः।

एवमेव कानिचन अन्यानि अपि विशिष्टपदानि सन्ति, येषां प्रयोगेण भिन्न-भिन्नाः विभक्तयः भवन्ति, यथा—

| | | | | | |
|---|---|---|---|---|---|
| **परितः** | – ग्रामं **परितः** उद्यानम् अस्ति। | – द्वितीया | **उभयतः** | – मार्गम् **उभयतः** वृक्षाः सन्ति। | – द्वितीया |
| **सह** | – पिता पुत्रेण **सह** आगच्छति। | – तृतीया | **अलम्** | – **अलं** कोलाहलेन। | – तृतीया |
| **नमः** | – गुरवे **नमः**। | – चतुर्थी | **बहिः** | – ग्रामात् **बहिः** राजमार्गः अस्ति। | – पञ्चमी |
| **उपरि** | – मन्दिरस्य **उपरि** ध्वजः अस्ति। | – षष्ठी | **अधः** | – वृक्षस्य **अधः** बालकाः क्रीडन्ति। | – षष्ठी |

# सन्धिः

उच्चारणसमये वर्णानां परस्परम् अत्यन्तं सामीप्येन 'संहिता' भवति। संहिताद्वारा वर्णेषु यत् परिवर्तनं भवति, तत् सन्धिः भवति। सन्धिः त्रिविधः – **स्वर-सन्धिः**, **व्यञ्जन-सन्धिः**, **विसर्ग-सन्धिः** च।

## (क) स्वर-सन्धिः

यत्र स्वरेषु परिवर्तनं भवति सः स्वर-सन्धिः। स्वर-सन्धेः दीर्घ-गुण-वृद्धि-यण्-भेदानां परिचयं वयं सप्तम्यां कक्षायां प्राप्तवन्तः। इदानीम् **अयादि-सन्धिं**, **पूर्वरूप-सन्धिं** च जानीमः —

© NCERT not to be republished

१. **अयादि-सन्धिः** — ए, ऐ, ओ, औ – एतेषां वर्णानाम् अनन्तरं यदि – स्वरः आयाति, तर्हि – ए, ऐ, ओ, औ इत्येषां स्थाने क्रमशः – अय्, आय्, अव्, आव् भवति।

नियमः — ए + स्वरः ⇒ अय् + स्वरः | ऐ + स्वरः ⇒ आय् + स्वरः

ओ + स्वरः ⇒ अव् + स्वरः | औ + स्वरः ⇒ आव् + स्वरः

| | |
|---|---|
| गले + ऊष्मा ⇒ गलयूष्मा (ए + ऊ ⇒ अय् + ऊ) | शे + अनम् ⇒ शयनम् (ए + अ ⇒ अय् + अ) |
| वै + अस्तु ⇒ वायस्तु (ऐ + अ ⇒ आय् + अ) | गै + अकः ⇒ गायकः (ऐ + अ ⇒ आय् + अ) |
| प्रभो + इह ⇒ प्रभविह (ओ + इ ⇒ अव् + इ) | भो + अनम् ⇒ भवनम् (ओ + अ ⇒ अव् + अ) |
| नौ + अवतु ⇒ नाववतु (औ + अ ⇒ आव् + अ) | नौ + इकः ⇒ नाविकः (औ + इ ⇒ आव् + इ) |

२. **पूर्वरूप-सन्धिः** — पदान्तयोः 'ए, ओ' वर्णयोः अनन्तरं यदि – 'अ' वर्णः आयाति, तर्हि – 'ए + अ' इत्यनयोः स्थाने – पूर्वरूपम् – (ए) एकादेशः भवति। तथैव – 'ओ + अ' इत्यनयोः स्थाने – पूर्वरूपम् – (ओ) एकादेशः भवति।

नियमः — पदान्तः ए + अ ⇒ एऽ | पदान्तः ओ + अ ⇒ ओऽ

| | | | |
|---|---|---|---|
| ते + अपि | ⇒ तेऽपि | (पदान्तः ए + अ | ⇒ एऽ) |
| सर्वे + अपि | ⇒ सर्वेऽपि | (पदान्तः ए + अ | ⇒ एऽ) |
| नमो + अस्तु | ⇒ नमोऽस्तु | (पदान्तः ओ + अ | ⇒ ओऽ) |
| विष्णो + अव | ⇒ विष्णोऽव | (पदान्तः ओ + अ | ⇒ ओऽ) |

## (ख) व्यञ्जन-सन्धिः

यत्र पूर्ववर्णाः व्यञ्जनवर्णाः उत्तरवर्णाः च स्वराः व्यञ्जनानि वा भवन्ति, तत्र जायमानः सन्धिः व्यञ्जनसन्धिः इति। व्यञ्जनसन्धेः अनेके भेदाः सन्ति, तेषु केषाञ्चन परिचयः अत्र दीयते —

१. **श्चुत्व-सन्धिः** — सकारस्य शकार-चवर्गाभ्यां योगे सकारस्य – शकारः, तवर्गस्य शकार-चवर्गाभ्यां योगे तवर्गस्य क्रमशः – चवर्गः भवति।

नियमः — सकारः / तवर्गः (त्, थ्, द्, ध्, न्) + शकारः / चवर्गः (च्, छ्, ज्, झ्, ञ्) ⇒ शकारः / चवर्गः (च्, छ्, ज्, झ्, ञ्) + शकारः / चवर्गः (च्, छ्, ज्, झ्, ञ्)

| | |
|---|---|
| हरिस् + शेते ⇒ हरिश्शेते | तत् + चित्रम् ⇒ तच्चित्रम् |
| मनस् + चञ्चलम् ⇒ मनश्चञ्चलम् | उत् + चारणम् ⇒ उच्चारणम् |



© NCERT not to be republished

२. **जश्त्व-सन्धिः** — पञ्चम-वर्णान् वर्जयित्वा पदान्ते स्थितानां वर्गीय-व्यञ्जनानाम् अनन्तरं स्वराः मृदु-व्यञ्जनानि (वर्गाणां तृतीय-चतुर्थ-पञ्चम-वर्णाः, य्, र्, ल्, व्, ह्) च आयान्ति चेत् पदान्ते स्थितानां वर्गीय-व्यञ्जनानां – तत्तद्वर्गीय-तृतीय-व्यञ्जनम् आदेशः भवति।

**नियमः** — वर्गीय-व्यञ्जनानि + स्वरः / मृदु-व्यञ्जनं ⇒

वर्गाणां तृतीय-व्यञ्जनम् (ग्, ज्, ड्, द्, ब्) + स्वरः / मृदु-व्यञ्जनं

| | | | | | | |
|---|---|---|---|---|---|---|
| वाक् + अर्थौ | ⇒ | वागर्थौ | | जगत् + ईशः | ⇒ | जगदीशः |
| दिक् + गजाः | ⇒ | दिग्गजाः | | जगत् + गुरुः | ⇒ | जगद्गुरुः |

३. **अनुस्वार-सन्धिः** — पदान्ते स्थितस्य मकारस्य अनन्तरं – व्यञ्जनं भवति चेत् मकारः – अनुस्वारः भवति।

**नियमः** — ....म् + व्यञ्जनम् ⇒ ....अनुस्वारः + व्यञ्जनम्

| | | | | | | |
|---|---|---|---|---|---|---|
| रामम् + वन्दे | ⇒ | रामं वन्दे | | धर्मम् + चर | ⇒ | धर्मं चर |
| गृहम् + गच्छ | ⇒ | गृहं गच्छ | | सर्वम् + कार्यम् | ⇒ | सर्वं कार्यम् |

४. **परसवर्ण-सन्धिः** — अनुस्वारस्य अनन्तरं वर्गीय-व्यञ्जनानि भवन्ति चेत् अनुस्वारस्य स्थाने – तत्तद्वर्गस्य पञ्चमः वर्णः आदेशः भवति। पदान्ते स्थितस्य अनुस्वारस्य तु विकल्पेन आदेशः भवति।

**नियमः** — अनुस्वारः + वर्गीय-व्यञ्जनानि ⇒ ङ्, ञ्, ण्, न्, म् + वर्गीय-व्यञ्जनानि

नित्यम् —

| | | | | | | |
|---|---|---|---|---|---|---|
| अं + कितः | ⇒ | अङ्कितः | | कुं + ठितः | ⇒ | कुण्ठितः |
| अं + चितः | ⇒ | अञ्चितः | | कं + पते | ⇒ | कम्पते |

विकल्पेन —

| | | |
|---|---|---|
| गृहं + गच्छ | ⇒ | गृहङ्गच्छ / गृहं गच्छ |
| त्वं + करोषि | ⇒ | त्वङ्करोषि / त्वं करोषि |

५. **णत्व-विधानम्** — 'ऋ', 'र', 'ष' वर्णानाम् अनन्तरं 'न' वर्णः भवति चेत् 'न' वर्णस्य – 'ण' वर्णः भवति।

यथा – कृष्णः , विष्णुः, वर्णः

ऋ, र, ष वर्णानां नकारस्य च मध्ये – स्वराः, ह, य, व, कवर्गः, पवर्गः इत्येते वर्णाः भवन्ति चेदपि – णत्व-विधानं भवति। यथा –

| | | | | | | |
|---|---|---|---|---|---|---|
| नरा + नाम् | ⇒ | नराणाम् | | ऋषी + नाम् | ⇒ | ऋषीणाम् |
| राम + अयनम् | ⇒ | रामायणम् | | प्र + नमति | ⇒ | प्रणमति |

© NCERT not to be republished



# परिशिष्टम् २

# शब्दरूपाणि

0872CH15

| दधि — | इकारान्तः नपुंसकलिङ्गः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | दधि | दधिनी | दधीनि |
| द्वितीया | दधि | दधिनी | दधीनि |
| तृतीया | दध्ना | दधिभ्याम् | दधिभिः |
| चतुर्थी | दध्ने | दधिभ्याम् | दधिभ्यः |
| पञ्चमी | दध्नः | दधिभ्याम् | दधिभ्यः |
| षष्ठी | दध्नः | दध्नोः | दध्नाम् |
| सप्तमी | दध्नि, दधनि | दध्नोः | दधिषु |
| सम्बोधनम् | हे दधि, हे दधे | हे दधिनी | हे दधीनि |

| वारि — | इकारान्तः नपुंसकलिङ्गः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | वारि | वारिणी | वारीणि |
| द्वितीया | वारि | वारिणी | वारीणि |
| तृतीया | वारिणा | वारिभ्याम् | वारिभिः |
| चतुर्थी | वारिणे | वारिभ्याम् | वारिभ्यः |
| पञ्चमी | वारिणः | वारिभ्याम् | वारिभ्यः |
| षष्ठी | वारिणः | वारिणोः | वारीणाम् |
| सप्तमी | वारिणि | वारिणोः | वारिषु |
| सम्बोधनम् | हे वारि, हे वारे | हे वारिणी | हे वारीणि |

© NCERT
not to be republished



| मधु — | उकारान्तः नपुंसकलिङ्गः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | मधु | मधुनी | मधूनि |
| द्वितीया | मधु | मधुनी | मधूनि |
| तृतीया | मधुना | मधुभ्याम् | मधुभिः |
| चतुर्थी | मधुने | मधुभ्याम् | मधुभ्यः |
| पञ्चमी | मधुनः | मधुभ्याम् | मधुभ्यः |
| षष्ठी | मधुनः | मधुनोः | मधूनाम् |
| सप्तमी | मधुनि | मधुनोः | मधुषु |
| सम्बोधनम् | हे मधु, हे मधो | हे मधुनी | हे मधूनि |



| मरुत् — | तकारान्तः पुंलिङ्गः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | मरुत् | मरुतौ | मरुतः |
| द्वितीया | मरुतम् | मरुतौ | मरुतः |
| तृतीया | मरुता | मरुद्भ्याम् | मरुद्भिः |
| चतुर्थी | मरुते | मरुद्भ्याम् | मरुद्भ्यः |
| पञ्चमी | मरुतः | मरुद्भ्याम् | मरुद्भ्यः |
| षष्ठी | मरुतः | मरुतोः | मरुताम् |
| सप्तमी | मरुति | मरुतोः | मरुत्सु |
| सम्बोधनम् | हे मरुत् | हे मरुतौ | हे मरुतः |

| राजन् — | नकारान्तः पुंलिङ्गः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | राजा | राजानौ | राजानः |
| द्वितीया | राजानम् | राजानौ | राज्ञः |
| तृतीया | राज्ञा | राजभ्याम् | राजभिः |
| चतुर्थी | राज्ञे | राजभ्याम् | राजभ्यः |
| पञ्चमी | राज्ञः | राजभ्याम् | राजभ्यः |
| षष्ठी | राज्ञः | राज्ञोः | राज्ञाम् |
| सप्तमी | राज्ञि, राजनि | राज्ञोः | राजसु |
| सम्बोधनम् | हे राजन् | हे राजानौ | हे राजानः |

| आत्मन् — | नकारान्तः पुंलिङ्गः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | आत्मा | आत्मानौ | आत्मानः |
| द्वितीया | आत्मानम् | आत्मानौ | आत्मनः |
| तृतीया | आत्मना | आत्मभ्याम् | आत्मभिः |
| चतुर्थी | आत्मने | आत्मभ्याम् | आत्मभ्यः |
| पञ्चमी | आत्मनः | आत्मभ्याम् | आत्मभ्यः |
| षष्ठी | आत्मनः | आत्मनोः | आत्मनाम् |
| सप्तमी | आत्मनि | आत्मनोः | आत्मसु |
| सम्बोधनम् | हे आत्मन् | हे आत्मानौ | हे आत्मानः |

| विद्वस् — | सकारान्तः पुंलिङ्गः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | विद्वान् | विद्वांसौ | विद्वांसः |
| द्वितीया | विद्वांसम् | विद्वांसौ | विदुषः |
| तृतीया | विदुषा | विद्वद्भ्याम् | विद्वद्भिः |
| चतुर्थी | विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः |
| पञ्चमी | विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः |
| षष्ठी | विदुषः | विदुषोः | विदुषाम् |
| सप्तमी | विदुषि | विदुषोः | विद्वत्सु |
| सम्बोधनम् | हे विद्वन् | हे विद्वांसौ | हे विद्वांसः |

© NCERT not to be republished

| गच्छत् — | शतृ-प्रत्ययान्तः पुंलिङ्गः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | गच्छन् | गच्छन्तौ | गच्छन्तः |
| द्वितीया | गच्छन्तम् | गच्छन्तौ | गच्छतः |
| तृतीया | गच्छता | गच्छद्भ्याम् | गच्छद्भिः |
| चतुर्थी | गच्छते | गच्छद्भ्याम् | गच्छद्भ्यः |
| पञ्चमी | गच्छतः | गच्छद्भ्याम् | गच्छद्भ्यः |
| षष्ठी | गच्छतः | गच्छतोः | गच्छताम् |
| सप्तमी | गच्छति | गच्छतोः | गच्छत्सु |
| सम्बोधनम् | हे गच्छन् | हे गच्छन्तौ | हे गच्छन्तः |

| गच्छन्ती– | शतृ-प्रत्ययान्तः स्त्रीलिङ्गः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | गच्छन्ती | गच्छन्त्यौ | गच्छन्त्यः |
| द्वितीया | गच्छन्तीम् | गच्छन्त्यौ | गच्छन्तीः |
| तृतीया | गच्छन्त्या | गच्छन्तीभ्याम् | गच्छन्तीभिः |
| चतुर्थी | गच्छन्त्यै | गच्छन्तीभ्याम् | गच्छन्तीभ्यः |
| पञ्चमी | गच्छन्त्याः | गच्छन्तीभ्याम् | गच्छन्तीभ्यः |
| षष्ठी | गच्छन्त्याः | गच्छन्त्योः | गच्छन्तीनाम् |
| सप्तमी | गच्छन्त्याम् | गच्छन्त्योः | गच्छन्तीषु |
| सम्बोधनम् | हे गच्छन्ति | हे गच्छन्त्यौ | हे गच्छन्त्यः |

## सर्वनाम-शब्दरूपाणि

| भवत् — | तकारान्तः पुंलिङ्गः सर्वनाम-शब्दः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | भवान् | भवन्तौ | भवन्तः |
| द्वितीया | भवन्तम् | भवन्तौ | भवतः |
| तृतीया | भवता | भवद्भ्याम् | भवद्भिः |
| चतुर्थी | भवते | भवद्भ्याम् | भवद्भ्यः |
| पञ्चमी | भवतः | भवद्भ्याम् | भवद्भ्यः |
| षष्ठी | भवतः | भवतोः | भवताम् |
| सप्तमी | भवति | भवतोः | भवत्सु |
| सम्बोधनम् | हे भवत् | हे भवन्तौ | हे भवन्तः |

| भवती — | ईकारान्तः स्त्रीलिङ्गः सर्वनाम-शब्दः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | भवती | भवत्यौ | भवत्यः |
| द्वितीया | भवतीम् | भवत्यौ | भवतीः |
| तृतीया | भवत्या | भवतीभ्याम् | भवतीभिः |
| चतुर्थी | भवत्यै | भवतीभ्याम् | भवतीभ्यः |
| पञ्चमी | भवत्याः | भवतीभ्याम् | भवतीभ्यः |
| षष्ठी | भवत्याः | भवत्योः | भवतीनाम् |
| सप्तमी | भवत्याम् | भवत्योः | भवतीषु |
| सम्बोधनम् | हे भवति | हे भवत्यौ | हे भवत्यः |

© NCERT not to be republished

| यद् — | दकारान्तः पुंलिङ्गः सर्वनाम-शब्दः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | यः | यौ | ये |
| द्वितीया | यम् | यौ | यान् |
| तृतीया | येन | याभ्याम् | यैः |
| चतुर्थी | यस्मै | याभ्याम् | येभ्यः |
| पञ्चमी | यस्मात् | याभ्याम् | येभ्यः |
| षष्ठी | यस्य | ययोः | येषाम् |
| सप्तमी | यस्मिन् | ययोः | येषु |

| यद् — | दकारान्तः स्त्रीलिङ्गः सर्वनाम-शब्दः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | या | ये | याः |
| द्वितीया | याम् | ये | याः |
| तृतीया | यया | याभ्याम् | याभिः |
| चतुर्थी | यस्यै | याभ्याम् | याभ्यः |
| पञ्चमी | यस्याः | याभ्याम् | याभ्यः |
| षष्ठी | यस्याः | ययोः | यासाम् |
| सप्तमी | यस्याम् | ययोः | यासु |

| यद् — | दकारान्तः नपुंसकलिङ्गः सर्वनाम-शब्दः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | यत् | ये | यानि |
| द्वितीया | यत् | ये | यानि |
| तृतीया | येन | याभ्याम् | यैः |
| चतुर्थी | यस्मै | याभ्याम् | येभ्यः |
| पञ्चमी | यस्मात् | याभ्याम् | येभ्यः |
| षष्ठी | यस्य | ययोः | येषाम् |
| सप्तमी | यस्मिन् | ययोः | येषु |

© NCERT not to be republished

| इदम् — | मकारान्तः पुंलिङ्गः सर्वनाम-शब्दः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | अयम् | इमौ | इमे |
| द्वितीया | इमम् | इमौ | इमान् |
| तृतीया | अनेन | आभ्याम् | एभिः |
| चतुर्थी | अस्मै | आभ्याम् | एभ्यः |
| पञ्चमी | अस्मात् | आभ्याम् | एभ्यः |
| षष्ठी | अस्य | अनयोः | एषाम् |
| सप्तमी | अस्मिन् | अनयोः | एषु |

| इदम् — | मकारान्तः स्त्रीलिङ्गः सर्वनाम-शब्दः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | इयम् | इमे | इमाः |
| द्वितीया | इमाम् | इमे | इमाः |
| तृतीया | अनया | आभ्याम् | आभिः |
| चतुर्थी | अस्यै | आभ्याम् | आभ्यः |
| पञ्चमी | अस्याः | आभ्याम् | आभ्यः |
| षष्ठी | अस्याः | अनयोः | आसाम् |
| सप्तमी | अस्याम् | अनयोः | आसु |

© NCERT not to be republished

| इदम् — | मकारान्तः नपुंसकलिङ्गः सर्वनाम-शब्दः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | इदम् | इमे | इमानि |
| द्वितीया | इदम् | इमे | इमानि |
| तृतीया | अनेन | आभ्याम् | एभिः |
| चतुर्थी | अस्मै | आभ्याम् | एभ्यः |
| पञ्चमी | अस्मात् | आभ्याम् | एभ्यः |
| षष्ठी | अस्य | अनयोः | एषाम् |
| सप्तमी | अस्मिन् | अनयोः | एषु |

— इति सर्वनाम-शब्दाः —

| कीदृश — | अकारान्तः पुंलिङ्गः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | कीदृशः | कीदृशौ | कीदृशाः |
| द्वितीया | कीदृशम् | कीदृशौ | कीदृशान् |
| तृतीया | कीदृशेन | कीदृशाभ्याम् | कीदृशैः |
| चतुर्थी | कीदृशाय | कीदृशाभ्याम् | कीदृशेभ्यः |
| पञ्चमी | कीदृशात् | कीदृशाभ्याम् | कीदृशेभ्यः |
| षष्ठी | कीदृशस्य | कीदृशयोः | कीदृशानाम् |
| सप्तमी | कीदृशे | कीदृशयोः | कीदृशेषु |
| सम्बोधनम् | कीदृश | कीदृशौ | कीदृशाः |

| कीदृशी — | ईकारान्तः स्त्रीलिङ्गः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | कीदृशी | कीदृश्यौ | कीदृश्यः |
| द्वितीया | कीदृशीम् | कीदृश्यौ | कीदृशीः |
| तृतीया | कीदृश्या | कीदृशीभ्याम् | कीदृशीभिः |
| चतुर्थी | कीदृश्यै | कीदृशीभ्याम् | कीदृशीभ्यः |
| पञ्चमी | कीदृश्याः | कीदृशीभ्याम् | कीदृशीभ्यः |
| षष्ठी | कीदृश्याः | कीदृश्योः | कीदृशीनाम् |
| सप्तमी | कीदृश्याम् | कीदृश्योः | कीदृशीषु |
| सम्बोधनम् | कीदृशि | कीदृश्यौ | कीदृश्यः |

| कीदृश — | अकारान्तः नपुंसकलिङ्गः | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | कीदृशम् | कीदृशे | कीदृशानि |
| द्वितीया | कीदृशम् | कीदृशे | कीदृशानि |
| तृतीया | कीदृशेन | कीदृशाभ्याम् | कीदृशैः |
| चतुर्थी | कीदृशाय | कीदृशाभ्याम् | कीदृशेभ्यः |
| पञ्चमी | कीदृशात् | कीदृशाभ्याम् | कीदृशेभ्यः |
| षष्ठी | कीदृशस्य | कीदृशयोः | कीदृशानाम् |
| सप्तमी | कीदृशे | कीदृशयोः | कीदृशेषु |
| सम्बोधनम् | कीदृश | कीदृशे | कीदृशानि |

# संख्यावाचि-शब्दरूपाणि

| एक — | अकारान्तः नित्यैकवचनान्तः (त्रिषु लिङ्गेषु) | | |
|---|---|---|---|
| विभक्तिः | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
| | एकवचनम् | एकवचनम् | एकवचनम् |
| प्रथमा | एकः | एका | एकम् |
| द्वितीया | एकम् | एकाम् | एकम् |
| तृतीया | एकेन | एकया | एकेन |
| चतुर्थी | एकस्मै | एकस्यै | एकस्मै |
| पञ्चमी | एकस्मात् | एकस्याः | एकस्मात् |
| षष्ठी | एकस्य | एकस्याः | एकस्य |
| सप्तमी | एकस्मिन् | एकस्याम् | एकस्मिन् |

| द्वि — | इकारान्तः नित्यद्विवचनान्तः (त्रिषु लिङ्गेषु) | | |
|---|---|---|---|
| विभक्तिः | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
| | द्विवचनम् | द्विवचनम् | द्विवचनम् |
| प्रथमा | द्वौ | द्वे | द्वे |
| द्वितीया | द्वौ | द्वे | द्वे |
| तृतीया | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| चतुर्थी | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| पञ्चमी | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| षष्ठी | द्वयोः | द्वयोः | द्वयोः |
| सप्तमी | द्वयोः | द्वयोः | द्वयोः |

| त्रि — | नित्यबहुवचनान्तः (त्रिषु लिङ्गेषु) | | |
|---|---|---|---|
| विभक्तिः | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
| | बहुवचनम् | बहुवचनम् | बहुवचनम् |
| प्रथमा | त्रयः | तिस्रः | त्रीणि |
| द्वितीया | त्रीन् | तिस्रः | त्रीणि |
| तृतीया | त्रिभिः | तिसृभिः | त्रिभिः |
| चतुर्थी | त्रिभ्यः | तिसृभ्यः | त्रिभ्यः |
| पञ्चमी | त्रिभ्यः | तिसृभ्यः | त्रिभ्यः |
| षष्ठी | त्रयाणाम् | तिसृणाम् | त्रयाणाम् |
| सप्तमी | त्रिषु | तिसृषु | त्रिषु |

| चतुर् — | नित्यबहुवचनान्तः (त्रिषु लिङ्गेषु) | | |
|---|---|---|---|
| विभक्तिः | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
| | बहुवचनम् | बहुवचनम् | बहुवचनम् |
| प्रथमा | चत्वारः | चतस्रः | चत्वारि |
| द्वितीया | चतुरः | चतस्रः | चत्वारि |
| तृतीया | चतुर्भिः | चतसृभिः | चतुर्भिः |
| चतुर्थी | चतुर्भ्यः | चतसृभ्यः | चतुर्भ्यः |
| पञ्चमी | चतुर्भ्यः | चतसृभ्यः | चतुर्भ्यः |
| षष्ठी | चतुर्णाम् | चतसृणाम् | चतुर्णाम् |
| सप्तमी | चतुर्षु | चतसृषु | चतुर्षु |

© NCERT not to be republished

परिशिष्टम् ३

# धातुरूपाणि

0872CH16

## परस्मैपदम्

### लट्-लकारः (वर्तमानकालः)

**'भू'-धातुः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|---|
| प्रथमपुरुषः | भवति | भवतः | भवन्ति | प्रथमपुरुषः | *सः* भवति | *तौ* भवतः | *ते* भवन्ति |
| मध्यमपुरुषः | भवसि | भवथः | भवथ | मध्यमपुरुषः | *त्वं* भवसि | *युवां* भवथः | *यूयं* भवथ |
| उत्तमपुरुषः | भवामि | भवावः | भवामः | उत्तमपुरुषः | *अहं* भवामि | *आवां* भवावः | *वयं* भवामः |

**'गम्'-धातुः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गच्छति | गच्छतः | गच्छन्ति |
| मध्यमपुरुषः | गच्छसि | गच्छथः | गच्छथ |
| उत्तमपुरुषः | गच्छामि | गच्छावः | गच्छामः |

**'पा'-धातुः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पिबति | पिबतः | पिबन्ति |
| मध्यमपुरुषः | पिबसि | पिबथः | पिबथ |
| उत्तमपुरुषः | पिबामि | पिबावः | पिबामः |

**'नी'-धातुः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नयति | नयतः | नयन्ति |
| मध्यमपुरुषः | नयसि | नयथः | नयथ |
| उत्तमपुरुषः | नयामि | नयावः | नयामः |

**'स्था'-धातुः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | तिष्ठति | तिष्ठतः | तिष्ठन्ति |
| मध्यमपुरुषः | तिष्ठसि | तिष्ठथः | तिष्ठथ |
| उत्तमपुरुषः | तिष्ठामि | तिष्ठावः | तिष्ठामः |

**'दृश्'-धातुः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पश्यति | पश्यतः | पश्यन्ति |
| मध्यमपुरुषः | पश्यसि | पश्यथः | पश्यथ |
| उत्तमपुरुषः | पश्यामि | पश्यावः | पश्यामः |

**'इष्'-धातुः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | इच्छति | इच्छतः | इच्छन्ति |
| मध्यमपुरुषः | इच्छसि | इच्छथः | इच्छथ |
| उत्तमपुरुषः | इच्छामि | इच्छावः | इच्छामः |

© NCERT not to be republished

## लृट्-लकारः (भविष्यत्कालः)

| 'भू'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमपुरुषः | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तमपुरुषः | भविष्यामि | भविष्यावः | भविष्यामः |

| 'गम्'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| मध्यमपुरुषः | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| उत्तमपुरुषः | गमिष्यामि | गमिष्यावः | गमिष्यामः |

| 'पा'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | पास्यति | पास्यतः | पास्यन्ति |
| मध्यमपुरुषः | पास्यसि | पास्यथः | पास्यथ |
| उत्तमपुरुषः | पास्यामि | पास्यावः | पास्यामः |

| 'नी'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | नेष्यति | नेष्यतः | नेष्यन्ति |
| मध्यमपुरुषः | नेष्यसि | नेष्यथः | नेष्यथ |
| उत्तमपुरुषः | नेष्यामि | नेष्यावः | नेष्यामः |

| 'स्था'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | स्थास्यति | स्थास्यतः | स्थास्यन्ति |
| मध्यमपुरुषः | स्थास्यसि | स्थास्यथः | स्थास्यथ |
| उत्तमपुरुषः | स्थास्यामि | स्थास्यावः | स्थास्यामः |

| 'दृश्'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | द्रक्ष्यति | द्रक्ष्यतः | द्रक्ष्यन्ति |
| मध्यमपुरुषः | द्रक्ष्यसि | द्रक्ष्यथः | द्रक्ष्यथ |
| उत्तमपुरुषः | द्रक्ष्यामि | द्रक्ष्यावः | द्रक्ष्यामः |

| 'इष्'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | एषिष्यति | एषिष्यतः | एषिष्यन्ति |
| मध्यमपुरुषः | एषिष्यसि | एषिष्यथः | एषिष्यथ |
| उत्तमपुरुषः | एषिष्यामि | एषिष्यावः | एषिष्यामः |

© NCERT not to be republished

## लङ्-लकारः (भूतकालः)

| 'भू'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | अभवत् | अभवताम् | अभवन् |
| मध्यमपुरुषः | अभवः | अभवतम् | अभवत |
| उत्तमपुरुषः | अभवम् | अभवाव | अभवाम |

| 'गम्'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | अगच्छत् | अगच्छताम् | अगच्छन् |
| मध्यमपुरुषः | अगच्छः | अगच्छतम् | अगच्छत |
| उत्तमपुरुषः | अगच्छम् | अगच्छाव | अगच्छाम |

| 'पा'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | अपिबत् | अपिबताम् | अपिबन् |
| मध्यमपुरुषः | अपिबः | अपिबतम् | अपिबत |
| उत्तमपुरुषः | अपिबम् | अपिबाव | अपिबाम |

| 'नी'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | अनयत् | अनयताम् | अनयन् |
| मध्यमपुरुषः | अनयः | अनयतम् | अनयत |
| उत्तमपुरुषः | अनयम् | अनयाव | अनयाम |

| 'स्था'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | अतिष्ठत् | अतिष्ठताम् | अतिष्ठन् |
| मध्यमपुरुषः | अतिष्ठः | अतिष्ठतम् | अतिष्ठत |
| उत्तमपुरुषः | अतिष्ठम् | अतिष्ठाव | अतिष्ठाम |

| 'दृश्'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | अपश्यत् | अपश्यताम् | अपश्यन् |
| मध्यमपुरुषः | अपश्यः | अपश्यतम् | अपश्यत |
| उत्तमपुरुषः | अपश्यम् | अपश्याव | अपश्याम |

| 'इष्'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | ऐच्छत् | ऐच्छताम् | ऐच्छन् |
| मध्यमपुरुषः | ऐच्छः | ऐच्छतम् | ऐच्छत |
| उत्तमपुरुषः | ऐच्छम् | ऐच्छाव | ऐच्छाम |

© NCERT not to be republished

## लोट्-लकारः (आज्ञार्थकः)

| 'भू'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | भवतु | भवताम् | भवन्तु |
| मध्यमपुरुषः | भव | भवतम् | भवत |
| उत्तमपुरुषः | भवानि | भवाव | भवाम |

| 'गम्'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | गच्छतु | गच्छताम् | गच्छन्तु |
| मध्यमपुरुषः | गच्छ | गच्छतम् | गच्छत |
| उत्तमपुरुषः | गच्छानि | गच्छाव | गच्छाम |

| 'पा'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | पिबतु | पिबताम् | पिबन्तु |
| मध्यमपुरुषः | पिब | पिबतम् | पिबत |
| उत्तमपुरुषः | पिबानि | पिबाव | पिबाम |

| 'नी'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | नयतु | नयताम् | नयन्तु |
| मध्यमपुरुषः | नय | नयतम् | नयत |
| उत्तमपुरुषः | नयानि | नयाव | नयाम |

| 'स्था'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | तिष्ठतु | तिष्ठताम् | तिष्ठन्तु |
| मध्यमपुरुषः | तिष्ठ | तिष्ठतम् | तिष्ठत |
| उत्तमपुरुषः | तिष्ठानि | तिष्ठाव | तिष्ठाम |

| 'दृश्'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | पश्यतु | पश्यताम् | पश्यन्तु |
| मध्यमपुरुषः | पश्य | पश्यतम् | पश्यत |
| उत्तमपुरुषः | पश्यानि | पश्याव | पश्याम |

| 'इष्'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | इच्छतु | इच्छताम् | इच्छन्तु |
| मध्यमपुरुषः | इच्छ | इच्छतम् | इच्छत |
| उत्तमपुरुषः | इच्छानि | इच्छाव | इच्छाम |

© NCERT not to be republished

## विधिलिङ्-लकारः (विध्यर्थकः)

| ‘भू’-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | भवेत् | भवेताम् | भवेयुः |
| मध्यमपुरुषः | भवेः | भवेतम् | भवेत |
| उत्तमपुरुषः | भवेयम् | भवेव | भवेम |

| ‘गम्’-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | गच्छेत् | गच्छेताम् | गच्छेयुः |
| मध्यमपुरुषः | गच्छेः | गच्छेतम् | गच्छेत |
| उत्तमपुरुषः | गच्छेयम् | गच्छेव | गच्छेम |

| ‘पा’-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | पिबेत् | पिबेताम् | पिबेयुः |
| मध्यमपुरुषः | पिबेः | पिबेतम् | पिबेत |
| उत्तमपुरुषः | पिबेयम् | पिबेव | पिबेम |

| ‘नी’-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | नयेत् | नयेताम् | नयेयुः |
| मध्यमपुरुषः | नयेः | नयेतम् | नयेत |
| उत्तमपुरुषः | नयेयम् | नयेव | नयेम |

| ‘स्था’-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | तिष्ठेत् | तिष्ठेताम् | तिष्ठेयुः |
| मध्यमपुरुषः | तिष्ठेः | तिष्ठेतम् | तिष्ठेत |
| उत्तमपुरुषः | तिष्ठेयम् | तिष्ठेव | तिष्ठेम |

| ‘दृश्’-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | पश्येत् | पश्येताम् | पश्येयुः |
| मध्यमपुरुषः | पश्येः | पश्येतम् | पश्येत |
| उत्तमपुरुषः | पश्येयम् | पश्येव | पश्येम |

| ‘इष्’-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | इच्छेत् | इच्छेताम् | इच्छेयुः |
| मध्यमपुरुषः | इच्छेः | इच्छेतम् | इच्छेत |
| उत्तमपुरुषः | इच्छेयम् | इच्छेव | इच्छेम |

© NCERT not to be republished

## आत्मनेपदम्

### लट्-लकारः (वर्तमानकालः)

| 'सेव्'-धातुः | | | | | | | |
|---|---|---|---|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | सेवते | सेवेते | सेवन्ते | प्रथमपुरुषः | *सः* सेवते | *तौ* सेवेते | *ते* सेवन्ते |
| मध्यमपुरुषः | सेवसे | सेवेथे | सेवध्वे | मध्यमपुरुषः | *त्वं* सेवसे | *युवां* सेवेथे | *यूयं* सेवध्वे |
| उत्तमपुरुषः | सेवे | सेवावहे | सेवामहे | उत्तमपुरुषः | *अहं* सेवे | *आवां* सेवावहे | *वयं* सेवामहे |

| 'लभ्'-धातुः | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | लभते | लभेते | लभन्ते |
| मध्यमपुरुषः | लभसे | लभेथे | लभध्वे |
| उत्तमपुरुषः | लभे | लभावहे | लभामहे |

### लृट्-लकारः (भविष्यत्कालः)

| 'सेव्'-धातुः | | | | 'लभ्'-धातुः | | | |
|---|---|---|---|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | सेविष्यते | सेविष्येते | सेविष्यन्ते | प्रथमपुरुषः | लप्स्यते | लप्स्येते | लप्स्यन्ते |
| मध्यमपुरुषः | सेविष्यसे | सेविष्येथे | सेविष्यध्वे | मध्यमपुरुषः | लप्स्यसे | लप्स्येथे | लप्स्यध्वे |
| उत्तमपुरुषः | सेविष्ये | सेविष्यावहे | सेविष्यामहे | उत्तमपुरुषः | लप्स्ये | लप्स्यावहे | लप्स्यामहे |

© NCERT not to be republished

## लङ्-लकारः (भूतकालः)

| 'सेव्'-धातुः | | | | 'लभ्'-धातुः | | | |
|---|---|---|---|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | असेवत | असेवेताम् | असेवन्त | प्रथमपुरुषः | अलभत | अलभेताम् | अलभन्त |
| मध्यमपुरुषः | असेवथाः | असेवेथाम् | असेवध्वम् | मध्यमपुरुषः | अलभथाः | अलभेथाम् | अलभध्वम् |
| उत्तमपुरुषः | असेवे | असेवावहि | असेवामहि | उत्तमपुरुषः | अलभे | अलभावहि | अलभामहि |

## लोट्-लकारः (आज्ञार्थकः)

| 'सेव्'-धातुः | | | | 'लभ्'-धातुः | | | |
|---|---|---|---|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | सेवताम् | सेवेताम् | सेवन्ताम् | प्रथमपुरुषः | लभताम् | लभेताम् | लभन्ताम् |
| मध्यमपुरुषः | सेवस्व | सेवेथाम् | सेवध्वम् | मध्यमपुरुषः | लभस्व | लभेथाम् | लभध्वम् |
| उत्तमपुरुषः | सेवै | सेवावहै | सेवामहै | उत्तमपुरुषः | लभै | लभावहै | लभामहै |

## विधिलिङ्-लकारः (विध्यर्थकः)

| 'सेव्'-धातुः | | | | 'लभ्'-धातुः | | | |
|---|---|---|---|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | सेवेत | सेवेयाताम् | सेवेरन् | प्रथमपुरुषः | लभेत | लभेयाताम् | लभेरन् |
| मध्यमपुरुषः | सेवेथाः | सेवेयाथाम् | सेवेध्वम् | मध्यमपुरुषः | लभेथाः | लभेयाथाम् | लभेध्वम् |
| उत्तमपुरुषः | सेवेय | सेवेवहि | सेवेमहि | उत्तमपुरुषः | लभेय | लभेवहि | लभेमहि |

© NCERT not to be republished

## टिप्पणी

© NCERT not to be republished